Gandhi Memorial College Of Education Bantalab Jammu



लौकिकन्यायसंग्रहः

सम्पादिका

आर्. गिरिजा

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

लौकिकन्यायसंग्रहः

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

अनन्तशयनसंस्कृतग्रन्थावली ।
ग्रन्थाङ्क : २७०

लौकिकन्यायसंग्रहः

सम्पादिका
आर्. गिरिजा

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

TRIVANDRUM SANSKRIT SERIES No : 270

(Sanskrit)
Laukikanyayasamgraha

General Editor
Dr. K.G. Sreelekha

Editor : R. Girija

© Rights Reserved.
First published in January 2011

Cover design & Type Setting
SB Press Pvt. Ltd., Statue
Trivandrum - 1

Printed at
SB Press Pvt. Ltd., Statue
Trivandrum - 1

Publishers
O R I & MSS. Library
University of Kerala
Kariavattom, Trivandrum - 695581

Distributors
Dept. of Publications
University of Kerala
Palayam, Trivandrum - 695034

Price : Rs. 70/-

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

Trivandrum Sanskrit Series: 270

Laukikanyaya Samgraha

Editor
R. Girija

Oriental Research Institute &
Manuscripts Library
University of Kerala
Kariavattom
2011

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

Preface

Among the huge collection of Manuscripts of the ORI & Mss. Library there are two bundles of Laukikanyāyaratnākara are found. They are 1274A and 1274 B- Pūrvārtha and Uttarārtha of Laukikanyāyaratnakara respectively. The author of this work is one Udāsīnaraghunatha Varma. There is another Laukikanyāyasamgraha by the same author which is an abridged version of the Laukikanyāyaratnākara. The Reg.No. of this manuscript is 5390, having 2700 granthas and is in Devanāgarī script.

The content of this work is very interesting and informative . Advaita Philosophy is the subject matter of these works. The beginning portion contain 48 verses and the rest of the work is in Prose. Each and every aspect is explained clearly with different laukikanyāyas. The vyākarana sutras are also quoted in this work.

The Pañcīkaraṇa, trivṛtkarana etc find place in this work. The work begins with the praise of the mountains and the earth. Then he worshipes different duties, Śambhu, Hari, Gauri, Brahma, Gaṇapati and Bhārati. He says that he begins to write the samgraha for the sudden revealing (sīghrabodhāya punditā) to the scholars.

I am thankful to the Head of the Department Dr. K. G. Sreelekha for taking initiative to publish this book. I am also thankful to the S.B. Press for the neat execution of this work.

Kariavattom
22-1-2011

R. GIRIJA
Associate Professor
O R I & Mss. Library
University of Kerala
Kariavattom

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

Preface

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

।। लौकिकन्यायसंग्रहः ।।

लौकिकन्यायमात्रैः अस्य भूमेः सृष्टि स्थिति लयादि सर्वं वक्तुं श्रमः करोति रामदयालुः। तस्य अयं रघुनाथः लौकिकन्यायरत्नाकरात् अस्य संक्षेपः क्रियते अस्माकं शीघ्रबोधाय। न्यायार्थविषयं उदाहृतिं च अर्थमात्रं दर्शयत्यत्र। कश्चित् अर्थमात्रं वदिष्यन्ति; कश्चित्पुनः व्याख्यास्यन्ते, कश्चित् पुनश्च कथयन्तिच। ये सर्वे अर्थादर्थः पूर्वैः न्यायतया प्रोक्ताः। वेदान्तशास्त्रगां अर्थं मीमांसान्यायगतं कांचित् कांचित् अपर-शास्त्रकं आम्नायशिरसामस्य निबन्धत्वं वैशेष्यात् उपयुज्यते। एवं सर्वं साधारणं असाधारणं व तत्त्वं उपमानोपमेयैः साधारणजनानां बोधनाय उपयुज्यते। शास्त्रैकदेशे स्थितं तत्त्वं शास्त्रकार्यान्तरे समानीय प्रकरणं नाम ग्रन्थविशेषं संगृह्यते।

उपासनाः क्रियारूपाः सर्वे समानीय प्रदर्शयति च। अस्मिन् लौकिकन्यायसंग्रहे प्रथमतः ४८ पद्यम्। एतैः पद्यैः निबन्धते अद्वैतम्। तदनन्तरं तदर्थावबोधार्थं अविद्यालक्षणादि प्रदर्श्य तद्वारणाय उपायं दर्शयति। तर्दर्थमेव लौकिकन्यायानि उक्तानि। "मज्जनोन्मज्जनन्यायं" आरभ्य प्रमाणजन्य प्रमितेः स्वविषयप्रतिष्ठात्व स्थिरीकरणाय विचारशास्त्रं आरभ्यते। तदनन्तरं विविधैः प्रकारैः अनुमानोपमानैः प्रमाणप्रमेयैः च शास्त्रं प्रदर्श्यते। एवं न्यायैः अस्मिन् लोके दृश्यमानं सर्वं अस्माकं दृष्टिगोचरं आनीय तस्य साध्यासाध्यविषयं दर्शयित्वा अद्वैतं सम्यक् विचार्य शास्त्रं प्रदर्शयति च।।

एवं पञ्चीकरणं, त्रिवृत्करणं, विश्वतैजसादि रूपं सर्वं वर्णयति। गणपतिः, स्कन्दः, विष्णुः रुद्रादि सर्वं प्रदर्श्य तदनुरूपैः लौकिकन्यायैः एतत् सर्वं व्याख्याय, ते सर्वं तत्तदनुकूलैः प्रमाणैः निरस्यते च। एवं एकैकं पुराणं विविच्य विचारणं क्रियते। यथा प्रज्वालितचुल्लयधिरोहित स्थाल्यंतर्गतेषु एकस्मिन् पक्वे निश्चिते सर्वे पक्वा इति निश्चीयन्ते तद्वत् प्रकृतेऽपि इत्यर्थः। एवं अनेकैः लोकवाक्यैः उदाहरणैः अस्य जगतः मिथ्यात्वं स्थापयति। अपरैः अनेकैः वाक्यैः उदाहरणैश्च अस्य परमात्मनः जीवात्मा अभिन्नत्वं, तस्य अस्मिन् जगति स्थिरं स्थायित्वं च वर्ण्यते। अत्र पाणिनिप्रयुक्तैः सूत्रैरपि अयं स्थापयति। प्रथमेन प्रथमो द्वितीयो द्वितीयेन इतिवत् ब्रह्मणो रूपे मूर्त्तं चामूर्तं च विधीयते।

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

'अथात आदेशो नेति नेति' इति क्रमेण तत्र हि मूर्त्तामूर्त्तयोः निषेधमन्वेति च। एतत् परमपि अनेकैः न्यायैः एकैकं साधनं विचार्य निष्कर्षां करोति। एवं निरन्तंर न्यायानि प्रदर्श्य एकैकं लौकिकं अलौकिकं मीमांसां सम्यक् विचार्य अन्ते अद्वैतनिष्ठं परब्रह्म भूतं इदं सर्वमिति स्थापयति च।।

एवं श्रीसाधुवृन्दवन्दितपादारविन्दः रत्नाकरविद्वद्वरश्रीमद्रामदयालुशिष्येण श्रीगुलाबरायवर्मात्मजेन रघुनाथवर्मणा विरचितः "लौकिकन्यायसंग्रहः" इति सर्वेषां कीर्तयति च।।

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

।। लौकिकन्यायसंग्रहः ।।

श्रीगणेशाय नमः ।

यत्कीर्तिप्रभया सुशुक्लभुवने मायाप्रभावैः प्रभो-
र्नीलाद्रेर्जनिता प्रतीतिरचला द्यौः संवृता शोभते ।
यच्छिष्योडुगणैः समे गुरुरहो हार्दांधकारापहः
श्रीमद्रामदुयालुरिन्दुरमलो मोदायभूयात्सदा ।। १

नत्वा शंभूं हरिं गौरीं विधिं ढुंढिं च भारतीम्
क्रियते रघुनाथेन लौकिकन्यायसंग्रहः । २

लौकिकन्यायरत्नानामाकरेयत्प्रदर्शितम्
तस्य संक्षेप एवेह शीघ्रबोधाय दर्श्यते ।। ३

न्यायार्थंविषयं चैवोदाहृतिं च यथामति ।
वदिष्यामोऽत्र संक्षेपाद्विस्तारादपि च क्वचित् ।। ४

प्रसङ्गादागतानां तु न्यायानां तत्र विस्तृते
अर्थमात्रं वदिष्यामः क्वचिदन्यामुदाहृतिम् ।। ५

प्रसङ्गादायाता अपि निगदविख्यातविषया
न ते व्याख्यास्यन्ते पुनरसकृदुक्ताश्च विरलाः ।
पुनर्व्याख्यास्यन्ते विषयकथनादि प्रवितताः
पुरा प्रोक्तान्कांश्चित्पुनरपि वदिष्यामि विषये ।। ६

अर्थादर्थो न शब्दार्थः इत्याद्या वृद्धसूक्तयः
पूर्वैर्न्यायतया प्रोक्ता वदिष्यामस्ततस्तथा ।। ७

उदाहृतिं वदिष्यामः प्रायो वेदान्तशास्त्रगाम्
मीमांसा न्यायगां कांचित्कांचिच्चापरशास्त्रगाम् ।। ८

आम्नायशिरसामस्य निबन्धत्वं न तावता ।
स्याद्वैशेष्यात्तु तद्वाद इति न्यायसमाश्रयात् ।। ९

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

पञ्चीकृतस्य भूम्यादेः पृथिवीत्वादिकं यथा
अम्नायान्तनिबन्धत्वं तथास्य स्यादसंशयम् ।। १०

असाधारणधर्मस्य गन्धवत्वादिकस्य वै
उपलंभात्तथात्वं चेत्तन्नैवात्रापि वारितम् ।। ११

शास्त्रैकदेशसंबद्धं शास्त्रकार्यान्तरेस्थितम् ।
आहुः प्रकरणं नाम ग्रन्थभेदं विपश्चितः ।।
इति लक्षणसंबन्धो विद्यतेऽत्र यतो ध्रुवम् ।। १२

उपासनाः क्रियारूपाः श्रुत्यन्तेषु तथाकरे
दृश्यन्तेहि तथाप्येषां वेदान्तत्वं यथा ध्रुवम् ।। १३

यथा चान्यनिबन्धेषु बहुष्वप्यन्यगोचरः
विचारो दृश्यते तद्वद्भवत्वत्रापि न क्षतिः ।। १४

स सैन्धवेऽपि मौद्गे हि सूर्यमौद्गतवद्ध्रुवम्
श्रुत्यन्तस्य निबन्धत्वं निबन्धस्यास्य गम्यताम् ।। १५

तत्तदीयैरनुबन्धैरिदं स्यादनुबन्धवत्
तदीयाः कोऽनुबन्धाः स्युरिति चेत्वमवेहि तान् ।। १६

स्यादत्रोपनिषन्नाम छन्दसां काण्ड उत्तरः ।
वेदान्तस्तदनुग्राही सूत्रभाष्यादिकं तथा ।। १७

अधिकारी सविषयः संबन्धः सप्रयोजनः
अनुबन्धा इति ख्याताश्चत्वारः सन्ति शास्त्रगाः १८

अधीतवेदवेदाङ्गो ह्यायातब्रह्मबोधवान्
बहुजन्मार्जितैः पुण्यैः सम्यगाराधितेश्वरः ।। १९

ब्रह्मनित्यमनित्यं तु जगदेवं विवेचकः
ऐहिकामुष्मिकेभ्यश्च भोगेभ्यो विरतः सदा ।। २०

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

यत्नेन मनसो नित्यं विषयेभ्यो निवर्तकः
तेभ्यो बाह्येन्द्रियाणां च बलादाकर्षकः सदा ।। २१

उभयेषां निवृत्तानां तथास्थापनयत्नवान्
शीतोष्णसुखदुःखानां तथा मानापमानयोः ।। २२

सहिष्णुः श्रवणादौ च सर्वदैव समाहितः
गुरुवेदान्तवाक्येषु केवलाद्वैतवृत्तिषु ।। २३

दृढविश्वासवान् धीरः सत्यवादीदयानिधिः ।
अहं बद्धो विमुक्तः स्यां कथमेवं विचिन्तकः ।। २४

वेदान्तेष्वधिकारी स्याद्वेदान्तज्ञैर्विनिश्चितः
तद्विषयस्तु जीवस्यात्यन्ताभेदः परात्मना ।। २५

तत्रैव तस्य तात्पर्यं नान्यत्रैवं विनिश्चितैः
स एव विषयस्तस्य न्यायविद्भिर्विनिश्चितः ।। २६

तत्परःशब्द इत्यादेर्न्यायादर्थव्यवस्थितिः
गंगायां घोष इत्यादिर्लौकिकेष्वपि दृश्यते ।। २७

प्रयोजनवति श्रुत्यास्तात्पर्यं च विनिश्चितम्
स्वाध्यायस्य विधेर्नूनं विरोधो ह्यन्यथाभवेत् ।। २८

तच्च प्रयोजनं ब्रह्माद्वैतज्ञानेनसिद्ध्यति
ब्रह्मविद्भवति ब्रह्मेत्यादि शास्त्रानुशासनात् ।। २९

न भेदे तस्य तात्पर्यं सिद्धत्वादन्यमानतः
प्रयोजनविहीनत्वान्निन्दितत्वाच्च सर्वथा ।। ३०

मृत्योः स मृत्युमाप्नोति योऽत्र नानेव पश्यति
अल्पमप्यन्तरं कुर्वन्बिभेतीति श्रुतौश्रुतम् ।। ३१

प्रधानादौ न तात्पर्यं श्रुतेः किन्त्वन्तरात्मनि
उपक्रमोपसंहारमुखैर्लिङ्गैर्विनिश्चयात् ।। ३२

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

मतान्तरनिरासेन एतदर्थप्रपञ्चनं
भविताग्रे तदेतस्य विस्तरादुपरम्यते ।। ३३

प्रतिपाद्यस्य चैक्यस्य जीवात्मपरमात्मनोः
वेदान्तानां च संवन्धं बोध्यबोधकतां विदुः ।। ३४

तेषामेकत्वबोधेनोत्पाद्योत्पादकतां तथा
प्रयोजकप्रयोज्यत्वं संबन्धः शास्त्रमोक्षयोः ।। ३५

हेतुमद्धेतुभावश्च संबन्धोमोक्षबन्धयोः
संबन्धोऽभिहितोऽभिज्ञैरुक्तभेदैश्चतुर्विधैः ।। ३६

अद्वैतावरकस्यास्य मूलाज्ञानस्यबाधनं
सविलासस्य संप्राप्तिश्चानन्दस्य प्रयोजनम् ।। ३७

कल्पितस्य निवृत्तिश्च नाधिष्ठानातिरेकिणी
रज्जुसर्पनिवृत्तिर्हि न रज्जोरतिरिच्यते ।। ३८

प्रत्यगात्मतया तस्य प्राप्तत्वेऽपि च सर्वदा
कण्ठचामीकरन्यायात्तत्प्राप्तिरुपचर्यते ।। ३९

ब्रह्मैव सन्नयं ब्रह्म प्राप्नोतीति श्रुतौ श्रुतम्
विमुच्यते विमुक्तश्च निवृत्तश्च निवर्तते ।। ४०

अक्के चेन्मधु विन्देत किमर्थं पर्वतं व्रजेत्
इष्टस्यार्थस्य संप्राप्तौ को विद्वान्यत्नमाचरेत् ।। ४१

इति न्यायं समाश्रित्य दुर्दुरूढ दुरुक्तयः
यास्ताः सम्यङ् निरस्ता स्युः श्रुतिन्यायसमाश्रयात् ।। ४२
अनाद्यविद्यया तस्यावृत्तेः सोऽप्राप्तवद्भवेत्
विद्यया तन्निवृत्तेस्तु प्राप्त इत्युपचर्यते ।। ४३

स्वाधिष्ठानातिरेकेण न सत्ताकल्पितस्य वै
विद्यया तन्निवृत्तिस्तूपचारादिति निश्चितम् ।। ४४

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

स्वबाहौ कल्पमानस्य भुजंगस्य निवर्त्तनम्
न दृष्टं वस्तुतो लोके दण्डाद्यैर्बाह्यसर्पवत् ।। ४५

अतश्च द्विविधेऽपि स्यादैकरूप्यं प्रयोजने
आत्मरूपेण संस्थानं ततः सिद्‌धं प्रयोजनम् ।। ४६

संक्षेपेणानुबन्धा हि श्रोताः प्रोक्ताः यथामति
तदनुग्राहि सूत्रादेस्त एवैवं विनिश्चिनु ।। ४७

तथा तस्य निबन्धानामनुबन्धास्त एवहि ।
अस्याप्येतन्निबन्धत्वादनुबन्धा भवन्तिते ।। ४८

अत्र सर्वत्र निबन्धपदं प्रकरणपरम् ।

ननु किमिदं सूत्रादेः श्रुत्यनुग्राहित्वं तदर्थावबोधहेतुत्वमिति चेन्न। तत एव तत्संभवेन तद्वैयर्थ्यात् अन्यथा विषयासिद्धेर्विचारानुपपत्तेः स्वीकृत्येदमुक्तम्। वस्तुतस्तु वेदान्तविषय एव न संभवति जीवब्रह्मैक्यस्य तद्विषयत्वाद्विरुद्धधर्मकयोश्च तयोस्तदयोगादिति। उच्यते। यद्यपि वेदान्तेभ्य एव तदर्थप्रमा जायते तथापि तेषां परपरिकल्पितार्थान्तरपरत्व संशयादसंभावनादि पुरुषदोषप्रतिबन्धवशाच्च प्रमासामग्र्या जायमानापि सा त नाविद्यानिवर्तनक्षमा। किन्तु मज्जनोन्मज्जनन्यायेना प्रतिष्ठितेव भवति। अतस्तादृश प्रतिबन्धनिरासेन प्रमाणजन्यायाः प्रमितेः स्वविषयप्रतिष्ठत्वस्थिरीकरणाय विचारशास्त्रमारंभणीयम्। यत्तु विरुद्धधर्माक्रान्तत्वाज्जीव ब्रह्मणोरैक्यासंभव इति। तन्न। विरोधस्य भेदाधीनतया तदसिद्धावसिद्‌ध्यद्वैतवादिनः प्रति स्वरूपासिद्धेः अनुमानेन श्रुतिबाधायोगाच्च। किञ्च सर्वमानोपजीव्यप्रत्यक्षविरोधेऽ प्यागमस्यैव प्राबल्यमित्युत्सर्गः। तथा च तत्पादोपजीवितोवराकस्यानुमानस्य का कथा। तथा च स्मृतिः। "प्राबल्यमागमस्यैव जात्या तेषु त्रिषु स्मृतमिति"। तथा च। न विषयविचारयोरसिद्धिरिति सिद्धम्। नूतनतार्किकोत्थापितकुतर्कनिराकरणेन मन्दानवगाह्यभाष्याद्युक्तितात्पर्यवर्णनेन च प्रकरणानां साफल्यम्। अस्य तु प्रकरणान्तरैस्तुल्यावान्तरविषयादिमत्त्वेऽपि सर्वशास्त्रेतिहासपुराणसाहित्यव्याकरणकाव्यनाटकाख्यायिकादिषु वर्तमान दुरवगाह्य लौकिकन्यायनिचयार्थ विषयाद्युद्‌घाटनेन सर्वोपकारित्वादवश्यारभ्यत्वं परमविषयादयो यद्यपि प्रकरणानां शास्त्रीया एव। तथापि प्रकरणत्वादेवावान्तरविषयादयः सन्त्येव। तथापि तत्र सारं जिघृक्षुरवान्तराधिकारीसगुणनिर्गुण रूपविषयभेदं विहाय निर्गुणमात्रमिह विषयः शास्त्रैकदेश

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

संबद्धमित्यंशेन, संगृहीतः। तन्मात्रावधारणमतिगूढशास्त्रतात्पर्योद्धाटनम्। न च तार्किकोद्भावित शास्त्रतात्पर्य परिपन्थि कुतर्कनिराकरणं चावान्तरप्रयोजनं शेषेण संगृहीतम्। संबन्धस्तु विषयानुरूप इत्यलं प्रपञ्चेन। अथ व्याख्येयन्यायव्याख्यानमारभ्यते। तत्र तावन्न्यायसप्तके प्रायस्त्वं पदार्थशोधनम्। ततोऽष्टमे "वृक्षप्रकम्प"न्यायेन तत्पदार्थशोधन पुरः सरं वाक्यार्थनिरूपणं भविष्यति। "स्थूणानिरवन" "सिंहावलोकन" न्यायाभ्यामुक्तार्थदाढ्र्याय तद्विरुद्ध मतान्तरनिरासाय चोत्तरग्रन्थप्रवृत्तिः। यत्रातिसूक्ष्मार्थज्ञापनाय क्रमेण तत्समीपः समीपतरः समीप तमश्चार्थस्तत्तयोच्यते तत्र "स्थूलारुन्धती"न्यायो अवतरते। यथा ध्रुवमरुन्धतीं च दर्शयतीति विधिबलाद्वरवध्वोः तद्दर्शने प्राप्तेऽतिसूक्ष्मायाः तस्या झटिति दर्शयितुमशक्यतया तावच्चन्द्रं तत्वेन वदन्ति। ततश्चन्द्रेतरास्तत्समीपस्थास्तारकास्ततः सप्तर्षिसंज्ञकाः समीपतराः ततः समीपतमं वसिष्ठं तत्त्वेनोक्ता तामेव तत्तया बोधयन्ति तथा गृहादीनामात्मतया मन्यमानाः प्राकृता गृहेनष्टे "नष्टोऽहमिति क्रोशन्तो दृश्यन्ते। तान्वारयन्ती श्रुतिः "आत्मा वै जायते पुत्र" इति तावत्पुत्रमात्मत्वेन वदति। ततोऽस्ये धीः पुत्रात्मत्वे मा पर्यवस्यत्विति। 'स वा एष पुरुषोऽन्नरसमय' इति देहमात्मानं वदति। ततो देहमेवात्मानं न जानीयादिति तात्पर्यवती श्रुतिस्तेह प्राणां प्रजापतिं समेत्य ब्रूयुरित्यादिना श्रोत्रादीनां चेतनतां सूचयन्ती तदविनाभूतमात्मत्वं सूचयति। तथैव पुनरन्योऽन्तर आत्मा प्राणमयः इति प्राणात्मत्वं ब्रूते। इन्द्रियात्म निरासः कुत इति चेदसंभवादिति गृहाण तत्समुदायस्यात्मत्वे एकाभावे देहस्य निरात्मत्वापत्तिः न च कस्यचिन्नाशे अवशिष्टस्य वृन्दस्यान्यत्वेऽपि कस्यचित्तन्तोर्नाशे अप्यवशिष्टतन्तुवृन्दे स एवायं पट इति वदति, साम्यात्प्रत्यभिज्ञान विरुध्यते पारिषदन्यायेन च तत्कार्य निर्वाहोऽपीति शङ्क्यम्। उत्तरवृन्दस्य पूर्वस्माद्भिन्नतया पूर्वेणानुभूतस्य उत्तरेणास्मरणापत्तेः "नान्यदृष्टं स्मरत्यन्य" इति न्यायात्। एकस्य कस्यचिदात्मत्वं तु विनिगमनाविरहेणाशक्यं वक्तुं तेषां प्रत्येकं भोक्तृत्वे स्वातन्त्र्ये च बहूनामैकमत्यासंभवेन च विरुद्धदिक् क्रियया 'बहूवृकाकृष्टमृग'न्यायेन देहोन्माथनप्रसंगः। न च 'वरगोष्ठी' न्यायेनैकमत्यम्। कदाचित्तत्सत्वेऽपि सदा तदसंभवात्। एकस्य प्राधान्योपगमे तु तस्यैवात्मत्वं युक्तम्। स्वामिभृत्यभावस्य देहभेद व्याप्तत्वात्। तदैक्ये स्वामिभृत्य न्यायस्याप्रवृत्तेः। तस्माद्युक्ता श्रुत्या तेष्वात्मत्वधी निरासाय प्राणस्यात्मत्वोक्तिः। प्राणेऽपि तन्निरासाय 'अन्योऽन्तर आत्मा मनोमय' इति वदति। एवमन्योऽन्तर आत्मा विज्ञानमयोऽन्योऽन्तरआत्माऽऽनन्दमय इप्यादावपि बोध्यम्। ततः पुत्राद्यानन्दमयान्तानामनात्मत्वं दर्शयन्ती श्रुतिर्निर्विशेषात्मतत्वमेव आत्मत्वेन दर्शयति। तथा हि कश्चिद्धीरः प्रत्यगात्मानमैक्षत "अस्थूलमनण्वह्रस्वमदीर्घमचक्षुरश्रोत्रं अप्राणो ह्यमनाः शुभ्रः अनन्तश्चात्मा विश्वरूपो ह्यकर्ता न चास्ति वेत्ता मम चित्सदाहं चिन्मात्रोऽऽहं सदाशिवः। एष न आत्मा सर्वान्तर इत्यद्यः

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

श्रुतयोऽ नादि भावानुवर्तमान चार्वाकादि भ्रमसिद्धस्य प्रकृतन्यायेन शूद्धाद्वैतत्वे मुमुक्षु धी निवेशाय पूर्वोक्त श्रुत्या भासानूदितस्य पुत्राद्यात्मत्वस्यबाधं पूर्वकमात्मतत्वं प्रतिपादयन्ति। किञ्च पुत्रात्मत्वश्रुतेः गौणत्वं स्पष्टमेव भेदप्रसिद्धेः। 'ते ह प्राणा' इत्यादि श्रुतौ तु प्राणादिशब्दास्तत्तद्देवतापरा इति स्पष्टमाकरदृशां अन्नमयाद्यानन्दमयान्तश्रुतेः मुञ्जादिषीकोद्धरणन्यायेन सर्वान्तर ब्रह्म पुच्छशब्दार्थ सर्वबाधावधिभूतात्मतत्व प्रतिपत्त्युपायार्थत्वेनोपन्यस्तत्वान्न तस्य स्वार्थपरत्वम्। प्रत्यगात्मादि श्रुतीनां तूपक्रमादिलिङ्गैः स्वार्थ परत्वात्प्राबल्यं प्रयोगश्च पुत्राद्यानन्दमयान्तं जगदनात्मा दृश्यत्वात् घटवदिति/आत्मा स्वेतरचैतन्यभास्यः पदार्थत्वादित्याद्यनुमानं त्वन्यदेवतद्विदितादित्यादि श्रुति बाधितं ज्ञानेनैकान्तिकत्वं च/ज्ञानमपि वेद्यं चेत् स्ववेद्यत्वे आत्माश्रयः। परवेद्यत्वे अनवस्था। अस्तु को दोषो मूलक्षयाभावात्। न यदेव न ज्ञायते तदेवासत् संपद्यते/एवं तद्वेद्यमपीति 'सर्वेषां गडलिकाप्रदाह' न्यायेनाप्रामाणिकत्व प्रयुक्ता सत्वलक्षणांधकूपपतनं स्यात्। ततश्च कथं न मूलक्षय प्रयुक्तो जगदांध्यरूपो दोषः इत्यलम्। तस्माद्देहादीतरस्तत्साक्षी वेदान्तैः प्रकृतन्यायेन बोध्यते इति सिद्धम्।।

पञ्चकोशावतरणन्यायस्तु श्रुतिमात्रसिद्धत्वान्न। लौकिक एतत्तुल्यविषयप्रयोजनश्च। तथा हि ये स्थूलदेहादयः श्रुत्या अन्नमयादि शब्दैरुक्तास्ते कोशवत्क्रमेरात्मानन्दस्यावरकतया क्लेशहेतुत्वात्कोशा इत्युच्यन्ते। तत्र पञ्चीकृतभूतोत्पन्नः स्थूलदेहोऽन्नमयः कोशः, पञ्चीकरणं त्वचिन्त्यशक्तिरीश एकैकं भूतं द्विधा विधाय तेषु पञ्चभागान् प्रत्येकं चतुर्धा विधाय तेषां स्वस्वद्वितीयभागान्यस्थूलभागेषु योजयति।एवं च ते प्रत्येकं पञ्च पञ्चात्मका भवन्तीति। तेषु वियदादिव्यवहारस्तु मल्लग्राम न्यायेन स्वांशाधिक्यात्। ननु पुराणोक्तं तारतम्यं दशांशैः भूतपञ्चक इत्यार्योक्तेस्तन्मूलेतिहासादेश्च व्योमादिदशमांशसाम्यं वाय्वादेरिति गम्यते। तथा चाकाशस्याष्टमांशस्यापि वाय्वादिसर्वांशापेक्षयाप्याधिक्यात् सर्वत्र तद्यद्व्यवहार एक स्यादिति उच्यते। न्यूनाधिकभावो हि ब्रह्माण्डावेष्टन भूत भूतेष्वे व नान्तर्गतेषु, अनुपलंभात्। यथाहुः ब्रह्माण्डावरणेष्वेषां न्यूनाधिक विचारणेति। तानि चापञ्चीकृतान्येवेति वासिष्ठादौ प्रथितम् यथा च स्वांशाधिक्यात् तत्तद्व्यवहारयोग्यानि स्युस्तथैव मेलितानि, यत्तु क्वचित्समं विभज्येति पाठः। तत्र सममिति संपातापातं यद्वा समं तत्तदंशाधिक्यात्तत्तद्व्यवहारयोग्यं यथा स्यात्तथेति समर्थनीयम्। एवं हि व्योम्नि शब्दोऽभिव्यज्यते वायौ स्पर्शोऽपि। एवमग्रेऽपि बोध्यन्ते। न च सर्वत्र सर्वे कुतो नाभिव्यज्यन्तेऽभिव्यञ्जकस्य पञ्चीकरणस्य साम्यात् तस्य प्राग्विद्यमान गुणाभिव्यञ्जकत्वाङ्गीकारात्/न चैवं सर्वत्र एकैकगुणाभिव्यक्तिरेव स्यात्/कार्यो कारणगुणानुवृत्तिस्वीकारेण

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

व्योमादिषु क्रमेण एक द्वित्रि चतुः पञ्चीकरणोपलक्षणत्वात्तस्याप्रामाणिकत्वं तेभ्यश्च स्थूलदेहादयो जायन्ते। ते च नहि त्रि पुत्रो द्विपुत्र इति कथ्यते इति न्यायेन पाञ्चभौतिका उच्यन्ते। प्रचुरभागस्य भूतस्य प्राधान्यविवक्षायां देवदत्त पुत्रन्यायेन भौमादि व्यवहारभाजो भवति। अवकाशादिरूपकार्योपलंभाच्च कार्येण कारणसम्प्रत्यय इति न्यायेन एकदेहे कारणतया पञ्चीभूतसत्तावधार्या। सा चैकानेकत्व ज्ञानगोचरतया वनवत्समष्टिर्वृक्षवद्व्यष्टिश्च भवति। यद्वा व्यक्तिषु जातिवत्सर्वव्यष्टिष्वनुस्यूतमण्डात्मकं समष्टिः प्रत्येकं शरीरं व्यष्टिः एतदुपहितं चैतन्यं विश्वनराभिमानित्वाद्विविधं राजमानत्वाच्च वैश्वानर इति 'विराडिति' चोच्यते। व्यष्ठ्युपहितं विश्वशरीर प्रविष्टत्वाद्विश्वः। तथा हि जीवस्य त्रय उपाधयः, सुप्तौ बुद्ध्यादि संस्कारोपरञ्जितमज्ञानमात्रमुपाधिः। स्वप्ने लिङ्गशरीरं, तच्चाज्ञानोपरञ्जितमह इति प्रतीतेः। जागरे तूभयशरीरसंसृष्टं स्थूलशरीरम्। 'पीनोऽहं निश्चिनोम्यज्ञोऽहमित्यनुभवात्। एतदेवान्नविकारत्वादन्नमय इत्युच्यते। न च पूर्वोत्तरविरोधः। पञ्चीकृताया भुव एवान्नाकारेण परिणतत्वात्तद्धेतोरेव तदस्तु किं तेनेति न्यायेन पाञ्चभौतिकत्वानपायात् तमः प्रधानाज्ञानोपहित चैतन्याद्व्योमादयो जायन्ते। तेषु कारणगुणप्रक्रमन्यायेन सत्वादयो जायन्ते। तत्रतद्भूतरजोंऽशेभ्यो मिलितेभ्यः प्राणो जायते। स चैकोऽपि स्थानभेदात् प्राणापानादि संज्ञां लभते। ननु व्योमवद्देहे वृत्ति लाभमात्रेणावस्थितो बाह्यवायुरेवास्तु पञ्जर चालनन्यायेन वागादीनां सामान्यवृत्तिरूपा क्रिया वास्तु; किं विशेषकल्पनागौरवेण, धर्मिकल्पनातो धर्मकल्पना वरीयसीति न्यायादिति चेन्न। एतस्माज्जायते प्राण इति श्रुतौ वायोरिन्द्रियाणां च प्राणात्पृथङ् निर्देशात्। तथा च न्यायः न वायुक्रिये पृथगुपदेशादिति। व्यस्तेभ्यस्तु क्रमेण वागादीनि जायन्ते। तत्सहितः प्राणः प्राणमयकोशो भवति। तत्सात्विकांशेभ्यो मिलितेभ्योऽन्तः करणं जायते। तच्च मनोबुद्धाख्यवृत्तिभेदाद्विविधम्। व्यस्तेभ्यश्च तेभ्यः क्रमेण श्रोत्रादीनि जायन्ते। तैः सहिते मनोबुद्धी मनोमय विज्ञानमयकोशावुच्येते। एतत्कोशत्रयमिलितं सप्तदशावयवं सूक्ष्मशरीरमिति लिङ्गमिति चोच्यते। अत्रापि समष्टित्वव्यष्टित्वव्यवहारः पूर्ववन्मतभेदेन ज्ञेयः। तत्र समष्ट्युपहितचैतन्यं हिरण्यगर्भ इत्युच्यते। व्यष्ट्युपहितं तु तैजस इति। अनिर्वचनीयं ज्ञानबाध्यं भावरूपं त्रिगुणात्मकमज्ञानम्। तदेव जीवेशावभासेन करोति माया चाविद्या च स्वयमेव भवति इति श्रुतौ मायादि शब्देनोच्यते। तत्र शुद्धसत्वप्रधानं सन्मायेत्युच्यते। मलिनसत्वप्रधानं त्वविद्येति। सा च प्रियमोदादि सहितानंदप्रचुरत्वादानन्दमयो बन्धहेतुत्वात् कोशः स्थूलसूक्ष्मदेह-कारणत्वात्कारणशरीरमिति चोच्यते। तदुपहिताचित्प्राज्ञ इत्युच्यते। मायोपहिता त्वीश इत्येतयोरैक्यमग्रे वक्ष्यामः। कोशानामनात्मत्वे तु पूर्वा एवायुक्तयोऽनुसन्धेयाः

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

संघातानात्मत्वमपीन्द्रियवृन्दानात्मवान्निश्चेयमिति दिक् इति स्थूलारुन्धतीन्यायः।१।

Gandhi Memorial College Of Education Bantalab Jammu

अत्रादितश्चारभ्यैतावद्ग्रन्थ सन्दर्भे प्रसङ्गाद्ग्रन्थान्तरेष्विव ये न्यायाः, पठितास्ते पाठक्रमेणैव लिख्यन्ते। संगतिस्तु मुख्येष्वेव। यथास्य भिक्षुपादप्रसारणन्यायेन अतिदेशसंगतिः प्रासङ्गिकेष्वपि यस्यान्यस्य संगतिर्भविता तस्याप्यर्थमात्रं वदिष्यामः एवमग्रेऽपि बोध्यम्। यश्चार्थादर्थो न स चोदनार्थ इति न्यायः। शबरस्वामिवचनमिदम्। अस्य यः श्रुतार्थनान्तरीयकरतया लभ्यते न स वेदार्थ इत्यर्थः। लोकसाधारण्याय न शब्दार्थ इति पठ्यते। अनन्यलभ्यः शब्दार्थ इत्यप्येतादृशः ।२। यत्परः शब्द इति योऽर्थः परस्तात्पर्यविषयो यस्य स यत्परः स्पष्टमन्यत् ।३। कण्ठचामीकरन्यायः। यथा कण्ठगतं हेमभूषणमज्ञानादप्राप्तमिव कंठे तं पश्येत्युपदेशात् ज्ञातं प्राप्तमित्युपचर्यते तथा प्रकृतेऽपीत्यर्थः ।४। अक्के चेदिति न्यायः ।अक्के गृहकोणे स्पष्टमन्यत् ।५। मज्जनोन्मज्जनन्यायः यथा नद्यादौ पतितस्मरणानभिज्ञः कदाचिन्मज्जति कदाचिदुन्मज्जति तथेत्यर्थः ।६। यदा तत्रापतितः सोऽन्यदालंबनमलभमानो व्याकुलचित्तः कुशकाशादीनालंबते तदा कुशकाशावलंबनन्यायः। अनेन हि दृढासुयुक्तिषु निरस्तासु निर्वलायुक्तीरवलंबमानोऽलमनेने (ति) कुश काशावलंबनन्यायेनेति निरस्यते ।७। यथा पंकलिप्ता तुंबिकानदीसमुद्रादौ मज्जती पंकक्षयेवकाशे आगत्य तिष्ठति तथा जीवो देहक्षयेऽलोकाकाशे गत्वा तिष्ठति अयमेव तस्य मोक्ष इति दिगंबराः इति जलतुंबिकान्यायः ।८। तदैकदेशिनस्तु पञ्जरमुक्तपक्षिन्यायेन सदोर्द्धगमनमेव तस्य मोक्षं मन्यन्ते ।९। विक्षेपवहुलं धावनमेव पुरुषार्थं मन्यमाना बालैरप्युपहसनीया इत्यलमुन्मत्त वचसि काव्यदूषणादानेनेति न्यायेन नेह निरस्यन्ते ।१०। जीवः स्वाविद्यादिभिर्देहान्तरं निष्पाद्यैव पूर्वं त्यजतीति विवक्षायां तृणजलूकान्यायः सापि तृणान्तरमाश्रित्यैव पूर्वं त्यजति ।११।

एकसंबन्धिदर्शनमपरसंबन्धिस्मारकमिति न्यायेन मज्जनोन्मज्जनन्यायादनंतरा न्यायाः स्मृत्वोदाहृताः। हस्तिपकदर्शनस्य हस्ति स्मारकत्ववन्नद्यादि ज्ञानस्य तत्संवन्धिकुशादि स्मारकत्वं इतरन्यायद्वयेपि पञ्जरमुक्तेत्यस्य तथैवोदाहरणम्। द्वितीयस्यत्वाक्षेप संगत्यो दाहृतिः ।१२। स्थूणानिखननन्यायः-स्थूणा यथाऽसकृत्संचाल्य निखनने क्रियमाणे दृढा भवति तथोत्तरग्रन्थेन प्रागुपपादितार्थदाढर्यं भवतीत्यर्थः ।१३।। सिंहावलोकनन्यायः।। सिंहो यथा कंचिन्मृगं हत्वाग्रे गच्छन्नन्योऽपि चेत् स्यात्तमपि हन्यामिति धिया पश्चात् पश्यति हन्ति च दृष्टिपथमागतं तथा बुद्धिपथमागत स्वपक्षपरिपन्थिपरपरिकल्पित युक्त्याभासान्तर निरासायाप्युत्तरग्रन्थप्रवृत्तिरिति अर्थः ।१४।। पारिषदन्यायः।। यथा पारिषदानामेकस्मिन् मृतेऽप्यवशिष्टैस्तत्कार्यनिर्वाहस्तथेत्यर्थः ।१५।। नान्यदृष्टमिति।। १६।। बहुवृकाकृष्टेतिस्पष्टौ।। १७।। बहुराजकपुरन्यायोऽप्येतादृशः।।
१८। [illegible] यथा [illegible]

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

सति विवाहरूपमेकं कार्यं निष्पाद्यते तथेत्यर्थः ।१९ ।। स्वामिभृत्यन्यायः ।। २० ।। मुञ्जादिदिति न्यायः ।। मुञ्जाख्यतृणादिषीकाख्यं गर्भस्थं मृदुतृणं यथा बहिरावरकतया स्थितानां मुञ्जाख्यतृणानां विभजनेन समुध्रियते तथेत्यर्थः ।२१ । गडेलिका प्रवाहन्यायः ।। गंड्डुलिका नाम वीनांगणादेका चेत्कूपे पतिता तदा वार्यमाणा अपि सर्वास्तत्र पतन्तीति प्रसिद्धम् । २२ ।। एतादृश एव अन्धपरम्परान्यायः ।। सोप्यूर्द्धमूख्यनवस्थास्थले एवोदाह्रियते ।२३ ।। वटयक्षन्याये यदि वक्तृपरम्परोरदेशस्य मूलभूतोनुभवो नास्ति तदा सोऽप्येतादृशः सत्वे तु विलक्षण इति बोध्यम् ।२४ ।। मल्लग्रामन्यायः ।। यथान्येषु सत्स्वपि मल्लानां बहुत्वान्मल्लग्राम इत्युच्यते तथेत्यर्थः । २५ ।। एतेन ब्राह्मणग्रामाम्रवनादयोऽपि न्याया विवृताः २६ ।। नहि त्रिपुत्र इति स्पष्टार्थः ।२७ ।। देवदत्तापुत्रन्यायः- नहि देवदत्ताया एव पुत्रो भवति किन्तु देवदत्तस्यापि । तथापि मातुः प्राधान्यविवक्षायां देवदत्तापुत्र इत्युच्यते ।२८ ।। पितुः प्राधान्यविवक्षायां देवदत्तापुत्र इत्युच्यते ।२८ ।। पितुः प्राधान्यविवक्षायां तु देवदत्तपुत्रन्यायेनेत्युदाह्रियते । ३० ।। अत्रैव प्रासादवासिन्यायोऽवतरति । एक एव देवदत्तः कालभेदेन प्रासादोपर्य्यधश्च वसन्नपि प्रासादवासप्राधान्येन प्रासादवासीत्युच्यते ।३१ ।। कार्येण कारणसंप्रत्ययः इति न्यायः ।। ३२ ।। तद्धेतोरेव तदस्तु किं तेनेति न्यायः । तस्य कपालादेर्हेतोर्मृदादेरेव तस्य घटादेः कारणत्वमस्तु किं तेनान्तर्गड्डुना कपालादिरूपकार्येणेत्यर्थः ।३३ ।। कारणगुण प्रक्रमन्यायः- कारणगुणाः कार्ये स्वसजातीय गुणानारभन्ते । यथो तन्तुरूपादयः पटरूपादीनिति न्यायार्थः । ३४ ।। पञ्जरचालनन्यायः ।। यथा स्वयत्नैः दशभिः पक्षिभिरेकक्रियोत्पादनेन पञ्जरचालनं क्रियते तथा दशभिरिन्द्रियैः प्राणरूपैकक्रियोत्पादनेन देहचालनं क्रियतामित्यर्थः । "नवायुक्रिये" इत्यधिकरणपूर्वपक्ष न्यायोऽयम् । ३५ । धर्मि कल्पनात इति स्पष्टः धर्मकल्पनायाः श्रेष्ठत्वं च लाधव प्रयुक्तम् ।३६ ।। संभवत्येकवाक्यत्वे वाक्यभेदो हि नेष्यत इति न्यायेऽपि तथा बोध्यम् । ३७ ।। प्रकृतमनुसरामः एतेन भिक्षुपादप्रसारण न्यायोऽपि व्याख्यातप्रायः । विषयोदाहरणसाम्यात् अर्थसंगती तु यथा कश्चिद्भिक्षुर्यथेष्टान्नाच्छादन वासगृहादि लाभाय धनाढ्यगृहे प्रविष्टो युगपत् तल्लाभं दुर्लभं मन्वानः पूर्वमिह पादप्रसारस्तु मे भवतु पश्चात् परिचयं संपाद्य क्रमेण सर्वे साधयिष्यामीति धियाल्पां भिक्षां स्वीकरोति तथा मा ते वातिहितैषिणी श्रुतिरद्वैततत्त्वे मुमुक्षु मतिप्रवेशमिच्छन्ती सकृत्तमशक्यं च मन्यमाना पूर्वोक्तक्रमेण संसारमुक्तये तद्बोधयतीति बोध्यम् ।३८ ।। सोपानारोहणन्यायोपीह बोध्यः । यथा प्रासादमारुरुक्षुर्युगपदारोढुमशक्नुवन् पूर्वां पूर्वां कक्षां परित्यजन्नुत्तरां चारोहन् क्रमेण प्रासादमारोहति तथा स्वात्मभूतमपि ब्रह्माज्ञानाद्व्यवहितमिवापन्नमात्मत्वेन ज्ञातुकामः सहसाज्ञातुमशक्नुवन्नुत्तरोत्तरात्मत्वबुद्ध्या पूर्वपूर्वा [illegible] जानातीति ।३९ ।।

CC-0 Agamnigam Digital Preservation Foundation, Chandigarh. Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

'तस्माद्वा एतस्मादात्मन आकाश' इत्यादावध्यारोपेण यस्माद्यस्योत्पत्तिरुक्ता तदतिरेकेण तदभावो यत्र संभाव्यते तस्मिंस्तस्य लयो बोध्यते तत्र सोपानावरोहण न्याय प्रवृत्तिः। यथा येन क्रमेण सोपानमारोहन्ति तद्विपरीतक्रमेण ततोऽवरोहन्ति। तथा पूर्वोक्त पञ्चकोशावतरणन्यायेन तत्त्वे बुद्धिमारोहयितुम् अशक्तो भोग्यभोगायतन तदाश्रय चतुर्दश भुवन तदाधार ब्रह्माण्डानि पञ्चीकृतपञ्चभूतेभ्यो नातिरिच्यन्त इति संभावयेत्। तानि च सह सूक्ष्मशरीरैरपञ्चीकृतभूतेभ्यः एवं गन्धतन्मात्रिकां पृथिवीं रसतन्मात्रात्मकामात्रतया भावयेत् अपश्च रूपतन्मात्रात्मकतेजोमात्रत्वेन, तच्च स्पर्शतन्मात्रात्मकवायुमात्रत्वेनेति। तं च शब्दतन्मात्रात्मकाकाशमात्रत्वेन, तं च महेश्वरमात्रतया भावयेदिति। एवं च यथा पूर्वोक्तक्रमेणावरोहणात् सुखेन भूमिमेति। तथा तेन क्रमेण भावनात् सुखेन भूमानमद्वितीयं शिवमेति प्रलयोऽप्यनेनैव क्रमेण बोध्यः। साक्षात्प्रकृतौ विकारलय इति न्यायात् जगत्प्रतिष्ठादेवर्षे पृथिव्यप्सु प्रलीयते, ज्योतिष्यापः प्रलीयन्ते ज्योतिर्वायौ प्रलीयते, वायुश्च लीयते व्योमिन, तच्चाव्यक्ते प्रलीयते, अव्यक्तं पुरुषे ब्रह्मणि निष्कले संप्रलीयते इति स्मृतेश्च। वार्त्तिककारैर्विश्वादीनामपि विलापनक्रम उक्तः। अकारं पुरुषं विश्वमकारे प्रविलापयेत्, मकारं कारणं प्राज्ञं चिदात्मनि विलापयेत् इत्यत्रापि तदतिरेकेण तदभावभावनैव विलापनम्। एषामनेनैव क्रमेण प्रलये उपाधिलय प्रयुक्तो लयोऽपि बोध्यः। चिदात्मनोऽपि कुत्रचिद्विलापनं लयश्च स्यादिति शंकां वारयति श्रुतिः। "पुरुषान्नपरं किञ्चित् सा काष्ठा सा परा गतिरिति" ।४/४० ।।

साक्षात्प्रकृताविति न्यायोऽत्र प्रासंगिकः। घटादेर्लयो हि कपालादावेव भवति न तु परमाणुषु। तथैवानुभवादिति तदर्थः। ५/४१ ।। एतेनाध्यारोपापवादाभ्यां निष्प्रपञ्चं प्रपञ्चते इति न्यायोपि व्याख्यातः। आद्यन्यायत्रयेणाध्यारोपस्य चतुर्थेनापवादस्य च प्रतिपादनात् ।५.४२ ।। रेखांगवयन्यायोऽप्येतादृशः। कीदृशो गवय इति ग्रामीणेन पृष्टो वन्यो लिखित्वा दर्शयामास च ऋजुबुद्धित्वाद्रेखां गवयमेव गवयं मेने, पश्चाद्वने गवयं दृष्ट्वा रेखायां तद्बुद्धिं तत्त्याजेति लौकिकी गाथा। तथैष पुरुष इत्यादि श्रुतेः पूर्वोक्ततात्पर्यानभिज्ञोऽनात्मानमेव आत्मतया जानीते गुरुशास्त्रोपदेशेनात्मनि ज्ञाते तदात्मबुद्धिमपवदति।।६.४३

शाखाचन्द्रन्यायोऽपीदृशः। यथा चन्द्र दिदर्शयिषुः आप्त आदौ दिगन्तरगत नक्षत्रादिभ्यो दृष्टिं वारयितुं शाखायां चन्द्र इत्यधिकरणत्वेन संबन्ध विशेषणादौ शाखामुपलक्षणमुपादत्ते/ ततश्च दिगन्तर व्यावृत्तचक्षुषश्चन्द्रसमीपवर्त्ति तारकादिषु चन्द्रभ्रमो मा भूदिति तत्स्वरूपं प्रकृष्टप्रकाशात्मकं बोधयति। एवं हि बोध्यधीः सुखेन चन्द्रेऽवतारिता भवति। तथा [illegible] बोध्यम्। एवं ब्रह्मविदाप्नोति परमित्युपश्रुत्या ब्रह्मशब्दस्यानेकत्र

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

प्रयोगदर्शनात् "मुमुक्षुभिर्ज्ञेयो ब्रह्मशब्दार्थः क इति जिज्ञासोर्जगत्कारणत्वोपन्यासेन येषु जीवादिषु जगत्कारणत्वं न संभवति तेषां कार्योपाधितया उपाधिद्वारा सृज्यकोटौ निविष्टत्वेन स्रष्टृत्वासंभवात् तेभ्यो व्यावृत्तबुद्धेरपि संभवाज्जगत्कारणभावेषु प्रधानादिषु ब्रह्मत्वभ्रममपनेतुं स्वरूपलक्षणमुपन्यस्यते ।नहि जडानां तेषां ज्ञानादिरूपतोपपद्यते। ततश्चाद्यं लक्षणं केभ्याश्चिद्व्यावृत्तिनिश्चयपूर्वक बुद्धिस्थिरीकरणार्थं, द्वितीचं तु सर्वभ्रमनिवृत्ति पूर्वकं वस्तुस्वरूपसत्तानिश्चयार्थं त्वं पदार्थ तटस्थ स्वरूपलक्षणयोरपीदमेव प्रयोजनं बोध्यम् ।७.४४ ।। यत्रैकस्य वस्तुतो मतभेदेन बहूनि रूपाणि तत्तच्छास्त्रेषु प्रतिपद्यमानान्युपलभ्य क्रिया हि विकल्पते न वस्त्विति न्यायाद्वस्तुनि विकल्पासंभवं च मत्वा विरुद्धानां समुच्चयस्याप्यसंभवत्वेन तेष्वेकमतं प्रतिपादितं सर्वाविरुद्धं वस्तु स्वीक्रियते। तत्र वृक्षप्रकम्पनन्यायः प्रवर्त्रते। यथा वृक्षमारूढः पुमान् अधःस्थितैर्नरैः पूर्वमियं शाखा प्रकम्प्यापूर्वमियमिति भिन्नभिन्नशाखाप्रचालने नियोजितः। तदधःस्थेनैव च केनचित् सर्ववृक्षप्रकम्पनेन प्रेरितः सर्वैः पूर्वप्रचालनस्याज्ञप्ततया यौगपद्यासंभवेन क्रमविकल्पोपगमेऽपि सर्वाविरोधासिद्धेः- तच्चिकीर्षया वृक्षं प्रकम्पयति तत्प्रकम्पनेन च सर्वाशाखा अपि प्रकम्पिताः स्युरिति भवति सर्वैरविरोधः। तथा योगादारभ्यस्थावरान्ते शवादिभिरवरोधायौपनिषदाभिमतो महेशोऽङ्गीकार्यो वीतरागैर्मुमुक्षुभिः।

ननु के तत्तदभिमता ईशाः कश्चौपनिषदभिमतः। कथं च तदुपगमे सर्वैरविरोध इति चेच्छृणु। तावद्योगाभिमतं ईश्वरं क्लेशकर्म विपाकाशयैरपरामृष्टः पुरुषविशेषः ईश्वरः, सोऽपि जीववदसङ्गश्चिद्रूपश्च परश्च जीवेभ्यस्तन्नियन्तृत्वात् प्रधानक्षेत्रज्ञपतिर्गुणेश इति श्रुतेः।

ननु नियन्तृत्वं नाम तत्तत्कर्मकारयितृत्वम्। तच्चासंगस्यानुपपन्नम्। यः कारयति स करोत्येवेति न्यायेन कर्तृत्वस्य दुर्निवारत्वात्। दृश्यते हि योधयितृषु नृपेषु दानादिकर्तृत्वं स्वयं योद्धृत्वं चेति न लोहचुम्बकन्यायेनासंगस्यापि प्रेरकत्वोपपत्तेः। न च तन्निष्प्रमाणकं भीषास्माद्वातः पवते इत्यादि श्रुति सिद्धत्वात् बन्धमोक्षादि व्यवस्था पृथिव्याद्यवस्थित्यनुपपत्तिसिद्धत्वाच्च जीवानामपि स्वतः क्लेशादि रहितत्वेऽपि बुद्ध्या सह विवेकाग्रहेण क्लेशादि सत्वाङ्गीकारात्। ईशस्तु सदा तैरसंस्पृष्ट इति विशेष इति एतेन सेश्वरसांख्यवादोऽपि व्याख्यातः। एतत्तुल्ययोगक्षेमत्वात् तार्किकास्त्वसंगस्य नियन्तृत्वमसहमानातित्यबुद्धीश्चाकृतिमान् पुरुषविशेष ईश्वरः, पुंविशेषत्वमप्यस्य बुद्ध्यादि गुणकत्वादेव नान्यथा नित्यज्ञानादिमत्वादनित्य ज्ञानादिमज्जीवेभ्यः तद्वैलक्षण्यमसिद्ध्यति क्षित्यादि सकर्तृकं कार्यत्वादित्यनुमानं तत्र मानम्। स च लाघवादेकः सर्वत्र कार्योपलब्धेर्विभुश्च। ज्ञानादेर्निष्कर्षवदुत्कर्षोऽप्यङ्गीकार्यो बाधकाभावादिति

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

.न्यायेन भ्वाद्युपादानसर्वसूक्ष्मदर्शित्वात् सर्वज्ञश्च। सत्यकामः सत्यसंकल्पः यः सर्वज्ञः सर्वविदित्यागमोऽपि तत्र मानमित्याहुः। यद्यप्यविद्याकामकर्माद्यभावात् जन्यं सुखमीश्वरे संभवति तथापि नित्यसुखाङ्गीकारे बाधकाभावात्। 'आनन्दं ब्रह्मणो विद्वान्' इत्यादि श्रुतेश्च नित्य सुखाश्रयत्वमपीशस्यान्यत्सर्वसमानमिति तदेकदेशिनः नित्यज्ञानादिमत्वे सदा सर्गप्रसङ्गात् नित्यजिहीर्षावत्वे सदा प्रलयापत्तेश्च नैतन्मतं साधु। अतो लिङ्गदेहसमष्ट्युपहितो हिरण्यगर्भ ईशः। न च देहयोगे जीवत्वं शङ्क्यं तत्समनियताविद्याद्यभावेन तस्यासंभवात्। कथं तर्हि शरीरपरिग्रहः लीलयैवेति गृहाण न च तदीश्वरत्वे मानाभावः उद्गीथब्राह्मणस्य तत्र मानत्वादिति हैरण्यगर्भाः स्थूलदेहं विना सूक्ष्मस्यानुपलब्धेः स्थूलसमष्ट्युपहितो विराडेवेशः। स च सर्वतो मस्तकादिमान् 'सहस्रशीर्षो पुरुषः सहस्राक्षः सहस्रपादित्यादि श्रुतेः। सर्वतः पाणिपादं तदित्यादि स्मृतेश्च सदेहत्वेऽपि जीवत्वाभावादिकं पूर्ववदिति विराडुपासका विधिमुपासीनास्तु बहुपाणिपादस्तु नेशत्वप्रयोजकम्। अन्यथा कृमिविशेषस्य सहस्रपद्यादेरपीशत्वप्रसंगात्। तस्माच्छ्रुतिस्मृत्यादि सर्ववाङ्मयशरीरया भगवत्या सरस्वत्या सदोपासितः सत्यलोकाधिपतिर्ब्रह्मैवेशः यतो वेत्यादि सामान्यवाक्यान्यप्याग्नेयं चतुर्द्धा करोतीति विशेषवाक्येन पुरोडाश चतुर्द्धाकरण वाक्यवत्प्रजापतिः प्रजा असृजते इत्यादि विशेष वाक्यात्तत्परतयैव नेयानि। स च रुद्रस्य स्व ललाटादविष्कर्त्ता हरेरप्यसुरवधाद्यर्थमवतारेषु नियोजकः क्वचित्तयोः स्तुत्यादौ प्रवृत्तिस्तु लोकसंग्रहाय। सा च विधेः स्वीयैव। तयोः स्वांशत्वादित्याहुः। श्रीविष्णुनाभ्युद्भूतपद्मोत्पन्नो हि विधिः, सचैतत् क्वतिष्ठतीति विचारितवान्। "सोऽपश्यत्पुष्करपर्णं तिष्ठन् सोऽमन्यत अस्ति चैद्यस्मिन्निदमधितिष्ठतीति श्रुतेः। ततो यदस्याधिष्ठानं तन्मे मूलमिति तन्निश्चयार्थं चिरं भ्रमन्नपि नापश्यत्पश्चात् समाधिना चित्रेऽवभातमपश्यत्। चिरं तप्त्वा तत्प्रसादात् प्रजोत्पादे समर्थो बभूव। तत एव च वेदान् स्मृत्वा सर्वज्ञतामापेति भागवतादिषु प्रथितम्। अतो विष्णुरेवेशः। स च स्वकृतधर्ममर्यादापालनाय स्वेच्छयावतरति न तु कस्यचिदाज्ञया। यथाह "यदा यदा हि धर्मस्ये"त्यादि। किञ्च महोपनिषदि "एको ह वै नारायण आसीन्न ब्रह्मा नेशान" इत्यादिना ब्रह्मेशानादि सर्वव्यवच्छेदेनैकस्यैव हरेः सर्गादौ सद्भावं ततः प्रपञ्चोत्पत्तिं चाभिधायाथ पुनरेव नारायणः सोन्यत्कामो मनसाध्यायत तस्य ध्यानान्तःस्थस्य ललाटात्स्वेदोऽपतत्ता इमा आपः। तासु तेजो हिरण्मयमण्डमभवत्तत्र ब्रह्मा चतुर्मुखो जायतेत्यादिना। अथ पुनरेव नारायणः सोऽन्यत्कामो मनसा ध्यायत, तस्य ध्यानान्तः स्थस्य ललाटा अक्षः शूलपाणिः पुरुषो जायतेत्यादिना च ब्रह्मरुद्रयोस्तत्स्रष्टृत्वोपवर्णनं दृश्यते। दृश्यते चैतदुपबृंहणभारतादिषु। तस्माद्विष्णुरेवेश इति वैष्णवाः। केचित्तु मूर्ति त्रयातीतं मायाशबलं ब्रह्म नारायण इति मन्यन्ते, स एव वासुदेव इति महाविष्णुरिति चोच्यते। तेषां

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

ब्रह्मादयः कालस्तथैवाखिलजन्तवः विभूतयो हरेरेता जगतः सृष्टिहेतवः। विष्णुमन्वादयः कालस्तथैवाखिलजन्तवः स्थितेर्निमित्तभूतस्य विष्णोरेता विभूतयः। रुद्रः कालान्तकाद्याश्च समस्ताश्चैव जन्तवः चतुर्द्धा प्रलयायैते जनार्दनविभूतय इत्यादि वचनान्यनुकूलानि। शैवास्तु ततो ह्यस्य बन्धविपर्ययौ फलमत उपपत्तेरित्यादि न्यायेन पशुस्थानीयानां जीवानां बन्धमोक्षसुखदुःखादि लक्षणं फलं यदधीनं स ईश्वरः। तच्च शैवलिंगादिषु शिवाधीनं प्रतिपादितं, तस्येश्वरत्वं ज्ञापयन्ति। तथाहि ब्रह्माद्याः स्थावरान्ताश्च देवदेवस्य शूलिनः पशवः परिकीर्त्त्यन्ते संसारवशवर्त्तिनः तेषां पतित्वाद्देवेशः शिवः पशुपतिः स्मृतः। मलमायादिभिः पाशैः स बध्नाति पशून् पतिः स एव मोचकस्तेषां भक्त्या सम्यगुपास्तितः ब्रह्मादिस्तंबपर्यन्तान् पशून् पतिः स एव मोचकस्तेषां भक्त्या सम्यगुपासितः ब्रह्मादिस्तंबपर्यन्तान् पशून् बध्वा महेश्वरः पाशैरेतैः पतिर्देवः कार्यं कारयति स्वकमिति। किञ्च जगत्कारणयोस्तथोक्तयोर्ब्रह्मविष्ण्वोरपि यदीशानस्य कारणत्वं तदा जगत्कारणत्वे किं वक्तव्यम्। यथाह श्रीकृष्णो हरिवंशे अहं ब्रह्मा कपिलोऽथाप्यनन्तः पुत्राः सर्वे ब्रह्मणश्चातिवीर्याः त्वत्तः सर्वे देवदेवप्रसूताः। एवं सर्वेशः कारणात्मा त्वमीड्यः इति मन्त्रवर्णेषु भारते पुराणेषु च शिवहर्योरुपास्योपासकभाव प्रतिपादकानि बहूनि वचनान्युपलभ्यन्ते तत्र। कानिचिद्रत्नाकरे दर्शितानि विस्तरभिया नेह लिख्यन्ते।

कौर्मे च मार्कण्डेयादीन् ऋषीन् प्रति श्रीकृष्णः सर्गादौ महार्णवे काकतालीयन्यायेन स्वेन विधिः समागमं विवादं चोक्त्वा सामान्येन प्रागुक्तस्य शिवमाहात्म्यस्य ख्यापनायोक्तवान्। एवं विवादे वितते मायया परमेष्ठिनः प्रबोधार्थं परं लिंगं प्रादुर्भूतं शिवात्मकं कालानलसमप्रख्यं ज्वालामालासमाकुलं क्षयवृद्धिविनिर्मुक्तमादिमध्यान्तवर्जितम्। ततो मामाह भगवानधो गच्छत्वमाशु वै अन्तमस्य विजानीयामूर्ध्वं गच्छेयमित्यजः। तदा सुसमयं कृत्वा मत्वा तूर्ध्वमधश्च तौ पितामहोऽप्यहं नान्तं ज्ञातवन्तौ समेत्य वै बद्धाञ्जलिपुटौ भूत्वा शंभुं तुष्टुवतुः पुनरिति शिवश्चैताभ्यां स्तुतं स्वकत्वोस्मातयोरुत्पत्तिमक्तोवाच "प्रीतोऽहं युवयोः सम्यग्वरं दद्मि यथेप्सितं" ततः प्रहृष्टमनसौ प्रणिपत्य महेश्वरं ऊचतुः। प्रेक्ष्य तद्वक्त्रं नारायणपितामहौ भक्तिर्भवतु नौ नित्यं त्वयि देव महेश्वर!। ततः स भगवानीशः संहसन्परमेश्वरः उवाच। मां महादेवः प्रीतः प्रीतेन चेतसा प्रलयस्थितिसर्गाणां कर्त्ता त्वं धरणीपते इत्यादि। अत्र प्राग्ब्रह्मविष्ण्वोरीश्वरत्वाभिमानाद् विवादे प्रवृत्ते तद्वारणाय लिंगाविर्भावः, तच्छिरः पादान्वेषणाशक्त्याभिमाने निवृत्ते शिवाविर्भावस्तत्प्रसादाच्चैतयोः सर्वधर्मसामर्थ्यम्। अत एव एतयोरैश्वर्यं शिवाधीनं शिवस्य स्वाधीनं प्रसादेनैव च तत्तन्माहात्म्यख्यापनाय क्वचित्कल्पेततस्ततोंऽशेनाविर्भाव इत्याद्युपपादितम्। एवं शैवलिंगादिष्वपि द्रष्टव्यम्। ततश्च

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

स्वतन्त्रैश्वर्य्यः शिव एवाराध्यो मोक्षादिकामैः न भिक्षुकोभिक्षुकं याचितुमर्हति सत्यन्यस्मिन्न भिक्षुक इति न्यायात्। देवो विश्वाधिको रुद्रः शिव एको ध्येयः शिवकरः अन्यत्सर्वं परित्यज्येति श्रुतेश्च। सर्वैरवश्याराध्यत्वं च तस्य मन्त्रो दर्शयति। अन्तरिच्छन्ति तं जने रुद्रं परो मनीषया गृह्णन्ति जिह्वया सममिति जनेष्वन्तर्यामितया तिष्ठन्तं परः परं श्रेष्ठं ये मनीषया सादरं ध्यायन्ति ते समं सस्यविकारमन्नं जिह्वया गृह्णन्ति इति शब्दोऽर्थः। "ये तु कुतर्कव्यसनिनस्तमन्तर्नेच्छन्ति ते पुरीषमेव जिह्वया गृह्णन्ति" इति। "धन्याः खलु वने वाता" इत्यादेरिवाप्रस्तुतप्रशंसागम्येर्थे कटाक्षः। तथा ह्युपबृंहितं पराशरेण। अन्तरिच्छति यो रुद्रं सदा वन्द्यमनीषया। गृह्णाति जिह्वया सोऽयं रसपूर्णामृतोदकं अन्तर्नेच्छन्ति ये रुद्रं भवानीसहितं भवं पुरीषमेव गृह्णन्ति जिह्वया तेन संशय इति। अत्राद्येन मन्त्रवाच्योऽर्थो दर्शितः। द्वितीयेन गम्यः स चेह स्वयं बाधितत्वात्तेषां गर्हितवृत्तित्वे पर्यवस्यति। अयमर्थो दर्शितोऽन्यत्र धिक् तेषां धिक् तेषांधिक् तेषां धिक् तेषां धिक् तेषां येषां न वसति हृदये कुमति पथविमोचको रुद्र इति। तस्मात् सर्ववशित्वात् सर्वाराध्यत्वात् सर्वफलप्रदत्वाच्च सर्वेशः शिव इत्याहुः। स च निमित्तं जगतामुपादानं तु तन्मायेति केचित्। परमाणव उपादानं महेशो निमित्तमित्यपरे।

अन्ये त्वीशस्य द्वे शक्ती चिदात्मिका आनन्दात्मिका च। तत्राद्या गौरी तद्विशिष्टस्य शिवस्य निमित्तत्वं, द्वितीयाविष्णुस्तद्विशिष्टस्योपादानत्वं तयोश्च शिवस्वरूपत्वं तच्छक्तित्वं च मायाविद्यादि शब्दवाच्या तु शक्तिरन्यैव। सा चोभयविधेऽपि कारणत्वे सहकारिणीत्याहुः। एतन्मतमूलवचनानि तु रत्नाकरे द्रष्टव्यानि। परे त्वथर्वशिरसि पूर्वखण्डे "देवा ह वै स्वर्गलोकमगमंस्ते देवा रुद्रमपृच्छन् को भवानिति" पृष्टवतो देवान् प्रति सोऽब्रवी "दहमेकः प्रथममासं वर्त्तामि च भविष्यामि च नान्यः कश्चिन्मत्तोऽन्यदतिरिक्त" इत्यादिना। एवं मां यो वेद स सर्वान् देवान् वेदेत्यन्तेन वचनेन शिवस्य सर्वात्मत्वं च प्रतिपादितम्। अनन्तंर ततो देवा रुद्रं नापश्यन् ते देवा रुद्रं ध्यायन्त्यूर्ध्वबाहवः स्तुन्वन्तीति देवैरुपास्यत्वं दर्शितम्। ततश्च द्वितीय खण्डे- "यो वै रुद्रः स भावान् भूर्भुवः स्वर्यश्च ब्रह्मा तस्मै वै नम" इत्यारभ्य "यश्च विष्णुर्यश्च महेश्वर" इत्यादि प्रकारेण ब्रह्मविष्णुरुद्रोपेन्द्रादीनां महाभूतादीनां च तत्तद्विभूतित्वं पूर्वखण्डोक्तसर्वोत्म वचनेन सिद्धमवयुत्यानुवादन्यायेन विशिष्यदर्शितम्।

तृतीयचतुर्थयोस्तन्नामनिर्वचनमुखेन तस्य परभावः स्पष्टीकृतः। पञ्चमे तदुपासनादेव मोक्ष इत्युक्त्वा पाशुपतयोगात्मकतदुपास्तिप्रकारो दर्शितः। तदेवमादित आरभ्यान्तं विमृश्यमानमथर्वशिरोजातं मूर्तित्रयातिरिक्तः परमशिवः सर्वतो ज्यायस्त्वात् परेश इति

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

स्पष्टीकरोति। कैवल्योपनिषदि च उमासहायं परमेश्वरं विभुं त्रिला- चनं नीलकण्ठं प्रशान्तं ध्यात्वा मुनिर्गच्छति भूतयोनिं समस्तसाक्षिं तमसः परस्तादित्यादिना मुमुक्षूपास्यत्वमुक्त्वा 'स ब्रह्मा सशिवः सेन्द्रः सोऽक्षरः परमः स्वराट् स एव विष्णुः स प्राणः स कालोऽग्निः स चन्द्रमाः स एव सर्वं यद्भूतं यच्च भाव्यं सनातनं ज्ञात्वा तं मृत्युमत्येति नान्यः पन्था विमुक्तये' इति ब्रह्मादेस्तद्विभूतित्वं दर्शितम्। न च स ब्रह्मेत्यादौ तत्पदानां स निहिते प्राप्यत्वेनोक्ते भूतयोनौ वृत्तेरुचितत्वाद् ब्रह्मादीनां तद्विभूतित्वमेव सिध्यति। न तूपास्यविभूतित्वमिति शङ्क्यम्। भूतयोनिशब्दस्यापि यौगिकस्यासंनिहिते शिव एव वृत्तेः। तत्क्रतुन्यायात्तदुपासनात्तदाप्तेरेव युक्तत्वेन तस्य शिवान्यवृत्तित्वकल्पनायोगाच्च।

न च कथं ज्ञात्वा तमिति तस्य ज्ञानान्मोक्षप्रतिपादनं सगुणब्रह्मवादे तद्बोधादेव मोक्षस्योपपन्नत्वात् निर्विशेषब्रह्मवादे सगुणज्ञानान्मोक्षो नोपपद्यत इति ज्ञात्वा तमित्यत्र तत्पदस्य निर्विशेषपरत्वावश्यकतया पूर्वेषामपि तत्परत्वंसिद्यतीति चेन्न। 'तत्तेजोऽसृजत'इत्यादौ तत्पदानां सविशेषे वृत्तावपि तत्त्वमसि वाक्य श्रुततत्पदमात्रस्यैवानुपपत्या निर्विशेषे लक्षणावद्यत्रानुपपत्तिस्तस्यैवज्ञात्वा तमिति तत्पदस्य तत्र लक्षणायान्याय्यत्वेन प्रयोजनप्राप्यायां कावेर्य्यां मल्लबन्धनस्यायुक्तत्वात् तस्मादुपास्यपरमशिवविभूतित्वमेव ब्रह्मादेरित्याहुः। उभयोरुपनिषदोरुपबृंहणभूतानि भारतपाद्मकौर्मादित्यपराशरशैवमानवादि पुराणवायुसूतसंहिता वचनानि परमशिवसंहाररुद्रयोर्नाम रूपसाम्यस्य किञ्चिद्विशेषस्य च प्रतिपादकानि वचनानि च रत्नाकरे द्रष्टषव्यानि। गाणपत्यास्तु तुरीयः परमशिवः श्रीगणेश एव, स एव वैष्णवैर्वासूदेवाभिधो महाविष्णुरित्युच्यते। न तु शिवद्वयं विष्णुद्वयं वास्ति। येनैकः शिवो विष्णुर्वा मूर्त्तित्रयमध्यगोद्वितीयस्तदतिरिक्त इत्युपगम्यते। एवं च स एव साक्षात्परं ब्रह्म ब्रह्मादीनां तु तदंशत्वेन ब्रह्मत्वं व्यपदिश्यते। विष्ण्वंशानामिव विष्णुत्वम्। तथा च श्रुतिः- "नमस्ते गणपतये त्वमेव प्रत्यक्षं ब्रह्मासीत्या"दि। अत्रविशेष्य संबद्धत्वादन्ययोग व्यवच्छेदनैवकारेण पार्थ एव धनुर्धर इत्यत्रत्यैवकारेण पार्थादन्यत्र धनुर्धरस्येव गणपतेरन्यत्र साक्षाद्ब्रह्मत्वस्य योगोव्यवच्छिद्यते। अतः श्रेयः कामैः सर्वैरपि स एवाराध्यः। तत्पूजां विनान्यपूजाया वैयर्थ्यस्मरणेन फलजनकत्वायोगात्। अवश्यापेक्षितानपेक्षितयोरपेक्षितंसमर्पणीयमिति न्यायेन कृताकृतप्रसङ्गी यो विधिः स नित्य इति न्यायेन तदाराधनस्यावश्यकत्वात् कृते च तस्मिन् विद्यार्थी लभते विद्यां धनार्थी लभतेधनं पुत्रार्थी लभते पुत्रान् मोक्षार्थी परमं पदमित्यादि वचनेभ्यः सर्वेष्टलाभसंभवेनानधीते महाभाष्ये व्यर्थास्यात्पदमञ्चरी अधीतेऽपि महाभाष्ये व्यर्था स्यात्पदमञ्जरीति न्यायेनान्याराधने प्रयोजनाभावात् सूर्याराधनफलायो(रो) ग्यादि

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

मोक्षान्तकथनानन्तरं सर्वमिच्छेद् गणाधिपादिति स्मरणमप्यत्रमानम्। तस्मादेव ब्रह्माद्युत्पत्तिस्तत एव तेषां सृष्ट्यादिसामर्थ्यलाभश्चेत्याहुः। परमशिवविभूतिरूपस्यापि श्रीगणपतेस्तत्त्वेन वर्णनमुपासनार्थं वास्तव तदभेदाभिप्रायं च सर्वत्र तत्पूजनविधानमपि तत्पूजनस्य तत्कर्मोपासनाङ्गत्वात्। न चैतावता तेषामननुष्टानापत्तिः प्रयाजादिषु कृतेषु ज्योतिष्ठोमादीनामप्यननुष्ठानापत्तेः। इतरोपासनादिविधायकशास्त्राप्रामाण्यापत्तेश्च सर्वमिच्छेदित्यादि तु विनायकाराधनस्य परम्परया सर्वत्रोपगमोपयोगवर्णनपरं, न त्वितरनिषेधपरं तद्विधिविरोधात्। किञ्च हेरम्बोपपादक वाक्येषु परमशिवनामानि रूपाणि च न दृश्यन्ते। अतो न स परमशिवः किन्तु शंभु शिव शंकरादि नामा त्रिनेत्रेन्दुशेखरादिलिंगो विधेरपिशास्ता हरेरपि वरप्रदस्तेन नुतश्च श्रीकालभैरव एव वेदान्तप्रतिपाद्यो मुमुक्षुभिराराध्यो मूर्तित्रयपरः परमशिव इतिभैरवमुपासीनाः। श्रीमल्लारि भक्तास्तु कौर्मे ब्रह्मविष्ण्वोः स्वस्वसर्वेश्वरत्वाभिमानेन विवादे प्रवृत्ते वेदैः प्रणवेन च पृथक् पृथक् बोधितो विधिर्नावबुद्धवांश्चेत्तदा नीललोहितो रुद्रः प्रादुर्बभूव । स च तद्गर्ववचनं श्रुत्वा भैरवं प्रेरयामास। तेन च तच्छिरसि छिन्ने सति सोमः परमशिवः प्रादुरभूत्। स च ब्रह्मणा बहुधा स्तुतः स्वपादयोः पतितं तमुत्थाय वरांश्च दत्त्वा प्रोवाच। अग्रे स्थितं रुद्रं नीललोहितमीश्वरं, एष ब्रह्मास्य जगतः त्वमस्य प्रथमः सुतः। आत्मनो रक्षणीयस्ते गुरुर्ज्येष्ठः पिता तव। अयं च भगवान् यज्ञः सगर्भो भगवानद्य शान्तितव्यो विरिञ्चस्य धारणीयं शिरस्त्वया ब्रह्महत्यापनोदार्थं व्रतं लोके प्रदर्शयन् चरस्व भिक्षामित्यादिना नीललोहिते व्रतमाज्ञाय च स्थानं स्वाभाविकं दिव्यं ययौ तत्परमं पदम्। ततः स भगवानीशः कपर्दी नीललोहितः ग्राहयामास वदनं ब्रह्मणः, कालभैरवमित्युक्तम्। अत्र सदाशिवांश नीललोहितांशो भैरव इति भाति काशीखण्डेऽपि कौर्मोक्तरीत्यैव प्राक्तनं सर्ववृत्तान्तमुपपाद्य अर्थश्वरः पद्मयोनेः श्रुत्वा गर्ववतीं गिरं सकोपतः समुत्पाद्य पुरुषं भैरवाकृतिं प्राह। पङ्कजजन्मासौ शास्यस्ते कालभैरव! कालवद्राजसे साक्षात्कालराजस्ततो भवान् विश्वं भर्त्तुं समर्थोऽसि, भरणाद्भैरवः स्मृतः त्वत्तो भेष्यति कालोऽपि ततस्त्वं कालभैरवः, यतः पापानि भक्तानां भक्षयिष्यसि तत् क्षणात्। पापभक्षण इत्येव तव नाम भविष्यतीत्यादिना नीललोहितात् कालभैरवोदय विविध वरलाभस्य चाभिधानात् तस्य तदंशत्वमभिधीयते। महादेवांशसंभूतं भैरवं भैरवाकृतिम् इत्यपि तत्रैवोक्तम्। इह महादेवः परमशिवस्तदंशो नीललोहितस्ततः संभूतस्य भैरवस्य परमशिवांशत्वं स्पष्टं प्रतीयते। एवं पाद्मादिष्वपि द्रष्टव्यम्। तथा चांशांशिनोरभेदोपगमात् परमशिवांश नीललोहितांशत्वाद्भैरवस्य सदाशिवाद्भेदाभावात् तत्त्वेन स्तुतिर्न विरुध्यते। साक्षात्परमशिवस्तु श्रीमल्लारिरेव सद्भिः सदा ध्येयः।

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

तदुक्तं-

ध्यायेन्मल्लारिदेवं कनकगिरिनिभं-
गहोलसाभूषितांगं श्वेताश्वंस्वङ्गहस्तं
विविधबुधजनैः सेव्यमानं कृतार्थैः
युक्तांघ्रिदैत्यमूर्ध्ना डमरुविलसितं नैशचूर्णाभिरामम् ।

नित्यं भक्तेषु तुष्टं श्वगणपरिवृत्तं नित्यमोंकारगम्यमिति। अत्रान्त्येन नित्यपदेन प्रागभावाप्रतियोगित्व विशिष्टध्वंसाप्रतियोगित्वार्थकेन तस्य न कुतश्चिदुत्पत्तिर्न वा कुत्रचिल्लय इति प्रतिपादनात् सर्व कारणत्वं सूचितम्। पूर्वं तु ध्यायेदित्यनेन योजनीयम्। तथा चोंकारगम्यो ब्रह्मविष्णु शिवात्मकः स एव परमशिवोऽन्यत्सर्वं परित्यज्य सदा ध्येयः। शिव एको ध्येयः शिवंकर अन्यत्सर्वं परित्यज्येति श्रुतेः। अयमेव हरिहरयोः स्वविभूतित्वेन ग्रहणान्मैलार इत्युच्यते। मः शंभूरश्च विष्णुताविलायांयदागतौ तदा मैलापदं जातं तावारातिति विग्रहात् मैलार इति मल्लारेर्नामधेयमभूत् किलेति निरुक्तेः। रलयोर्व्यत्ययेनोच्चारणान्मैलार इत्यपि व्यवह्रियते। हरिहरयोस्तद्विभूतित्वे च विधेः सुतरां तत्सिद्धं विस्तृतं चैतन्माहात्म्यं ब्रह्माण्डादि पुराणेषु। तस्मादयमेव विश्वेश इति प्राहुः।

श्रीस्वामिकार्तिकेयोपासकास्तु सर्वगतत्वाद्भक्तानां सविलासाज्ञान शोषणाच्च स्कन्द पदाभिधेयः सर्वबुद्धिरूपा गुहा विद्यते। आधारत्वेनास्येति व्युत्पत्या श आद्यजन्तगुहपदाभिधेयश्च सर्वान्तरात्मा सद्भजनीयानन्तकल्याणगुणो ब्रह्मादिविभूतिमांस्तेषां कर्त्ता नेता च परमशिवः श्रीसुब्रह्मण्य एवेत्याहुः। एतेषु गणपत्यादिमतेषु पुराणादि वचनानि तु लौकिकन्यायरत्नाकरे दर्शितानि।

एवं ह्येकस्यैव सदाशिवस्य लीलाविग्रहेष्वेकाखण्डानन्तज्ञानानन्तज्ञानानन्द धन स्वरूपेष्वप्यघटनघटनापटीयस्या तन्माययान्यदेहवद्भिन्न परिच्छिन्न सच्छिद्रत्वादिना प्रतीयमानेषु कथञ्चिदुत्कर्षापकर्षकल्पकानां शैवंमन्यानां कोलाहलो दर्शितः। तादृशेष्वेव वैष्णवावतारेषु कथञ्चिदुत्कर्षापकर्षकल्पकानां वैष्णवं मन्यमानामपि कलहस्तथैव दृश्यते। केचिद्धि नृसिंहतापनीयानुसारेण नृसिंह एव मूर्त्तित्रयपरो वासुदेवाभिधो महाविष्णुः। अन्ये मूर्त्तित्रयान्तर्गत विष्णोरंशावतारा इति मन्यन्ते। अन्ये तु ब्रह्माविष्णुश्च रुद्रश्चेत्यादि श्रीरामस्तुतिमाश्रित्य स एव तथाभिधः। अन्ये तदंशांशा इत्याहुः। श्रीकृष्णोपासकास्तु प्रकटैश्वर्यत्वात् साक्षाद्वासुदेवादि शब्दाभिधेयत्वाच्चक्रादिमत्वादन्ये अंशकलाः पुंसः। कृष्णस्तु भगवान् "स्वयं मत्तः परतरं नान्यदि"त्यादि वचनकोटिभ्यश्च कृष्ण एव तथा अन्ये अंशांशा इत्याहुः। एवं च वामनादिष्वपि

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

बोध्यम्। किं बहुना। एकस्मिन्नपि कृष्णो गोकुलस्थोऽन्यो द्वारकस्थोऽन्य इति भेदमारोप्य पूर्वः पूर्णोऽन्योंऽश इत्येके। हरिवंशे जरासन्धभयादिव पलायतः कृष्णः परशुरामेण संगतस्ततो मंत्रं पृष्टवान्। स च तस्मै मन्त्रमुपदिश्योवाच। तत्र ते कृष्ण संग्रामे सुव्यक्तं वैष्णवं वपुः द्रक्ष्यन्ति रिपवः सर्वे सुराश्च सुरभावनेतांभजस्व गदां कृष्णं चक्रं च चिरविस्मृतिमति। अनेनेतः पूर्वं विष्णोरंश एवासीत्। अनन्तरं स्वयमागत इति गम्यते। अयमर्थश्चाग्रे तत्रैव गरुडाख्याने स्पष्टीकृतः। तथा च पूर्वोंऽशोऽन्यः पूर्ण इति असन्दिग्धमित्यन्ये। एवमेतादृशेष्वेव देवीविग्रहेष्वपि तन्माहात्म्यवचनान्याश्रित्य केचित्सरस्वतीमन्ये, रमामन्ये, उमां सर्वोत्तमामाहुः। केचित्तु मार्कण्डेयान्तर्गत सप्तशतिका प्रतिपाद्या महालक्ष्मी सर्वोत्तमा ब्रह्मादयो भारत्यादयश्च सर्वे तद्विभूतयः। सैव सर्गादिहेतुर्बन्धमोक्षादिहेतुश्च तया विसृज्यते सर्वं जगदेतच्चराचरम्। सैषा प्रसन्ना वरदा नृणां नृणां भवति मुक्तये। संसारबन्धहेतुश्च सैव सर्वेश्वरेश्वरी सृष्टिस्थिति विनाशानंशक्तिभूते सनातनि विष्णुः शरीरग्रहणमहमीशान एव च कारितास्ते यतोऽतस्त्वां इत्यादि तद्वचनात्। तत्रैव हंसयुक्तविमानस्था इत्यादिना वृत्रप्राणहरे चैन्द्रि इत्यन्तेन सप्तमातृणां तद्विभूतित्वं दर्शितम्। एतेषां ब्रह्मादीनां सर्वेषां तदंशत्वात्तदभिन्नत्वेऽन्योन्यमप्यभेदः। तदभिन्नाभिन्नस्य तदभिन्नत्वमिति न्यायादिति वदन्ति। प्राधानिकरहस्यादि वचनान्यवलंब्यैतन्मतप्रपञ्चोऽपि रत्नाकरे द्रष्टव्यः। एवमग्नीन्द्रादित्येश्वरवादा अपि तन्माहात्म्योपपादकश्रुतीतिहासपुराणवचनान्याश्रित्य तत्रैवं प्रपञ्चिता ज्ञेयाः। तत्तद्भक्ता अपि सर्गादि हेतुत्वरूपेश्वरलक्षणं श्रुत्यादि प्रमाणे च तत्र तत्र दर्शयन्तो लक्षणप्रमाणाभ्यां वस्तुसिद्धिरिति न्यायेन ईश्वरत्वं साधयन्ति। एवं हि वादिनो यद्विवाहस्तद्गीतगानमिति न्यायानुसारीणि स्वस्वेष्टदेवतामाहात्म्यवाक्यानि पश्यन्तोऽन्यानि तु पश्यन्तोऽपि दुराग्रहपिनद्ध दृष्टित्वादपश्यन्त इव तदेकवाक्यतादिकं चाजानन्तो अन्धगजन्यायेनान्योन्यं विवदन्ते। अबुद्धैव च मतान्तरं कूपमण्डूकन्यायान्निराकुर्वन्तो बुधैरुपहसनीयतां यान्ति।

केचित्तु स्वस्वप्रीतिगोचरान्यक्षराक्षसभूतप्रेतपिशाचादीन्नृपनापित पुत्रन्यायेन अयमेव सर्वोत्कृष्टो अयमेव सर्वोत्तम इति मन्यन्ते। तेभ्यश्च स्वयं तत्तत् स्वाभिलषितार्थतृष्णाग्रस्तेभ्योऽपि स्वशिष्टमपि चुम्बन्तमिक्षुदण्डमयाचतेति न्यायेन स्वाभिलषितार्थान्याचन्ते। अन्ये वटाश्वत्थचैत्यचूतार्कवंशादीनी स्वस्वकुलदैवतानि मत्वा स्थावरयोनिष्प्राप्त्यातिदूःखितेभ्योऽपि महिषीप्रसवौन्मुख्येमहिषोमदनातुर इति न्यायेनेष्टं याचन्ते। अन्धचटकन्यायेनाकस्माल्लब्धं चार्थं तद्दत्तं मन्यन्ते। अघटनघटनापटीयस्या माययोपहितं जगतामभिन्ननिमित्तोपादानं परं ब्रह्म परमेश्वरः। तस्यांशैरिवांशैरीश्वरकोटिभिः ब्रह्मादिभिर्जीवकोटिभिश्च सूत्रविराडग्न्यादिभिः

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

जगद्व्याप्तमित्यौपनिषदाः । तथा च श्रुतिः- "मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम् तस्यावयवभुतैस्तु व्याप्तं सर्वमिदं जगदि"ति । एवं च जडानामप्यधिष्ठानानतिरेकात्तदीशत्ववादिभिरपि न विरोधः। सर्वे चैते सेविता ईश्वरत्त्वात्फलदा भवन्ति । फलवैषम्यं तु पूज्यपूजादेः सात्त्विकादि वैषम्यात्। मोक्षस्तु प्रत्यगभिन्न ब्रह्मसाक्षात्कारादेव। तदुक्तं वृद्धैः- ईशसूत्रविराड्वेधाविष्णुरुद्रेन्द्रवह्नयः विघ्नभैरवमैरालमारिकायक्षराक्षसाः विप्रक्षत्रियविट्शूद्र गवाश्वमृगपक्षिणः, अश्वत्थवटचूताद्याः यवव्रीहितृणादयः जलपाषाण मृत्काष्ठवास्यकुद्दालकादयः ईश्वराः सर्वएवैते पूजिताः फलदायिनः यथा यथोपासते तं फलमीयुस्तथा तथा फलोत्कर्षापकर्षौ तु पूज्यपूजानुसारतः। मुक्तिस्तु ब्रह्मतत्त्वस्य ज्ञानादेव न चान्यथा। स्वप्रबोधं विना नैव स्व स्वप्नो हीयते यथा द्वितीय ब्रह्मतत्त्वे स्वप्नोपममखिलं जगत् ईश जीवादिरूपेण चेतनाचेतनात्मकमिति। ननु प्रत्यगभिन्नमेकमेवाद्वितीयं ब्रह्मेति भवतां राद्धान्तः ईश्वराः सर्वे एवैते इत्युक्त्या पुत्रलिप्सया देवं भजन्त्या भर्त्तापि नष्ट इति न्यायेन जीवेशाभेदं साधयितुं प्रवृत्तैर्भवद्भिः सर्ववादिसंमत ईशाभेदोऽपि नाशितः स्यात्। न चैषां विकल्पेन ईशत्वसंभवः, वस्तुनि तदयोगात् नापि समुच्चयेन परस्परेशितृत्वापत्तेः। नापि कल्पभेदेन व्यवस्थया सर्वेषामप्यैश्वर्यस्य कालतः परिच्छिन्नतया न कस्यापि सर्वेशत्वमिति दोषापातात् । तथा च वृद्धिमिष्टवतो मूलं विनष्टमिति न्यायापातः। अश्वत्थादीनां तु न तत्कथमपि संभवति प्रत्यक्षादि विरोधात्। सर्वेषामीशांगत्वाङ्गीकारेऽपि तस्य साङ्गत्वेन घटादिवद्विनाशापत्तिः। ब्रह्मादीशत्वबोधकानामुत्कर्षापकर्षबोधकानां च वाचां व्यवस्थाभावादप्रामाण्यापत्तिः गता च जीवेशकोटित्त्वव्यवस्था तत्प्रयुक्ता बन्धमोक्षादिव्यवस्था च तत्प्रयुक्तं श्रुत्यादि प्रामाण्यं च। तथा चर्मतन्तौ महिषीं हन्तीति न्यायापातः । तस्मात्कथं ब्रह्मादेरीशकोटित्वं कथं च तेषामत्यन्ताभेदः का च तदुत्कर्षापकर्षबोधकवचसां व्यवस्था कथं च तत्तन्माहात्म्यवचसामेकवाक्यता वह्न्यादेर्जीवकोटित्त्वे च का तदीशत्वबोधक वाचां गतिः? कथं च जीवेशाभेदः कथं चान्योन्यजीवैक्यम्? कथं च ब्रह्मणोऽनात्मनां भेदाभावः? कथं च तेषामन्योन्यमपि भेदाभावः इति सर्वं सम्यगुपपादनीयम्। येन स्वसिद्धान्तः प्रकृतान्ययं संगतिश्चसिद्ध्येत्? अन्यथा ईश्वरा सर्व एव एते इति यथा श्रुतोपगमे प्रकृतन्यायसंगतिसिद्धावपि मंडूकतोलतन्यायेन स्वसिद्धान्तप्रच्यवनादि वज्रलेपापत्तेः । अस्यावयवभूतैरितिश्रुतेः सावयवत्वोपगमे चाश्वत्थादीनां जन्मनाशादिमत्वेनोपयन्नपयन्धर्मो विकरोति हि धर्मिणमिति न्यायाद्ब्रह्मणः कूटस्थत्वहानिरिति चेदुच्यते। एकएवाद्वितीयो नित्यशुद्धबुद्धमुक्त स्वभावः कूटस्थः परमात्मा कार्यमात्रप्रकृति त्रिगुणमायोपहितः सर्वनियन्तृत्वादन्तर्यामी कर्तुमकर्तुमन्यथाकर्त्तुं शक्तत्वादीश इत्युच्यते। यथा चैक एव क्षेत्री क्षेत्रे बीजवपनं [illegible]

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

पालकः अन्ते दात्रादिना तमुपसंहरँल्लावक इत्युच्यते। तथैव एक ईशः स्वोपाधिमायागुणत्रयप्रयुक्तसर्गादि कर्मभेदेन ब्रह्मविष्णुरुद्रशब्दैरुच्यते। तत्र कारणीभूतरजोगुणग्रहणेन सर्वप्रपञ्चस्य स्रष्टा सन् स एव ब्रह्मा इत्युच्यते। हिरण्यगर्भस्तु यद्यप्यपञ्चीकृतस्रष्टृत्वाभावान्न ब्रह्मा। तथापि पञ्चीकृत भूतभौतिक स्रष्टृत्वात्क्वचिद्ब्रह्मेत्युपचर्यते। स च जीवकल्पान्तरीयसूत्रात्माहंग्रहोपासनया तद्भावं प्राप्त इति प्रसिद्धमितिहासादिषु। अतस्तदीशत्वबोधका वाचस्तदन्तर्यामिपराः। एवं विराट् वह्नीन्द्रसूर्यादीशत्वबोधका अपि इति बोध्यम्। तदन्तर्यामिणश्च वस्तुतस्तदभेदेऽपि 'भेदव्यपदेशाच्चान्य' इत्यादि सूत्रेभ्यः 'य आदित्ये तिष्ठन्नादित्यादन्तरोयमादित्यो न वेदयस्यादित्यः शरीरं यः आदित्यमन्तरो यमयति। भीषास्माद्वातः पवत इत्यादि श्रुतिभ्यश्च व्यावहारिकभेदोऽपि स्वीक्रियते। कारणीभूत सत्वगुणमादाय सर्वचराचर प्रपञ्चं पालयन् स विष्णुरित्युच्यते। तादृशतमोगुणमादायोपसंहरन् स एव रुद्र इति कथ्यते। एवं चैकस्यैव वस्तुनः परब्रह्मपरमीशमहाविष्णु वासुदेवादि शब्दगोचरस्य चतुर्मुख चतुर्भुज पञ्चमुखरूपाः पुमाकाराः वाणीरमोमारूपाः स्त्र्याकाराः लीलाविग्रहाः।

ननु चतुर्मुखाकारो विधेश्चतुर्भुजाकारो हरेः पञ्चमुखाकारो हरस्य, वाण्याकारो विधेरमाकारो हरेरुमाकारो हरस्यविग्रह इति विशिष्य वक्तव्यम्। गुणत्रयभेदेन तदवच्छिन्नानां भेदात्तथा च कथमेकस्येत्युक्तमिति चेच्छृणु। चतुर्भुज शरीरिणः पालकत्वप्रयोजकं विष्णुत्वमेवेति वक्तुमशक्यम्। दैत्यसंहारादिरूपस्य तमोऽवच्छिन्न रुद्रकार्यस्य दर्शनात् तस्य सुरादि रक्षणफलकत्वेऽपि तमः कार्यत्वेन तदवच्छिन्नरुद्रकार्यत्वात्। एवं पञ्चमुखाकारावच्छिन्नस्येशस्य त्रिपुरादिदैत्यसंहर्तृत्वेऽपि न केवलरुद्ररूपत्वनिर्णयः। संहारस्य देवादि पालनफलकत्वेन विष्णुकार्यत्वात्। "शिव एको ध्येयः शिवंकरः प्रज्ञा च तस्मात् प्रसृता पुराणीत्यादि" श्रुत्या "स मोचयति सुप्रीतः मोचयामि स्वपावकं वे"त्यादि स्मृत्या च मुक्तिज्ञानादि रूपस्य सत्त्वावच्छिन्नविष्णु कार्यस्य प्रतीतेश्च। तमूचुर्भ्रातरो रुद्रः सेवितः सात्त्विकैर्जनैर्मोचयेत् सत्त्वसंयुक्तः पूजयेशमतो हरमिति।

कौर्मे तु रुद्रे साक्षादेव सत्वयोगः प्रतिपादितः। एतेन तामसत्वेन रुद्रस्यापकर्षत्व प्रलापो मूर्खाणां निरस्तः। निरन्तरंदुःखमयसंसार परिवृत्तिश्रान्तानां जीवानां कञ्चित्कालं विक्षेपविगमसमुल्लसदात्मानन्दानुभवेन विश्रान्ति सम्पादयितुकामस्य तस्य संहाराय तमो ग्रहणस्य दुश्चिकित्सव्रणपीडितानां व्रणं शिशमयिषोः शस्त्रग्रहणन्यायेन निदानज्ञस्य भिषजो रुग्णहिंसां

CC-0 Agamnigam Digital Preservation Foundation Chandigarh Funding by IKS-MoE-2025-Grant

प्रयुञ्जतः न किञ्चिदपि नैर्घृण्यं घृणावात्र प्रयोजक [illegible] निरतिशय

Gandhi Memorial College Of Education Bantalab Jammu

करुणांबुधित्वलिंगात् ब्रह्मकोटौ गुणवश्यत्वासंभवात् निद्रालस्यादेस्तमः कार्यस्य तत्राप्रसिद्धेश्च। तमोयोगमात्रेण तत्पारवश्यस्य शंकितुमशक्यत्वात् अन्यत्राप्यतिप्रसंगात् उत्कर्षापकर्षभावे श्रुतिस्मृतिविगीतत्वस्य प्रतिपादयिष्यमाणत्वाच्च सत्वोद्रिक्तस्ततो ब्रह्मेति विष्णुपुराणादौ ब्रह्मणोऽपि सत्वगुणयोगेन विष्णुत्वं प्रतीयते।

भारते चातिवृद्धानां प्रजानां विधेः कोपाग्निनोपसंहर्तृत्वस्य स्मरणेन रुद्ररूपत्वं चावगम्यते।

वासिष्ठे तु सत्वं देवा हरादयः इति साम्येन सर्वेषां शुद्धसत्वप्रधान मायोपाधित्वमुक्तम्। एवं भवान्या दैत्यादि संहर्तृत्वेऽपि पालनरूप विष्णुकार्यप्रतीतेः। नृणां भवति मुक्तय इति मोचकत्वरूप सत्त्वावच्छिन्न कार्यप्रतीतेः। महिषासुरयुद्धेऽसंख्यगुणोत्पाद-कत्वरूपरजोऽवच्छिन्नकार्यप्रतीतेश्च केवलरुद्ररूपत्वनिर्णयः।

ननु मोक्षप्रदत्वादिकमिदं महालक्ष्म्या उक्तं सा चान्यैव समष्टिरूपेति मार्कण्डेय प्राधानिकरहस्यगत तन्माहात्म्यालोचनेन बुध्यते। तथा च कथमनेन पार्वत्या मोचकत्वाद्युक्त्या विष्ण्वादि रूपतोच्यते इति चेत् सत्यमेवं प्रतीयतेऽल्पश्रुतानां वहुश्रुतैस्तूमावतार एव सेति निर्धार्यते। तथा हि मार्कण्डेये तस्या महिषशुंभादि कर्तृत्वं नन्दपुत्रीत्वादिकं च यदुक्तं तत्सर्वं हरिवंशे गौर्या उक्तम्। तत्र तावत् प्रद्युम्न शंबरयुद्धे हतायां सर्वमायायां शंबरो चिन्तयन्। पुनः अस्ति मे कालदण्डाभो मुद्गरो हेमभूषितः पुरा यो मम पार्वत्या दत्तः परमतुष्टया गृहाण शंबरेमं त्वं मुद्गरं हेमभूषितं मायान्तःकरणं नाम सर्वासुरविनाशनम्। अनेन दानवौ रौद्रौ बलिनौ कामरूपिणौ शुंभश्चैव निशुंभश्च सगणौ सूदितौ मयेति पार्वत्या एव ससैन्यशूभादि हन्तृत्वमुक्तम्।

ततः शक्रप्रेषित नारदे मुद्गरवृत्तान्तं तदुपशान्त्यै गौर्युपासनं चोपदिश्य गते सति दैन्येन तस्मिन् गृह्यमाणे सति तदुत्पातान् द्वादशार्कोत्थानादीन्महोत्पातान् दृष्ट्वा प्रद्युम्नः शंभुप्रियां हृदि स्मृत्वा भूमौ शिरसा प्रणम्य तुष्टाव। ॐ नमः कात्यायन्यै गुहस्य जनन्यै नमः नमस्त्रैलोक्य मायायै कात्यायिन्यै नमो नमः। नमस्ये शुंभमथनीं निशुंभहृदि दारिणीं विंध्यवासिनीं दुर्गध्नां रणदुर्गां रणप्रियां त्रिशूलिनीं नमस्यामि महिषासुरघातिनीं सिंहवाहां नमस्यामीत्यादिना मध्यमोत्तमचरितोक्तं सर्वं गुहमात्रं विषयमुपपादितम्। प्रथमचरितदेवता तु योगनिद्रारूपा तामसीशक्तिः। स च रुद्रान्तर्भूता एवेति न विवादः। तथा च कथं दुर्गामान्येति वाच्यम्। यद्यपि तत्र शुंभनिशुंभयोः शूलखड्गाभयां हननम्, अत्र तु मुद्गरेणेति विरोधः। तथापि सकालभेदेनाद्यास्तु शक्यः। वैवस्वतेऽन्तरे इत्यादि भगवत्युक्तेः। हरवंश एवानिरुद्धविष्णुकृते

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

भीष्मपर्वणि, पार्थकृते च स्तवे पुराणान्तरगतो माहात्म्यवचनेष्वयमेवार्थः स्पष्टः। ग्रन्थविस्तरभयान्नेह वचनानि लिख्यन्ते। यानि तूमादेर्विर्मूहालक्ष्मी विभूतित्वचांसि तानि विष्ण्वादेर्नृसिंहादि विभूतित्ववचांसीवोपासनार्थस्तुतिरूपाणि। वस्तुतस्तु गौरीत्वमेवेत्यादीनि साक्षादभेदपराण्येव। अन्यथा "त्वमक्षरंपरं ब्रह्मेत्यादेर"पि तादृशवाक्यगणे पठितस्य तथात्वप्रसङ्गेनाक्षरस्य परब्रह्मणोऽपि स्तुत्य श्रीरामादि विभूतित्वप्रसंगः। अवतारावतारिणोश्चात्यन्ताभेदमनुपदमेव वक्ष्याम इत्युपरम्यते। "न मे नारायणाद्भेदो विद्यते हि विचारतः तन्मायाहं परं ब्रह्म सविष्णुः परमेश्वर" इति। कौर्मे शिवयैव विष्णुरूपत्वं स्वस्योक्तम्। सदाशिवांकमारूढाशक्तिरिच्छाह्वया शिवा महालक्ष्मीरिति ख्यातेति शैवे साक्षान्महालक्ष्मीरूपतो माया इत्युक्ता।

लक्ष्मीतन्त्रे लक्ष्म्याः काल्यादेः स्वावतारत्वोक्तिरपि सोभयोरभेदपरैव। हिरण्यगर्भौ रुचिरौ स्त्रीपुंसौ कमलासनावित्यादि प्राधानिक रहस्ये रमाया रजोऽवच्छिन्न ब्रह्मरूपत्वं प्रतीयते। अतोऽस्या न केवलविष्णुरूपत्वनिश्चयः, न चैतेन अस्याः केवलं विधिरूपत्वमस्तु। कौर्मे "इयं सा परमाशक्तिर्मन्मया ब्रह्मरूपिणीति विष्णूक्त्या विष्णुपुराणादि वचनैश्चास्या विष्णुरूपत्वस्यापि प्रतीतेः। एवं 'मोक्षदे मुक्तिमार्गे' इत्यादौ सरस्वत्या मोक्षादिरूप सत्वावच्छिन्नकार्यप्रतीतेः सत्वाख्येनातिशुद्धेन गुणेनेन्दुप्रभं दधाविति प्राधानिकरहस्ये श्वेतरूपत्वात्साक्षात्सत्वयोगोक्तेश्च न केवलब्रह्मरूपत्वनिर्णयः। एतच्च शिवेऽपि तुल्यम्। तस्मात् सर्वेदेहाः सर्वेषामिति सिद्धम्। तथा चैकरूपत्वमेव सर्वेषां पर्यवसन्नम्।

तदुक्तं हरिवंशे- 'यो विष्णुः स तु वै रुद्रो यो रुद्रः स पितामहः एकमूर्त्तिस्त्रयो देवा रुद्र विष्णुपितामहाः वरदा लोककर्त्तारो लोकनाथाः स्वयंभुवः अर्द्धनारीश्वरास्ते तु व्रतं तीव्रं समास्थिता इत्यादि। एतेन रुद्रो नारायणश्चैवेत्येकं सत्वं द्विधाकृतमित्यादि भारतादिवचनमाश्रित्य शिवविष्णू एव सत्त्वावच्छिन्नेशरूपौ। ब्रह्मा तु जीव एवेशाविष्टः स्रष्टा भवतीति ब्रुवाणा निरस्ताः। यस्तु हरादिषु क्वचित्कस्माच्चित्कस्यचित्कदाचित्केनचिन्निमित्तेन लीलया वाआविर्भाव उच्यते। सोऽपि विचार्यमाणा ऐक्य एव पर्यवस्यति।

तथा हि - क्वचिद्विधेरुभयोराविर्भाव उच्यते। यथा "यजुर्भ्योऽथ विष्णुमि"त्यादि श्रुतावष्टमूर्त्तिब्राह्मणे चान्यत्रापि पुराणादिषु क्वचित् क्वचिद्धरात्। तथा च श्रुतिः, "अण्डो हिरण्मयं रुद्रस्य वीर्यात् प्रथमं संवभूव, तत्र ब्रह्मा विष्णुर्जात" इत्यादि। हरिवंशे च-हरं प्रति हरिवचनं - 'अहं ब्रह्मा कपिलोऽथाप्यनन्तः पुत्राः सर्वे ब्रह्मणश्चातिवीर्याः त्वत्तः सर्वे देवदेव प्रसूता एवं सर्वेशः कारणात्मा त्वमीड्य इति।

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

क्वचिद्धरेर्नारायणाद्ब्रह्मा जायते, नारायणादिन्द्रो जायते, नारायणाद्द्वादशादित्या रुद्राः सर्वा देवता इत्यादि श्रुतौ यथा च त्वद्विस्तारो यतो ब्रह्मा अहं भूतपतिस्तथेति। भारते एवमन्यान्यपि शैव वैष्णवादि मतेषूदाहृतानीदृशानि वचांसि स्मर्तव्यानि। एतानि कल्पभेदेन व्यवस्थितानि। एते ह्यतिविस्तरेण श्रीवसिष्ठो वासिष्ठे श्रीरामं प्रति कथयामास। तत्रैवेशश्चाह वसिष्ठं प्रति। एवं सर्गे हि कस्मिंश्चित्प्रथमोऽथ सदाशिवः कस्मिंश्चिद्विष्णुरित्युक्तो नाभ्युत्पन्नपितामहः, पितामहः स कस्मिंश्चित्कस्मिंश्चिदपि चेतर इतर इति इतरो दुर्गा भैरवो विनायकादिः तेषामपि तन्माहात्म्यबोधक पुराणादि भागेषु ब्रह्माद्युद्भवहेतुत्वसिद्धेः। भगवान् वायुश्चाह - ब्रह्मनारायणौ पूर्वं रुद्रः कल्पान्तरेऽसृजत्, कल्पान्तरे पुनर्ब्रह्मा रुद्रविष्णूजगन्मयः; विष्णुश्च भगवांस्तद्वद्ब्रह्माणमसृजत्पुनः नारायणं पुनर्ब्रह्मा ब्रह्माणं च, पुनः शिवः। एवं कल्पेषु कल्पेषु ब्रह्मविष्णुमहेश्वराः परस्परस्माज्जायन्ते परस्परजयैषिणः तत्तत्कल्पान्तवृत्तान्तमधिकृत्य महर्षिभिः प्रभावः कथ्यते तेषां परस्परसमुद्भवादिति। कौर्मे च क्वचिद्रुद्रः क्वचिद्विष्णुः क्वचिद्ब्रह्मा प्रशस्यते। नान्येन तेषामाधिक्यं न्यूनत्वं वा कथञ्चन तत्तत्कल्पान्तवृत्तान्तमधिकृत्य महर्षिभिः तानि तानि प्रणीतानि विद्वांस्तत्र न मुह्यति इत्युक्तम्। मार्कण्डेये अपि विष्णुः शरीरग्रहणमित्यादिना दुर्गाया विष्ण्वाद्युदयमुक्त्वा यस्तद्देहेभ्योऽस्य आविर्भाव उक्तः। सोऽपि कालभेदेन व्यवस्थितः। एवं गणेशपुराणादौ यो विनायकादेः ब्रह्माद्याविर्भावोऽभिहितः सोऽपि कदाचिन्महेश्वरस्य तदात्मनैवाविर्भावस्ततो ब्रह्माद्याविर्भाव इति समाधातुं शक्य इति न कुत्रापि विरोधः। एतादृशैरपि वाक्यैः सर्वेषां सर्वदेहेषु सतैवावगम्यते। नहि यद्यत्र नास्ति तत्तद उदेति सिकतादेस्तैलादयापत्तेस्तस्मादेकमेवाद्वितीयं ब्रह्म अघटनघटनापटीयस्या मायया अनेकमिव संदेहमिव परस्परस्माज्जातमिव च प्रतीयत इति सिद्धम्। एतेन कतिपयवाक्यान्याश्रित्य कस्यचिदुत्कर्षसमर्थनं निरस्तम्। यच्च हरो हरिं प्रत्याह-"अहं त्वं सर्वगो देवस्त्वमेवाहंजनार्दन। आवयोरन्तंर नास्ति शब्दैरर्थैर्जगत्पते। नामानि तव गोविन्द। यानि लोके महान्ति वै। तान्येव मम नामानि नात्र कार्याविचारणा" इति। तस्याप्यन्ताभेद एव सामञ्जस्यम्। अन्यथा त्वदुक्तरीत्या गुण भेदात्तदवच्छिन्नभेदे विष्णुशिवादिपदानां शिवविष्ण्वादि नामत्वासंभवेनासामञ्जस्यं स्यात्। यत्तु शैवैरुक्तं शुद्धसत्त्वप्रधानत्रिगुणमायोपहित एकैकगुणावच्छिन्नमूर्त्तिभ्यः परस्सूर्यश्चन्द्रावतंस नीलकण्ठोमासहाय शूद्धसत्त्वमूर्त्युपलक्षितः परमशिव एव मुमुक्षूपास्यः। तदुपास्तेर्मोक्षेऽन्तरंगत्वात्। उमासहायमित्यादि श्रुतेः। ब्रह्मादिस्वद्विभूतिः। स ब्रह्म सशिवः इत्यादि श्रुतेः। यस्याज्ञया जगत्स्रष्टा विरंचिः, पालको हरिः, संहर्त्ता कालरुद्राख्यो नमस्तस्मै पिनाकिने इत्यादि पुराणादिभ्यश्चेत्यादि। यच्च वैष्णवा आहुः तादृशमायोपाधिमूर्त्तित्रयपरो वासुदेवमहाविष्णवाख्यः

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

परेशः, ब्रह्मादिस्तद्विभूतिः। स ब्रह्मा स शिव इत्यादि श्रुतेः। तद्भक्तिर्मोक्षेऽन्तरंगसाधनं शिवादेस्त्वीषद्व्यवधानेन आरोग्यं भास्करादिच्छेच्छ्रियमिच्छेद् हुताशनात् ज्ञानं महेश्वरादिच्छेन्मोक्षमिच्छेज्जनार्दनात् इति पुराणात् मां च यो व्यभिचारेणेत्यादिना तदुक्तेश्चेत्यादि। तदप्येतेनापास्तम्। सर्वेषां शुद्धसत्वप्रधानत्रिगुणमायोपाधित्वसाधनेनात्यन्ताभेदसाधनात्। किञ्च मैत्रेयोपनिषदि मायिब्रह्मप्रस्तुत्य तस्य प्रोक्ता अग्न्यास्तनवो ब्रह्मारुद्रो विष्णुरिति परविग्रहेषु विग्रहत्रयस्यैवाग्र्यत्वं श्रूयते यदि ततोप्यग्र्या काचित्परमूर्त्तिः स्यात्तदा कथं तेषामग्र्यत्वं स्यात्। अग्रे भवाह्यग्र्या उच्यन्ते। अतः सर्वविशेषणं सावधारणमिति न्यायाद्ब्रह्मादेर्न कुतश्च न पाश्चात्यं अनेन त्रयाणामपि महाकल्पादौ स्वत एवाविर्भावः परस्परस्मादुदयस्त्ववान्तर कल्पेषु कदाचिल्लीलया कुतश्चिन्निमित्ताद्भवतीति सूचितम्। अमुमेवार्थमुपाद्बलयति भागवतम्। तत्र ह्यत्रेस्तपश्चर्यां प्रस्तुत्य शरणं तं प्रपद्येऽहं य एव जगदीश्वरः प्रजामात्मसमां मह्यं प्रयच्छत्विति चिन्तयन्निति तस्य फलेच्छां चोक्त्वाथ चिराद्वरदानाय ब्रह्मादित्रयसन्निधाने सति स्तुतिप्रणामाद्यनन्तरं तान्प्रत्यत्रेरेकोमया हि भगवान् विविध प्रधानैश्चित्तीकृतः प्रजननाय कथं नु यूयं अत्रागतास्तनुभृतां मनसोऽपि दूराद्भूत प्रसीदत महानिव विस्मयो मे इति प्रष्ठो यथा कृतस्ते संकल्पो भाव्यं तेनैव नान्यथा सत्संकल्पस्य ते ब्रह्मन्यद्वैध्यायसि तद्वयमिति तेषामुत्तरोपन्यासेन मूर्तित्रयातिरेकेण परस्य सर्वैश्वर्याभिव्यक्तिस्थानं तूर्यं मूर्त्यन्तरं नास्तीति व्यक्तीकृतम्। तत्सत्वे तेनैवाविर्भावापत्तेः। अन्यथा ऋषेः सत्संकल्पत्वविरोधात्। तस्मान्नैतदनुरक्ततुरीयोपगमो युक्तः। एतेषां सर्वपरत्वं बोधकासंख्यवाक्यविरोधाच्च शिवादेरेकैकस्यापि लीलाविग्रहा बहव इति पुराणादिषु प्रसिद्धम्। न च तेषु यद्यप्युत्कर्षापकर्षवार्त्तास्ति। एकस्यैव शुद्धसत्वप्रधान मायोपहितस्य परब्रह्मणस्तत्तदाकारैर्विवर्त्तमानत्वात्, तथाप्युपासकप्रेमास्पदे क्वचिद्विग्रहे तत् प्रेमाधिक्योत्कर्षं प्रकल्प्य यं सर्वपरस्तुरीयोऽन्य एतद्विभूतय इति शास्त्रेणोच्यते। तथा च न परशिवादि बोधकवाक्यविरोधः सर्वोपासनायाश्च तौल्येनैव ज्ञानद्वारा मोक्षसाधनत्वम्। ननु साक्षात् तमेव विदित्वेत्यादिशस्त्रविरोधात् एतेनान्तरङ्गत्वादिकल्पनापास्ता। सर्वात्यन्ताभेदसाधनादपि सा न युक्ता, यानि च ध्यायन्मुनिर्गच्छति मां च यो व्यभिचारेणेत्यादीनि हराच्युतादि भक्त्या मुक्तिबोधकानि तान्यपि वाक्यान्तरविरोधाद्वृद्धकुमारी वाक्यन्यायेन भक्तेः परम्परया मोक्षहेतुत्वपराणीति बोध्यम्।

न च ज्ञानं महेश्वरादित्यत्रापि फलभेदोऽस्ति विदित्वातिमृत्युमेतीत्यादि श्रुतेः ज्ञानं लब्ध्वा इत्यादि स्मृतेर्देहात्मज्ञानवज्ज्ञानं देहात्मज्ञानबाधकं [illegible]

CC-0 Agamnigam Digital Preservation Foundation Chandigarh Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

मुच्यत इति भगवत्पादवचनाच्च। सति ज्ञाने मोक्षे विलंबाभावात् श्रेयांसि। तत्र खलु सत्यतनोरित्यपि न विरुद्धं नृणां सत्वतनोरित्यप्यन्वय संभवात् सर्वेषां सत्वतनुत्वसाधनाच्च तस्मान्न किमपि वाक्यं भेदपरं प्रयोजनाभावात्। किन्तु किञ्चित्साक्षादभेदबोधकं किञ्चित्परंपरया तत्र पर्यवसन्नम्। किञ्च भेदस्य प्रामाणिकत्वे तन्निन्दा न स्यात्। दृश्यते च सा यथा नारदीये-हरिरूपी महादेवो लिंगरूपी जनार्दनः ईषदप्यन्तरं नास्ति। भेदकृन्नरकं व्रजेत् इति/कौर्मे च "ये त्विमं विष्णुमव्यक्तं मां च देवं महेश्वरं एकीभावेन पश्यन्ति न तेषां पुनरुद्भवः, येऽन्यथा संप्रपश्यन्ति मत्वेमं देवतांतरं ते यान्ति नरकान्धेराग्नेषु च व्यवस्थितिमिति। इदं विधिभेददर्शन निन्दाया अप्युपलक्षणम्। तथा च भविष्योत्तरे-'विष्णोरन्यं तु पश्यन्ति ये मां ब्रह्माणमेव च कुतर्कमतयो मूढाः पच्यन्ते नरकेष्वध इत्यादि। कर्मविपाक स्मृतौ च "यो ब्रह्मविष्णु रुद्राणां भेदमुत्तमभावतः साधयेदुदरव्याधियुक्तो भवति मानव" इति। वायुश्चाह-"अयं परस्त्वयं ते निसंरंभाभिनिवेशतः यातुधाना भवन्त्येव पिशचाश्च न संशयः इति। ये तु वैष्णवंमन्याः शिवादिद्वेषं कुर्वन्ति ते न चेक्षुरसन्यायेन माया बहुरूपोपि बहिर्मलिनो दृश्यते तधा मायाप्यन्तर्बहुपापि बहिस्तमोरूपा दृश्यते तस्योश्च यद्विमलतमं रूपं तदेव सत्वं इक्षुरसस्येव सिता। यथा चेक्षुमाधुर्यं सितायां कृत्स्नमभिव्यज्यते अन्यत्र मलसम्पर्कात् अल्पतरं च। एवं परैश्वर्यं सत्वेऽतिशुद्धे सर्वमभिव्यज्यते। अन्यत्र मालिन्यदर्पणन्यायेनाल्पतरं च। किञ्च व्रीहिबीजन्यायेनापि रजस्तमसोः सारः सत्वं यथा व्रीहिबीजस्य स्थूलस्तुष्यः स्पष्टस्तत आन्तरः सूक्ष्मस्तुषः फलीकरणनामात् ततोऽप्यान्तरो गर्भभूतस्तण्डुलस्तत्र च यथा विवेके क्रियमाणे सत्यपि तुषद्वयोपधाने तण्डुलादेवांकुरोत्पत्तिरान्तरत्वादेवं तमोरजसोर्गर्भात् सत्वादेव वियदाद्युत्पत्तिः। अतस्तदवच्छिन्नस्य विष्णोरेव जगद्धेतुत्वादीशत्वमितरयोस्तदभावाज्जीवत्वम्। अतः अयः कामेः सत्वावच्छिन्नः परमेश्वरो हरिरेवाराध्यः। अन्यौ तु राजसं तामसं चैव दूरतः परिवर्जयेदिति न्यायात् त्याज्यावित्यादि निन्दां कुर्वन्ति, ये च शैवं मन्या विष्ण्वादि द्वेषं कुर्वन्ति, तेन च तमो वा इदमान आसीदिति श्रुतौ वैकारेण प्रलये गुणान्तराभावो दर्शितः। एवं च यथा व्रीहिस्तंबे प्रथमं तुष एवाविर्भवति, ततस्तद्गर्भे प्रकृत्यापूरेण क्षीरं भवति/तदपि पुनः प्रकृत्यापूरेण घनतां गतं तंडुलाख्यः सारो भवति, तस्मिंश्च सिद्धे तद्बीजं दृढं सदंकुरोत्पादनक्षमं भवति। एवं शिवे प्रथमं भवति, एवं शिवेप्रथमं तम एवासीत्। तच्चेश्वरेणाऽवरकत्वस्वाभाव्यादेकदेशे प्रच्यावितं वैषम्यात् प्रकाशस्वभावत्वापत्त्या रजः संज्ञं आरजः संज्ञं भवति। रजोऽपि प्रवृत्तिस्वभाव्यादेकदेशे प्रच्यावितं वैषम्यात् प्रकाशस्वभावत्वापत्त्या सत्त्वं स्यात्। एवं गुणसामस्त्वविवक्षायां त्रिगुणमय एकः पुरुषस्तत्पृथक् त्वविवक्षायां तु त्रयः। तत्रापि तम उपाधिः शिव ईशः रज उपाधिर्विधिः, सत्त्वोपाधिर्विष्णुः। तौ च कार्यगुणोपाधित्वात्कारणोपधेः शिवस्यानुगो जीवैस्तः।

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

कार्योपाधिरयं जीवः कारणोपाधिरीश्वरः इत्यादिश्रुतेस्तथा च - नहि भिक्षुक इत्यादि न्यायात्तौ न श्रेयः कामोपसनार्हाविति त्वयोत्थापितो 'व्रीहिबीजन्यायो' वक्ष्यमाणो"ष्टुलगुडन्यायेन" तवैव मूर्ध्न पतित इत्यादि निन्दां कुर्वन्ति तेषां दुर्गते माहात्म्यं तु किं वक्तव्यम्। यथाह भगवान् युधिष्ठिरं प्रति भविष्योत्तरे- "मम भक्तः शिवद्वेपी मद्द्वेष्ठा च शिवप्रियः तावुभौ नरकं यातो यावच्चन्द्रदिवाकराविति। भारते च शिवं प्रति यस्त्वाद्वेष्टि स मां द्वेष्टि यस्त्वामनुसमामन्वित्यादि। कौर्मे चर्षीन्प्रति ध्यानं योगस्तपस्तमंज्ञानयज्ञादिको विधिः तेषां विनश्यति क्षिप्रं ये द्विषन्ति पिनाकिनं यो मां समाश्रयेन्नित्यमेकान्तंभावमास्थितः विनिन्दन्देवमीशानं स याति नरकं ध्रुवम्। तस्माद्धि परिहर्त्तव्या निन्दा पशुपतेर्द्विजाः कर्मणा मनसा वाचा तद्भक्तेष्वपि यत्नतः। ये तु दक्षाध्वरे शप्ता दधीचेन महर्षयः भविष्यन्ति कलौ भक्तैः परिहार्याः प्रयत्नतः। द्विषन्तो देवमीशानं युष्माकं वंशसंभवाः, शमाश्च गौत्रमेनोव्यांन संभाव्याद्विजोत्तमैरिति। तत्रैव स्थलान्तरे परात्परतरं यान्ति नारायणपरा जनाः। न ते तत्र गमिष्यन्ति यो द्विष्यन्ति महेश्वरमिति। हरश्चाह हरिं प्रति कैलासयात्रायां "यश्च त्वां द्वेष्टि गोविन्द! स मां द्वेष्टि न संशय" इत्यादि। कौर्मे च ऋषीन्प्रति मूर्खं वा पण्डितं वापि ब्राह्मशां वा मदाश्रयं मोचयामि श्वपाकं वा न नारायणनिन्दकमिति। अतोतिदुर्लभमिन्द्राद्यर्थनीय स्वगशाभावं प्राप्तेनापि घण्टाकर्णेन हरिद्वेषिणा मोक्षाय आराधितोऽपि न तस्मै तं ददौ। यथाह स हरिं प्रति - अहं पिशाचवेषेणासंविष्ठः पापकर्मकृत् सततं दूषयन् विष्णुं ध्येयमाबद्ध्य करणयोः, मम न प्रविशेन्नाम विष्णोरिति विचिन्तयन् अहं कैलासनिलयमासाद्य वृषभध्वजं आराध्य तं महादेवमस्तुवं सततं शिवम्। ततः प्रसन्नो मामाह वृणीष्वेति वरं हरः। ततो मुक्तिर्मया तत्र प्रार्थिता। देवसन्निधौ मुक्तिं प्रार्थयमानं मां पुनराह त्रिलोचनः। मुक्तिप्रदाता सर्वेषां विष्णुरेव न संशयः। तस्माद्गत्वा च बदरीं तत्राराध्य जनार्दनं मुक्तिं प्राप्नुहि गोविन्दान्नरनारायणाश्रम इति। अत्र प्रसन्न इत्यनन्तरमिवेत्यध्याहार्य्यं यतः प्रसन्नतामुद्रादर्शनेन केवलं तं वञ्चितवान्नतु प्रसन्नः यश्च त्वां द्वेष्टीत्यादितदुक्तिविरोधेन हरिद्वेषिणि प्रसादायोगात्। कथमन्यथा तं न मोचयेत्। न च तद्भक्तेर्मुक्तिहेतुत्वं तस्य च मोचकत्त्वं नास्त्येवेति शङ्क्यम्। अथाहैनं ब्रह्मचारिण ऊचुः किं जंप्येनामृतत्वं ब्रूहीति। स होवाच याज्ञवल्क्यः शतरुद्रीयेणेति। एतानि रुचा अमृतस्य नाम ध्येयानि। एतैर्ह वा अमृतो भवति सर्वदा सकृद्वा जपेदनेन ज्ञानमाप्नोति संसारार्णवनाशनं शिव एको ध्येयः शिवंकरः प्रज्ञा च तस्मात् प्रसृता पुराणी ध्येयः शिवंकरः प्रज्ञा च तस्मात् प्रसृता पुराणी ध्यात्वा मुनिर्गच्छति भूतयोनि ये भक्ता वरदं देवं शिवं रुद्रमुमापतिं इह लोके सुखं प्राप्यते यान्ति परमां गतिम्। सर्वग्राहगृहीतान् वै

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

सर्वपापसमन्वितान् स मोचयति सुप्रीतः शरण्यः शरणागत नित्याद्यसंख्य श्रुतिस्मुतिवचनाप्रामाण्यापत्तेः शंभु शंकरादिशब्दानां डिभ्यादिवदानर्थक्यापत्त्या संसक्तानां नित्यदायत्करोति शममित्यादि निरुक्ति स्मृत्यप्रामाण्यापत्तेश्च। तस्मात् स्वभक्तिजमोक्षफलकज्ञानप्रतिबन्धकहरिद्वेषस्य तेन प्राप्तस्य शिवानुयायिष्वनुपपन्न श्रोत्रिय विप्रवधानुमितराक्षस्यत्वस्य च निवर्तनायेयमीशोक्तिः। द्वेषेऽपगते च तस्य राक्षसत्वापगमज्ञानलाभौ तत्रैवोक्तौ तेन न तत्कृतेशभक्तिं वैयर्थ्यं कथमन्यथा ब्रह्मवधादि निरतस्य हरौ दृढा भक्ति र्ज्ञानलाभश्चातिशीध्रं स्यात्।

जन्मान्तरसहस्रेषु तपोध्यानसमाधिभिः नराणां क्षीणपापानां कृष्णे भक्ति प्रजायते श्रवणावपि बहुभिर्यो न लभ्यः। मनुष्याणां सहस्रेषु बहूनां जन्मनामन्त इत्यादिना तयोरतिदुर्लभत्वोक्तेः। तस्मात्प्रतिबन्धापाये शिवाराधना देवाच्युतभक्त्यवान्तरव्यापारकात्तस्य क्रमात्सदेहविदेहविमुक्तिफलकं ज्ञातं जातं तज्जन्यत्वे सति तज्जन्यजनकस्य व्यापारत्वात् तन्निष्ठहरिभक्तेश्च तत्वात् यत्र क्षयः स्वर्गवासस्ते इत्यादिना कृष्णाज्ञया स्वर्गगमनं तत्र तस्योक्तम् तदपि ये स्वर्गमेव परं मन्यन्ते तदर्थं चातिप्रयासं कुर्वन्ति। तैरप्यल्पायासा भक्तिरेव कार्येति ज्ञापनार्थं, न तु वस्तुतः इन्द्राद्यैरप्यर्थनीयेशसामीप्यात् प्रच्याव्य ततोऽति तुच्छे कारागृहसदृशे स्वर्गे भक्तस्य पातनं पुत्तम् (पुत्रं) नहि हरिभक्तिरधोगतये महेशसामीप्यत्वपारपुण्यपुञ्ज प्रसादित तत्प्रसाद लभ्यम्।

यथाहेशः स्वसामीप्यस्यातिदुर्लभतां सूचयन् दक्षाय भारते परितुष्टोऽस्मि ते दक्षस्तवेनानेन सुव्रत बहुनात्र किमुक्तेन मत्समीपे भविष्यसीति। ननु शताश्वमेधकर्तुः शक्रस्य क्षणमपि दुर्लभं ते सामीप्यमेकस्यापि क्रतोरसमापयितुर्मे कथं भवितेति शंकमानं प्रत्याह - अश्वमेधसहस्रस्य वाजपेयशतस्य च प्रजापते मत्प्रसादात् फलभागी भविष्यसीति। ननु 'यः कुरुते स भुङ्क्त' इति न्यायेन कर्तुरेव फलं भवति, अन्यथातिप्रसंगात्। तथा चाश्वमेधाद्यकर्तुः मे कथं तत्फलभाक्त्वमित्याशङ्क्याह। 'मत्प्रसादादिति।' पुनरावृत्तिफलकैस्तैरपुनरावृत्ति रूपं ते सामीप्यं कथं स्यादिति चिन्तामालक्ष्याह। 'भूयश्च ते वरं दद्मीत्यादिना त्यजतां मानसो ज्वर' इत्यन्तेन ने चेमे वराः स्वसामीप्यादन्य एवेशेन दत्ता इति भ्रमितव्यम्। बहुनात्र किमुक्तेनेति प्रागेव वरपर्यवसानोक्तेः। एकयज्ञनाशे शिवसामीप्याश्वमेध सहस्रवाजपेयशतलाभे च सति मानसा ज्वरासंभवादन्य वरदानेन तत्त्यागानुज्ञानुपपत्तेश्च। मदुक्तप्रकारेण तूभयं युज्यते। शिवधर्मोत्तरे च ये संप्राप्ता परं स्थानं ध्यानयोगरता नराः न तेषां पुनरावृत्तिर्घोरसंसारसागरे सर्वज्ञाः सर्वगाः शुद्धाः परिपूर्णा महेश्वराः शिवतुल्यबलोपेताः परं शिवपुरं गता इतीशसामीप्यमहिमा स्मर्यते। नन्विदं माहात्म्यं शिवपुरं गतानां तत्सामीप्यसारूप्यलक्षणामुक्ति प्राप्तानामयं तु तदनुचरो न तु तत्पुरवासीति चेच्छृणु। तर्हि गीतज्ञो यदि गीतेने त्यादियाज्ञवल्क्याद्युक्तरीत्या

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

शिवप्रसादहेतुगानविद्याद्यभ्यासेन ईशानुचरत्वं प्राप्तानामपि माहात्म्यम्। तेषां हि पदं हिरण्यगर्भादिपदेभ्योऽपि श्रेष्ठं स्मरन्ति पौराणिकाः।

भिदन्ति शैलानुदधीन्पिबन्तिव्यत्यासयन्ति क्षितिमन्तरिक्षं तृणीकृतब्रह्मपुरन्दराणां किं दुष्करं शंकरकिङ्कराणामिति। ते हि साक्षाद्दिविषदो ह्यन्तरिक्षसदस्तथा पृथिवीषदप्रत्येते विज्ञेयास्त्रिविधा गणा इत्यादि पुराणाद्युपबृंहिता देवव्रतरुद्रोपनिषदादयश्चैषां महिमानमपरिमितं ख्यापयन्ति। द्वितीयं जप्त्वा गाणपत्यमवाप्नोति इत्यथर्वशिरश्च महाफल प्रापयाढे शिवानुचरत्वं कीर्तयद्देवान्तरेभ्यो अस्यातीवोत्कर्षं स्फुटयति। अत एवोक्तं भक्तैःभजेम भवदन्तिकं प्रकृतिमेत्य पैशाचिकीं किमित्यमरसम्पदः प्रमथनाथनाथामहे भवद्भवन देहली विकटतुण्डदंडाहतिस्फुटन्मुकुट कोटिभिर्मघवदादिभिर्भूपते इति बहुगणसहायस्य चास्य गणाधिपत्यमवगम्यते। आगतोऽहं महाशैलात् कैलासादिति। तदुक्त्या कैलासवासित्वं च। तथा च कथं तस्य स्वर्गगमनं, हरिकृपालभ्यं स्यात्। ईदृशस्यापि हरिद्वेष प्रवृत्तिस्तु जयविजययोः सनकादिशासने प्रवृत्तिरिव ब्रह्मद्वेषिणां दुर्गति सूचनाय विजययोः सनकादिशासने प्रवृत्तिरिव ब्रह्मद्वेषिणां दुर्गति सूचनाय हरीच्छयैव शैवापसदेनामन्येषां विष्णुद्वेषिणां कैमुत्तिकन्यायेन दुर्गतिसूचनाय हरेच्छयैवेति बोध्यम्। तस्मादुक्ताभिप्रायैवास्य स्वर्गगमनोक्तिः। स शिवसमीप एवागत इति तु तत्त्वम्। अतः कृष्णाय वरं दातुमागतो नेशेनागतानां गणं मुख्यानां वर्णनप्रसङ्गेऽस्यादावेव वर्णनम्। तस्याग्रे समपद्यन्त भूतसंघाः सहस्रशः घण्टाकर्णो विरूपाक्षः कुंडधारः कुमुद्वह इति तस्मादुक्ताभिप्रायमेवेदमाख्यानम्।

एवं हरिविधिभक्तस्यापि दक्षस्येशद्वेषिणो दुःखाद्युक्तिरपि भारतादौ शिवद्वेषिणामन्येषां वैष्णवापसदादीनामुक्तन्यायेन दुर्गतिसूचिद्वेषापाये सुगतेश्च सूचिकेति बोध्यम्। किञ्च तामसत्वात्कृष्णो रुद्रः सात्त्विकत्वेन शुक्लस्य हरेर्ध्यानात् कीटभृङ्गन्यायेन शुक्लत्वंगतः। एवं श्वेतो हरिः श्यामस्येशस्य ध्यानात् कार्स्न्यं गत इति पुराणेष्वसिद्धं च। तथा शुक्लं शंभुं द्विषन्तो हरिमेव द्विषन्तीति। कथं ते वैष्णवाः एवं श्यामं हरिं द्विषन्ता हरमेव द्विषन्तो हरमेव द्विषन्तीति कथं ते शैवा इति ध्येयम्।

अथ प्रकृतमनुसरामः। वाल्मीकीये रामायणे वने रामगमनं मेऽनुमतं नास्तीति कौशल्या प्रत्यायनार्थं भरतो बहून् शपथान् कृत्वाऽतिघोरमेतं शपथं मत्वान्ते चकार भक्त्या विवदमानेषु मार्गमाश्रित्य पश्यतः तस्य पापेन लिप्येत यस्यार्योऽ नुमते गत इति। अत्रादौ हरिहरादेरिति शेषः। मार्गं तत्तन्माहात्म्यबोधकं शास्त्रं मार्गमित्युक्त्या तु शास्त्रोक्तं तत्तदुपासनार्थं मार्गमाश्रित्य न तु तद्धार्दं ज्ञात्वेति ध्वन्यते। विवदमानेषु तत्तदुत्कर्षवर्णनमपि मार्गमाश्रित्य

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

हरादेरुत्कर्षापकर्षोक्त्या कलहं कुर्वत्सु यत्पापं, अथ च पश्यतः शृण्वतो यत्पापं तस्य पापस्य संबन्धिना तत्तुल्येनेति यावत्। नत्वन्यस्य पापेन्येभ्यस्य लेयसंभवः तेनेति पाठस्तु सुगमः। अत्रापि पश्यत इत्युक्तेर्विवादं श्रुत्वायमुत्कृष्टोऽन्येऽपकृष्टा इति यो निश्चिनोति तस्य पत्यायमिति भावः। यद्यप्यन्यतमविग्रहावच्छिन्नेशनिन्दां शृण्वत उदासीनस्यापि पापं भवत्येव कर्णौ पिधाय निरियाद्यदकल्प ईशे धर्मा वितर्य सृणीभिर्नृभिरस्यमाने छिन्द्यात् प्रसह्य उशतीमसतां प्रभूश्चेत् जिह्वामसूनपि ततो विसृजेत्सधर्म इति भागवते भगवत्येशनिन्दा श्रवणस्यापि निषेधात्। तथापि तस्येदमित्थमेवेति जानतः सकाशादस्ति किञ्चिदश्मलोष्टन्यायात्पापात्सत्वमित्यभिप्रायः।

तथा स्कान्देऽप्युमापरीक्षार्थमागतेन मायावटुना शिवेन शिवनिन्दायां कृतायां तां शृण्वतीः सखीः प्रत्युमोक्तिः - आर्याणां निन्दनं श्रुत्वा येन यान्ति त्वरान्विताः स्थानान्तरं ह्यप्रतिष्ठास्तेऽपि स्युः पापयोनय इति। अयिकैमुत्तिकन्यायद्योतकः यदीशनिन्दां श्रुत्वा ये शीघ्रं देशान्तरं न यान्ति तेऽपि न विद्यते प्रतिष्ठा उत्तमलोकप्राप्तिलक्षणा येषां तादृशाः सन्तः पापयोनयः कृमि मशकादि जन्मानः स्युर्भवन्ति तर्हि निन्दकास्कास्तादृशा भवन्तीति किमु वक्तव्यम्। यथाहोपमन्युर्हरिं प्रति भारते यच्चाप्यसूयते देवं कारणात्मानमीश्वरं सकृष्णा नरकं याति सह पूर्वैः सहात्मजैरिंति। एवं हि दुर्गतिभिया शास्त्रे प्रवृत्तानामपि दुर्भगानां विध्यादिष्वेक भक्त्यान्यनिन्दकानां 'बिल्वंखल्वाद' न्यायेन पुनर्दुर्गतौ प्रवेश इति कोटिशो वाक्यानि बोधयन्ति। विस्तरभिया दिङ्मात्रमेवेह दर्शितम्। यद्यप्येकपक्षपातेनान्यनिन्दकानामप्यस्ति तात्कालिकः कश्चिद्धर्षविशेषस्तेषां नास्तिकसुहृदाम्। तथापि कोशयानन्यायेन मिथ्यावादिनां तेषां परिणामेति दुःसहं दुःखमित्यास्तिकैस्त्याज्योऽयं दुराग्रहः। तेषां च संगोप्यवश्यमेव सा आहुस्तटिनीति न्यायात्त्यज्यः। अन्यथा चौरापराधान्माण्डव्यनिग्रह इति न्यायात्तत्संगिनामपि दुर्गतेरवर्ज्यत्वात्। तत्तद्विग्रहावच्छिन्नेशाभेददर्शिनां त्वन्यतमविग्रहावच्छिन्नोपासकान्यान्तिः, कामानां नितरां निर्मलस्वान्तानां तत्प्रसादात्त्वतत्त्वसाक्षात्कारेण मोक्षः, स कामानामप्यर्चिरादि मार्गेण सत्यलोकं गतानां हिरण्यगर्भेण स हरमोक्षः। तदुक्तमीश्वरगीतायां ये त्विमं विष्णुमव्यक्तं मां च देवं महेश्वरं एकीभावेन पश्यन्ति न तेषां पुनरुद्भव इति अत्र हरिहरयोर्ग्रहणम्। काकदधिघातकन्यायेन विधेरप्युपलक्षणम्। यथाह हरि दक्षं प्रति भागवते - अहं ब्रह्मा च शर्वश्च जगतः कारणं परं आत्मेश्वर उपद्रष्टा स्वयं दृगविशेषण इत्यादिना त्रयाणामेकभवानां यो न पश्यति वै भिदां सर्वभूतात्मनां ब्रह्म न स शान्तिमधिगच्छत्तीत्यन्तेन एवं हर हरिद्वेषनिन्दानिन्दकं वचोऽप्युपलक्ष्णं बोध्यम्। किं वहुना सर्वदेहावच्छेदस्य सर्वेषु साधितत्वादेकनिन्दाद्वेषयोः सर्वविषयत्वादेकनिन्दकः सर्वनिन्दक एवं द्वेष्टा सर्वद्वेष्टा चेति बोध्यम्। ननु ब्रह्मादीनां सर्वेषां किं नाम सर्वेषु चतुर्मुखादि

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

देहेषु वृत्तित्वं न तावद्गणपतिन्यायेन भिन्नभिन्नावयवावच्छेदेनैकैकदेहे भिन्नभिन्नदेशवृत्तित्वं तत्परिच्छिन्नत्वसावयवत्वादि प्रसंगेनानित्यत्वापातात्। अत एव न तिलतण्डुलन्यायेन सर्वदेहे ह्येषां संसृष्टिर्नीरक्षीरन्यायेन संकरो वापि संभवति। अतोऽनुपपन्नोयं पक्ष इति चेन्न। वेण्याकाशन्यायेन अत्यन्ताभेदस्यैव स्वीकारत्। न हि प्रयागे अन्योन्य संसर्गेणैक प्रवाहीभूते श्वेतश्यामरक्तवर्णे गंगा यमुनासरस्वतीनीरे प्रतिबिंबितस्य तदवच्छिन्नस्य वाऽकाशस्य भेदलेशोऽप्यस्ति। किञ्च 'यतो वा इमानि भूतानि जायन्ते", 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयं' 'सोऽकामयत बहुस्यां प्रजायेये'त्यादिना अखण्डाद्वितीयं ब्रह्म सृष्टेः प्रागासीत्तस्मादेव मायोपहितादभिन्ननिमित्तोपादानात्सर्वजगदुत्पन्नम्। तेनैव च सत्तास्फूर्तिमत् तत्रैव चान्ते लीयत" इति बोध्यते। ऐतदात्म्यमिदं सर्वं इत्यादिना च सर्वात्मत्वं तस्योच्यते "तं त्वौपनिषदं पुरुषं पृच्छामि सर्वे वेदा यत्पदमामनन्ति' इत्यादि श्रुतिभिरुपक्रमादिलिंगैश्च तत्रैव सर्ववेदतात्पर्यमिति ज्ञायते। अत एव तदुपबृंहणभूतपुराणादेरपि तत्रैव पर्यवसानम्। 'अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदो यजुर्वेदः सामवेद इत्यागमेन तस्यैवाखिलागमाविर्भावहेतुतोच्यते। अयमर्थो 'जन्माद्यस्य यतः' 'शास्त्रयोनित्वात्', "तत्तु समन्वयादि"त्यादि सूत्रभाष्यादिषु प्रपञ्चितः। "पुरुषान्नपरं किञ्चित् सा काष्ठा सा परा गति"रित्यादि श्रुत्या च तस्यैव सर्वोत्कृष्टत्वं मुक्तप्राप्यत्वरूपपरमगतित्वं चोक्तम्। अथ "पुरुषो ह वै नारायणोऽकामयत प्रजासृजेयमि"त्यादि श्रुतौ तु जगद्धेतुत्वं हरेरुच्यते। अथ 'नित्यो देव एको नारायणो ब्रह्मा च नारायण' इत्यादिना च सर्वात्मत्वं तस्यैवाम्नायते। स्वतोऽसंगौदासीनस्य कारणत्वासंभवान्मायिनस्तद्वाच्यम्। तच्च मायित्वं 'दैवी ह्येषा गुणमयी मम मायेति' हरिवाक्याद्धरेव ज्ञायते। "तद्विष्णोः परमं पदमिति" श्रुत्या "यद्गत्वा न निवर्तते तद्धाम परमं ममेति" स्मृत्या च मुक्तप्राप्यतापि तस्यैव प्रतीयते। अत्र सर्वत्र षष्ठी 'राहो शिर' इतिवदभेदे षष्ठीं पञ्चमीं च वदन्तो यास्ताः 'मत्तः परतरं नान्यत्' 'न त्वत्समो अस्ती'त्यादिना सर्वोत्तमतापि तस्योच्यते। तथा नारायणपरा वेदा नारायणपरा मखाः वेदे रामायणे चैव पुराणे भारते तथा आदावन्ते तथा मध्ये हरिः सर्वत्र गीयते। वेदैरशेषैरहमेव वेद्यो वेदान्तकृदिना श्रुत्या दृढतात्पर्यभूमित्वं, तत्कारणत्वं च हरेरवगम्यते। देवा ह वै स्वर्गलोकमायन् ते देवा रुद्रमपृच्छन् "को भवानिति"। सोऽब्रवीद"हमेकः प्रथममासं, वर्त्तामि च भविष्यामि च नान्यःकश्चिन्मत्तोऽप्यतिरिक्त" इत्यादि श्रुतौ तु शंभोरेव सृष्टेः प्रागसत्वमद्वितीयत्वं जगत्कारणत्वं सर्वात्मत्वं चाम्नायते। "मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्"इति [illegible] तत्र श्रूयते। न चात्र महेश्वरशब्दोऽन्यपरः तत्र मन्त्रे बहूनां

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

शिवनाम्नामेवोपलब्धेः। दक्षश्च महेश्वरं प्रति निमन्त्रेणाभावे सर्वभूतकरो यस्मात्सर्वभूतपतिर्हरः सर्वभूतान्तरात्मा च तेन त्वं न निमन्त्रितः त्वमेव हीज्यसे यस्याद्यज्ञौर्विविधदक्षिणैः त्वमेव कर्त्ता सर्वस्य तेन त्वं न निमन्त्रित इति हेतूक्तिव्याजेन तस्य सर्वहेतुत्वं सर्वान्तरात्मत्वं सर्वयज्ञयष्टव्यत्वं च विशेष्यसंबन्धित्वे नान्ययोगव्यवच्छेदिभ्यामेवकाराभ्यमन्ययष्टव्यत्व-कर्तृत्वयोर्निषेधं चोपपाद्य अथवा मायादेव सूक्ष्मया तव मोहितः। एतस्मात् कारणाद्वापि प्रभो त्वं न निमन्त्रित इति। तत्रैव हेत्वन्तरोक्तिछलेन शुद्धे तस्मिन्नसंभविपूर्वोक्तकारणत्वोपपादकं मायित्वमपि तस्यैवोवाच। एवं यो मां वेत्ति स वेदान्वेत्ति संगानित्यथर्वशेर्षिशीर्षे शंभुज्ञानस्य सांगवेदज्ञानव्याप्यत्वोक्तेस्तज्जन्योपलंभात्तद्विषयीभूतमहेशस्य तत्प्रतिपाद्यत्वं निश्चीयते। वेदाः सांगोपनिषदाः पुराणाध्यात्मनिश्चयः यदत्र परमं गुह्यं स वै देवो महेश्वर इति द्रोणपर्वान्तर्गतशतरुद्रीये पद्यते सर्व सिद्धांतैर्वेदान्तैर्योमुनीश्वरैरिति। पाद्मे च स्पष्टं सांगवेदपुराणादि तात्पर्यभूमित्वं शंभोः स्मर्यते। तस्मात् परतरं नान्यत्किञ्चिदस्ति महेश्वरादिति। तस्मान्नान्यः परो देवस्त्रिषु लोकेषु विद्यते इति च क्रमेण तयोरेवास्य सर्वोत्तमतोच्यते।

ह रिवंशे च हरिवाक्येनान्यस्त्वतः परमो देवदेवजगत्पतिः सुरवीराहंतासहितास्त्वत् प्रसूता यज्ञो दीक्षा च दक्षिणा चाभिरूपेति वेदादि हेतुत्वमपि तस्योक्तम्। मुक्तप्राप्यत्वमपि परमं परायणं तत्त्वमिति श्रूयते स्मर्यते च। त्वं धाम परमं पदमित्यादि। अपि च भगवता गीतायाः सप्तम नवम दशमाध्यायेषु स्वस्य सर्वात्मत्वज्ञापको यो विभूतियोगो दर्शितः अन्यत्रापि तत्परपुराणादिषु च सोऽपि हरपरेतिहास पुराणादिषु तस्य दर्शितः। यथा मोक्षधर्मे दक्षस्तवराजे व्याघ्रो मृगाणां पततां तार्क्ष्योऽनन्तश्च भोगिनामित्यादि। यच्चैकादशे तत्तत्प्रत्यायकं विश्वरूपं हरिणा दर्शितं तदप्यत्र शंभोर्दर्शितं भवच्छरीरे पश्यामि सोममग्निं जलेश्वरम् आदित्यमथ वै विष्णुं ब्रह्माणं च बृहस्पतिमित्यादि किं चैकादशे एवामीहि त्वामिप्यादिना मया हतास्त्वं जहीत्यन्तेन हरिणा हता एव भीष्मादयोऽर्जुनेन हता इति ज्ञायते। शतरुद्रीये चार्जुन प्रश्नोपन्यास पुरःसरमादिमध्यावसानेषु हरहतत्वोक्तेर्येनोपक्रम्यते येन चोपसंह्रियते स वाक्यार्थ इति न्यायात्तेन हता एव कौरवाः पार्थेन हता इति निश्चीयते। किञ्च एष एव साधुकर्म कारयती अन्नादो वसुदानः फलमत उपपत्तेरित्यादि श्रुतिसूत्रैः परमात्मनः शुभाशुभ कर्मफलदातृतोच्यते। अन्नमासमन्ताद्ददातीत्यन्नादततोऽह्यस्य बन्धविपर्ययावित्यादिना च बन्धकत्वं मोचकत्वं चेशस्योच्यते। "लभते च ततः कामान् क्षिपाम्यजस्रमशुभान्, तेषामहं समुद्धर्ता" इत्यादिना तत्सर्वं हरेरुच्यते। स मोचयति सुप्रीतः शरण्यशरणागतान् आयुरारोग्यमैश्वर्यं वित्तं कामांश्च पुष्कलान्। स ददाति मनुष्येभ्यः स वै वाक्षिपते पुनः सेन्द्रादिषु च देवेषु तदेतप्रत्ययैश्चर्यफलदाते

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

सकामानां प्रभुर्देवो ये दिव्या ये च मानुषाः स मेधयति यन्नित्यं सर्वार्थान् सर्वकर्मसु शिवमिच्छन् मनुष्याणां तस्मादेव शिवः स्मृतः । "सर्वथा यः पशून् पाति तैश्च यद्रमते पुनः तेषामधिपतिर्यच्च तस्मात्पशुपतिः स्मृत" इत्यादि । भारते ब्रह्मादिस्तंबपर्यन्तान् पशून् बद्ध्वेत्यादि पुराणादिषु च तत्सर्वं हरस्योक्तम् । हरिवंशे च हरिप्रणीतोमास्तवे आवासा सर्वभूतानां निष्ठा च परमा गतिरिति तस्याः सर्वाधिष्ठानत्वं मुक्तप्राप्यत्वं चोक्तम् । तत्रैव "लक्ष्मीरलक्ष्मी रूपेण दानवानां वधाय" चेत्यादिना "त्वया व्याप्तमिदं सर्वं जगत् स्थावरजंगममि"त्यन्तेन तस्याः सर्वात्मतोक्ता । तथा भविष्योत्तरे उमोक्तं यो मां पश्यति सर्वत्र सर्वं च मयि पश्यति तस्याहं नित्यं मयि स्थितः न पश्येत्सर्वभूतेषु न च सर्वमपि स्थितं सतु पर्वतदुर्गेषु मार्गमाणो विनश्यतीति । मात्स्ये च सर्वगा सर्वभूतेषु द्रष्टव्या परमेश्वरी सर्वलोकेषु यत्किञ्चिद्रहितं न तया विनेति । मार्कण्डेये तु न विसृज्यते विश्वं जगदेतच्चराचरं सैषा प्रसन्ना वरदा नृणां भवति मुक्तये, संसारबन्धहेतुश्च । सैव सर्वेश्वरेश्वरीत्यादिना प्रागुक्तं सर्वं गौर्या दर्शितं सनत् कुमारसंहितायाम् । विधे वेदान्तगीते श्रुति परिपठिते मोक्षदे मुक्तिमार्गे मार्गातीतस्वरूपे इत्यादिना वेदान्तोपपाद्यत्व मोचकत्वादिकं सरस्वत्या उक्तं, सरस्वतीं नमस्यामि चेतनां हृदि संस्थितां मतिदां वरदां चैव सर्वकामफल प्रदां सुखमोक्षप्रदामित्यादिना बृहस्पतिश्च तत्सर्वं तस्या दर्शितवान् । तस्याः समुद्रा अधिक्षरन्ति तेन जीवन्ति प्रदिशश्चतस्रः क्षरत्यक्षरं तद्विश्वमुपजीवतीत्यादि श्रुत्याप्यस्या जगदुत्पादकत्व पालकत्वादिकमुक्तम् । अयमर्थः तस्या वाचः सकाशात् समुद्रान्मेघा नद्यश्च समुवति जलमस्मादिति व्युत्पत्तेः । अधि अधिकं प्रभूतमुदकं विक्षरंति वाग्देवतारूपेणान्तर्यामिणा प्रेरितामेघादयोजलक्षरणादिकं कुर्वन्ति । अक्षरं प्रधानं तदधिष्ठितं सत् क्षरति ईक्षणादिघटाद्यन्त कार्याकारेण परिणमते । अत्र तस्या इति तेनेति च स्त्रीपुलिङ्ग निर्देशेनास्या माया महेशोभयरूपत्वं ध्वनितम् । तच्च मायोपहितब्रह्मरूपत्वे पर्यवस्यति । इश्वरीसर्वभूतानां तामिहोपह्वये श्रियमिति लक्ष्म्याः सर्वेश्वरत्वं श्रूयते स्मर्यते च जगत्कारणत्वं सर्वात्मत्वमोचकत्वादिकं वैष्णवे नमस्ये सर्वभूतानां जननीमब्जसंभवात्त्वं सिद्धिस्त्वं स्वधास्वाहा सुधात्वं लोकपावनीत्यादिना शरीरारोग्यमैश्वर्यमरिपक्षयः सुखं देवित्वद्दृष्टि दृष्टानां पुरुषाणां न दुर्लभभगवान् ब्रह्मालोक पितामहः उत्पन्न उच्यते विद्वन्नित्य एवोपचारतः । 'एकार्णवे तु त्रैलोक्ये ब्रह्मा नारायणात्मकः भोगिशस्यागतः शेते त्रैलोक्यग्रासबृंहितः जनस्थैर्योगिभिर्देवश्चिन्त्यमानोऽब्जसंभवः प्रजाः ससर्ज भगवान् ब्रह्मा नारायणात्मकः इत्यादिना विधेर्जगदुत्पत्तिप्रलयहेतुत्वयोगिचिन्त्यत्वादिकमुक्तम् । एवं शैववैष्णवादि मतेषु दर्शितान्यतर्शितानि चापीदृशानि सर्वाण्येव स्मर्तव्यानि । एतानि च यदि संभवत्येकवाक्यत्वे वाक्यभेदो हि नेष्यत इति न्यायात् प्रागुदाहृत सामान्यवाक्यैरेकवाक्यतां नास्थितत्प्रतिपाद्यानां हरिहरादीनामेकवाक्यतापन्नानां संभूयैकार्थप्रतिपादकत्वमिति

CC-0 Agamnigam Digital Preservation Foundation, Chandigarh. Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

न्यायेनैकाद्वितीयब्रह्मरूपतोपेयते तदा प्रमाणानि भवन्ति। अन्यथा त्वन्योन्यं विरोधं प्राप्य विनिगमनाविरहेण सर्वाण्यपि सुन्दोपसुन्दन्यायाद्बाधितानि स्युः। न हि सर्वेषामन्योन्य भिन्नानां तत्तच्छास्त्रोक्तं सर्वेश्वरत्वाद्वयत्वादिकं संभवति विकल्पसमुच्चयादीनां प्रागेव निरस्तत्वात्। तस्मात् श्रुतिस्मृति प्रामाण्यमिच्छद्भिस्तदभेद एवोपेयः। प्रस्तुते उल्लंघ्य दुराग्रहात्कुतर्कैस्तद्भेदं साधयति। स न शैवो न वा वैष्णवः किन्तु नास्तिक एवेति मन्तव्यम्। यथाह हरिः श्रुति स्मृती ममैवाज्ञेयस्ते उल्लंघ्य वर्तते आज्ञाच्छेदी मम द्वेषी मद्भक्तोऽपि न वैष्णव इति। मनुश्च-श्रुतिस्तु वेदो विज्ञेयो धर्मशास्त्रं तु वै स्मृतिः ते भूतेयोऽवमन्येत हेतुशास्त्राश्रया च द्विजः ससाधुभिर्वहि कार्यो नास्ति, को वेदनिन्दक इति। ईदृशश्च बन्धुभिरपि त्याज्यः अपंथानं तु गच्छन्तं सोदरेऽपि विमुंचन्तीति न्यायात्। किं च दुराग्रही वैष्णवो वा शैवो वा पृष्टव्यो बुधैः "किं विष्णोर्भिन्नः शिवः शिवाद्भिन्नो वा विष्णुः"। नाद्यः- घटाद्भिन्नस्य पटादेरघटत्ववद्विष्णुभिन्नस्यअविष्णुत्वापत्त्यानन्दात्मकशिवरूपत्वमपि न स्यात्। "यो वै भूमा तत्सुखं नाल्पे सुखमस्तीति" श्रुतेः। पुरुषोत्तमाद्भिन्नस्यापुरुषोत्तमत्वं मुकुन्दभिन्नस्यामुकुन्दत्वं च ध्रुवम्। तथा चालं तदुपासनया मुमुक्षूणां न द्वितीयः। शिवशंभुशंकर महेश्वरभिन्नस्याशिवाशंभ्व शंकरामहेश्वरत्वापत्यानुपास्य प्रसंगात्। शिव एको ध्येयः। शिवंकर अन्यत्सर्वं परित्यज्येति श्रुतेः। अत एवोक्तं हरिवंशे न विना शंकरं विष्णुर्न विना केशवं शिवाद्भिन्नत्वमिति तु न वैष्णवैर्वक्तुं शक्यम्। एवमन्यत्रादर्शनात् न विना केशवं शिव इत्युक्तिविरोधाच्च स्वपक्षक्षतेश्च। तथा च सवध्यनां बध्यतो वा लोनानेनार्थेस्ति जीवता स्वपक्षहानि कर्त्तृत्वाद्यः कुलांगारतां गत इति न्यायविषयतां नातिवर्तते। एवं शैवमतेऽपि बोध्यम्। तस्मात्तल्लीला विग्रहावच्छिन्ने परे ब्रह्मणि नोपाधिकोऽपि भेदः कल्प्यः। तथा च व्याससूत्रं न स्थानतोऽपि परस्योभयलिंगं सर्वत्र हीति। अपि चैवमेके इति च स्थानत उपाधितोपि परस्येशस्योभ्यलिंगमनेकरूपत्वं नास्ति। सर्वत्र ब्रह्मपरेषु वेदान्तेषु तदेकत्वस्य श्रवणादित्यादि सूत्रार्थः। एके शाखिनो मृत्योः स मृत्युमाप्नोति इत्यादि भेद निन्दापूर्वकमभेदमेव परमात्मनः समामनन्तीति द्वितीयार्थः। तर्हि तत्तत्पुराणेष्वितरासाधारण्येन तत्तत्प्रतिपादनमप्रमाणं स्यात्। वैष्णवं शैवमित्यादि पुराणेषु संज्ञाश्चानर्थका स्युः। चतुर्भिर्भगवान् विष्णुर्द्वाभ्यां ब्रह्मा तथो रविः अष्टादश पुराणेषु शिष्टैस्तु भगवाञ्छिव इत्यादि प्रभासखण्डादिगतं विभागवचनं चाप्रमाणं स्यात्। तथा चाभेदवचः प्रामाण्यसाधने प्रवृत्तानां भवतामेकं संधित्सतो परं प्रच्यवत इति न्याय विषयत्वं दुर्वारम्। तथा चौपाधिको भेदोऽवश्यमभ्युपेय इति चेन्न। तत्तद्गुणकार्य सर्गादि प्राधान्य विवक्षया रज आद्यवच्छिन्न इव तत्तल्लीलाविग्रहा विच्छिन्नेऽपीशे तत्तच्छब्दप्रवृत्तिसंभवात् एतद्विवक्षयापि च संज्ञाभेदमात्रं [illegible] पूर्वोक्तं [illegible] तदुक्तं [illegible] सृष्टिस्थित्यन्ताः

CC-0 Agamnigam Digital Preservation Foundation, Chandigarh. Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

करणा ब्रह्मविष्णुशिवात्मकां स संज्ञां पाति भगवानेक एव जनार्दन इति। मार्कण्डेये अपि कृषीवलदृष्टान्तपूर्वकमेवोक्तम्। केचित्तु सत्त्वादिगुणावच्छिन्नेशवच्चतुर्भुजादिदेह वृत्तिजातिविशेषविशिष्टस्यापीशितुर्विष्ण्वादिशब्दवाच्यत्वम्। तथा च श्रुत्यादौ तत्तच्छब्देन तत्तन्मात्रव्यवहारोपपत्तिरित्याहुः। एवं च रुद्रशब्दितस्य तमोऽवच्छिन्न चैतन्यस्य चतुर्भुजदेहाभिमानित्वात् तदभिमानविषयस्य च त्रिनेत्र देहस्य विष्णुशब्दित सत्त्वावच्छिन्न चिदभिमानविषयत्वात्, चतुर्मुखदेहस्यापि तयोरभिमानगोचरत्वात्। रजोऽवच्छिन्नस्योभयाभिमानित्वाच्च यो विष्णुः स तु वै रुद्रो यो रुद्रः स पितामह इत्यादेरांजंस्यां चतुर्भुजदेहस्येव तदभिमानिनो हरिहरयोरपि हरिनारायणादि शब्दाभिधेयत्वान्नामानि तव गोविन्देत्यादेरांजस्यं उक्तविवक्षया संज्ञाभेदादसाधारण व्यवहारादेरांजस्येति सर्वं चतुरस्तं कारणीभुततमः प्रभृत्यवच्छिन्नस्येशस्य रुद्रादिसंज्ञा मैत्रायणीय शाखादौ श्रूयते।

अथ यो ह खलु वा वास्य तामसोंऽशोऽसौ सब्रह्मचारिणो योऽयं रुद्रः, अथ यो ह खलु वा वास्य राजसोंऽशोऽसौ सब्रह्मचारिणो योयं ब्रह्माथ यो ह खलु वावास्य सात्त्विकोंऽशोऽसौ सब्रह्मचारिणोयोऽयं विष्णुः स वा एकस्त्रिधाभूत इत्यादि। अयमर्थः। तामसः तमः प्रधानत्वेन तत्कार्यसंहार क्रियाप्रधानत्वेन वा विवक्षितोंऽशो इवांशो हे ब्रह्मचारिणो एव मग्नेपि न च तामसादि पदेन केवलतम आद्यवच्छिन्नो विवक्षितः। तम आदेरन्योन्य सहचरस्वभावत्वात् यथाहुः- सांख्याः अन्योन्यमिथुनवृत्तेय इति। आगमश्चात्र भवति अन्योन्यमिथुना सर्वे सर्वत्र गामिनः रजसो मिथुने ते सत्वरजसी उभे उभयोः सत्वरजसो मिथुनं तम उच्यते। नैषामादिः संप्रयोगो वियोगे नोपलभ्यते इति मिथुनपदेन सर्वत्राविनाभाववर्त्तित्वलक्षणं सहचरणशीलत्वं विवक्षितम्। तथा च यथोक्तव्याख्यानमेव तामसादिपदेषूचितम्। एतेन प्रलये तम एवावशिष्यते इत्यादि विकल्पानाप्यस्तेत्यलमतिप्रसंगेन। तथा मैत्रेय श्रूयतामेतद्यत्पृष्टोहमिह त्वया विष्णोरंशां च संभूति चरितं जगतो हितमित्यादि वैष्णवादौ कृष्णावादौ कृष्णादावप्यंशत्वव्यवहार औपचारिकः। न ह्येतत्पाषाणांशोऽयं कण इतिवत्संभवति निष्कलत्वश्रुतिविरोधात्। अत एवेन्दोरंशो गुरुरितिवदपि न तद्वदेव भिन्नत्वापत्तेश्च। नापि विंबप्रतिविंबभावेन सः अवताराणां जीवत्वापत्तेः। नन्वैश्वर्यावृत्तत्वाविद्यावद्विषय कर्मकर्तृत्वादि रूप जीवलिंगसत्वात् जगदुत्पादकत्वादीशलिंगासत्वाच्चेष्टमेव तेषां तदिति चेन्नूनं दुर्मतिरसि यतः। अजोऽपि सन्नव्यायात्मा इत्याद्यसंख्यवाक्यानि पश्यन्नपि न पश्यसीव कर्मकर्तृत्वं तु लोकानुग्रहायैवेशस्य यदि ह्यहं न वर्तेयमित्यादि तदुक्तेः। एवं रामादिष्वपि बोध्यम्। तमुदिश्योक्तं भगवतेस्त्रीसंगिनां गतिरियं प्रथयंश्चचारेत्यादि शिवावतारस्य भैरवस्य ब्रह्महत्याव्रताचरणां लोकसंग्रहायेति काशीखण्डादौ स्पष्टम्।

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

महादेवांशभूतमित्यादिनात्रांशत्वोक्तिरप्युक्तरत्यौपचारिक्येव। एवं श्रीगणेशस्य ब्रह्मवैवर्त्ते विष्ण्वंशत्वोक्ति अन्यत्र क्वचिद्वरांशत्वोक्तिः, क्वचिद्ब्रह्मांशत्वोक्तिर्या सापीदृशी गुहेपि क्वचिद् विष्ण्वंशत्वोक्तिः क्वचिद्ब्रह्मांशत्वोक्तिश्चैवमेवामल्लारिस्तु साक्षाच्छिव एव। न तत्रांशत्वकथापीति प्रसिद्धं ब्रह्माण्डपुराणे। कथं तर्हि रामकृष्णादौ गर्भवासादि पुरःसरं जन्मक्रमेण च बाल्याद्यवस्थाः युद्धे मूर्च्छादिकं भार्याद्यर्थं विलापादि चेति चेन्मायैव यतो दृश्यते एवेन्द्रजालवन्नतु वस्तुतोऽस्ति। अखण्डचिदानन्दघनत्वाद्रामादेः। तदुक्तं ब्रह्माण्डपुराणे स्त्रीपुंमलानुषंगात्मा देहो नास्य विजायते। किन्तु निर्दोषचैतन्यं सुशंनित्यां स्वकां तनुं प्रकाशयति सैवेयं जनिर्विष्णोर्नचापरा, तथाप्यसुरणोहार्थं परेषां च क्वचित् क्वचित् दुःखाज्ञान श्रमादींश्च दर्शयेच्छुद्ध सद्गुणः क्व ब्रह्मादि क्व चाज्ञानं स्वतन्त्राचिन्त्यस्तद्गुणे मोक्षाभावाय तेषां तु दर्शयेत् तानजो हरिः कृष्णो स्वत्यक्तदेहोऽपि त्यक्तदेहस्य देहवत् लोकानां दर्शयामास, स्वरूपसदृशाकृतिमिति विष्णोरित्युपलक्षणं नन्दगृहादौ दुर्गादिरवतारोप्येव तथा च रामावतारे शोकज्ञापनफलं रावणस्येश्वरत्वबुद्धिप्रतिबन्धेन मुक्त्यभावो मृत्युसिद्धिश्च मनुष्यातिरिक्तेन मरणाभावस्य तेन वृतत्वात्। कृष्णावतारे देहत्याग ज्ञापनस्य मर्त्यानां वैराग्यं फलं यत्तु वैष्णवे एवं संस्तूयमानस्तु भगवान् परमेश्वरः उज्जहारात्ममनः केशौ सितकृष्णौ महामुने। उवाच च सुरानेतौ मत्केशौ वसुधातले अवतीर्य भुवो भारक्लेशहानिं करिष्याम इत्युक्तम्। तस्यायं भावः। सुराः समस्ताः सुरनाथकार्यमेभिर्मया यच्च तदीश सर्वं आज्ञापयाऽज्ञाः परिपालयंतः सदैव तिष्ठाम सदाऽस्त दोषा इति सुरैरुक्तो भगवान्मम दुष्करं चेद्युष्माभिः सहाय्यं कार्यं स्यान्नत्वेवमस्ति भूभारनिवारणादौ कर्त्रन्तरापेक्षया महत्यपि कार्ये मत्केशयोरपि शक्तत्वादिति। न तु केशमात्रावतार इति भ्रमितव्यम्। ततः क्षयमशेषास्ते दैतेया धरणीतले प्रयास्यंति, न संदेहो मदृक्पातविचूर्णिताः। 'कृष्णाष्टम्यामहमुत्पत्स्यामी'त्यादिषु तत्रैव स्वावतारत्वोक्तिविरोधाच्च। अजरामरेशस्यार्द्धपलितत्वासंभवात्। एकः केश ईशेच्छया रामस्य श्वेतरूपज्ञापनार्थं तदेव श्वेतोऽभूदिति गम्यते। एतेनैतत्तुल्यं भारतवाक्यजातमपि व्याख्यातम्। तस्माद्ब्रह्मादौ मत्स्यादौ चांशत्वोक्तिरौपचारिकीति सिद्धम्। तच्चांशत्वं ब्रह्मादिष्वाविष्कृतोत्पत्त्यादि हेतुशक्तित्रयाल्पोत्पत्याद्येकैकशक्तित्वमेव; न तु स्वांशित्वेनाभिमतानन्तशक्तिमापीशापेक्षया वस्तुतोऽल्पशक्तित्वं संख्यातशक्तित्वेनानीशत्वापत्या तदशक्तित्वबोधकानन्तवाक्याप्रामाण्यापत्तेः। तस्मात्त्रिगुणमायोपहित एवेशो विषवृक्षोपि संवर्ध्य स्वयं छेत्तुमसाम्प्रतमिति न्यायात्तत्तदुपयोगि तत्तद्गुणमादाय तत्तद्विग्रहावच्छेदेनोत्पत्याद्येकैकं कर्म कुर्वन् ब्रह्मादि संज्ञामात्रभेदेन व्यवह्रियत इति सिद्धम्।

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

एवं मत्स्यादिष्वप्यवतार्यपेक्षयाविष्कृताल्पशक्तित्वमेवांत्वव्यवहारहेतुः। अल्पशक्त्याविष्करणमप्यधिकाया अनुपयोगान्नत्वभावात्। यथा हि कश्चित्सर्वशास्त्रज्ञो बहून्देशान्विचरन्यत्र यद्विद्योद्योगं पश्यति तत्र तामेव प्रकटयंस्तद्व्यवहारभाग्भवति यत्र तु सर्वोपयोगात्सर्वाः प्रकटयति तत्र सर्वज्ञोऽभिधीयते। तथा प्रकृतेऽपि। एवं चान्ये अंशकलाः कृष्णस्तु भगवान् स्वयमिति भागवतं सङ्गच्छते। कृष्णावतारे विश्वरूप दर्शनाद्यनेक शक्त्याविष्करणात्। अन्यत्र तथाभावात्। वस्तुतस्तु सर्वेषामप्यारोपितसर्वशक्तित्वाद्यनन्त-कल्याणगुणाद्वितीयब्रह्मरूपत्वमेव। सर्वत्र चोक्तलक्षणमौपचारिकांशत्वमपि। ये त्वाहुर्यस्मिन्नवतारे भगवतो विग्रहान्तरं नोपलभ्यते स पूर्णः यत्रोपलभ्यते सोंऽश इति तेषामीशस्वरूपं किमभिमतमिति तु त एव प्रष्टव्याः। किं चैषां तत्तत्कार्येषु प्रवृत्तिलिंगेन रजोऽवच्छिन्नब्रह्मरूपत्वं दैत्याद्युपसंहारलिंगेन रुद्रत्वं तस्य पालने पर्यवसितत्वेन विष्णुत्वं च नेयम्। एतेन गुहगणेशयोर्हरिहराद्यवतारत्वबोधक वाक्यस्य रामस्य क्वचिच्छिवावतारत्वोक्तेः क्वचित्काल्यवतारत्वोक्तेश्च विरोधोऽपास्तः। सर्वेषां सर्वावतारत्वोपगमेन प्रत्युत तेषां वाक्यानामनुकूलत्वात् मत्स्यादेर्विष्णुत्वं प्रसिद्धम्। विधित्वं तु वैष्णवेऽभिहितम्। सत्त्वोद्रिक्तस्तथा ब्रह्मा शून्यं लोकमवैक्षत तोयान्तः समहीं ज्ञात्वा जगत्येकार्णवे प्रभुः।

अनुमानात्तदुद्धारं कर्तुकामः प्रजापतिः अकरोत् स तनूमन्यां कल्पादिषु यथा पुरा मत्स्यकूर्मादिकां तद्वद्वराहवपुना स्थित इत्यादि शिवसहस्रनामादिषु सर्वावतारनामोपलंभात्तेषां रुद्रत्वनिश्चयः। प्रवृत्त्युपसंहारयोरपि पालने पर्यवसानेनास्य प्राधान्याद्विष्ण्वतारत्वव्यवहारप्राचुर्यं, यत्तु भागवते विराजं प्रस्तुत्योक्तम्। एतन्नानावताराणां निधानं बीजमव्ययं इति तदपि तात्स्थ्यात्ताच्छब्द्यमिति न्यायात्तत्रत्यविराडुपपादक शब्दजातस्य तत्स्थांतर्यामिपरत्वादविरुद्धम्। एते च लीलाविग्रहा अनन्ताः।

नन्वीशस्य ब्रह्मादि संज्ञा अपि रामादि संज्ञावल्लीलाविग्रहमात्र कृता एक किं न स्युरिति चेन्न। चतुर्मुखादि विग्रहाणां प्रतिमहाकल्पभेदेनानंत्याद्ब्रह्मादेरप्यानंन्त्यापत्तेः। एतेनैक एवेशस्तन्तद्विग्रहावच्छिन्नो विष्णुशिवादि व्यपदेशभागिति तार्किकमतं निरस्तम्। एकैकस्यापि विग्रहबहुत्वस्मरणेन प्रतिकल्पं तद्भेदेन च तेषामपि मत्स्यादिवदानंत्यापातात् न चेष्टापत्तिः। एको विष्णुरेको रुद्र इत्यादि श्रुतिविरोधात्। तस्मात्सत्त्वाद्यवच्छेद कृता एव विष्ण्वादि संज्ञा भेदः। स च तत्तद्गुण कार्यतत्तत्क्रिया प्राधान्यविवक्षया तत्तद्विग्रहावच्छिन्नेपीशे स वर्तत इत्येव साधु। यत्तु केचिन्मन्यन्ते विग्रहबोधकश्रुत्यादेरुपासना परत्वादारोपितविग्रहेणाप्युपासनासिद्धेर्नेशस्योक्तविग्रहासिद्धिरिति। तन्न। उपासनापरेभ्योऽप्यविरोधे देवताधिकरणन्यायात् प्रतीयमानार्थसिद्धेरनिवार्यत्वात्। न

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

चापाणिपाद इति श्रुतिविरोधोऽस्तीति वाच्यम्। निर्गुणश्रुतिविरोधात् सत्यकामादि गुणानामप्यनभ्युपगमापत्तेः। इष्टापत्तिरिति वदतां तु सत्यकामादि गुणोपदेशे तद्गुण ईश्वरः प्रसिध्यतीति व्यतिहाराधिकरण भाष्यविरोधः। मायिकागुणावास्तवं निर्गुणत्वं न विघ्नन्तीति न्यायस्त्विहापि समः। यन्नृरूपोपन्यासाच्चेति सूत्रे विग्रहोपन्यासपरत्वेन सूत्रव्याख्यानानन्तरं ब्रह्मणो विग्रहाभावात् तद् व्याख्यानमयुक्तं मन्यमानानामन्यथाव्याख्यानमुपन्यस्तं भाष्यकारैस्तन्मुण्डकश्रुतौ निर्विशेष ब्रह्मपरोपक्रमविरोधान्न विग्रहोपन्यासः संगच्छत इत्याशं येन उक्तश्च तैरेवान्यत्र विग्रहसद्भावः स्यात्परमेश्वरस्यापीच्छावशान्मायामयं रूपं साधकानुग्रहार्थमिति सूत्रकारेण च भोगमात्रसाम्यलिंगाच्चेत्यहंग्रहोपासकानां ब्रह्मणश्च भोगसाम्यं वदता स्पष्टीकृतं शरीरसापेक्षे वैषयिकानन्दे भोगशब्दप्रसिद्धेः। न च वाग्धेन्वादिवद्ध्यानायारोपिता एव देहा इति शक्यं वक्तुम्। छान्दोग्ये समानप्रकरणे गुणोपसंहारन्यायेनोपास्यब्रह्मण उदाहृतमन्त्रवर्णादि सिद्धविग्रहसिद्धवत्कारेण एष आत्मापहतपाप्मा इत्यादिना देहित्वसाम्यात्प्रसक्तानां जरादीनां निषेधदर्शनात्। अन्यथा प्राप्तनिषेधापत्तेः। न च देहवदजरत्वादयोऽपि ध्यानायाऽऽरोपिताः तत्रैवास्मिन् कामाः समाहिताः इत्यादिना तेषामनारोपितव्यावहारिकेशगुणत्वस्फुटीकरणात्। नन्वजरत्वादि न देहगुणत्वेनोपास्यं 'एष आत्मा' इत्यादिनात्मगुणत्वोक्तेः तद्गुणैः सत्यकामादिभिः सहपाढाच्च यत्प्रायेश्रूयते यच्च तत्तादृगवगभ्यते इति न्यायेनात्मगुणत्वसिद्धेः। तत्र तत्प्रसक्त्यभावेऽपि स्वतःसिद्धमेव तदुपास्यतया निर्गुणप्रकरणास्थाजरत्वादिवन्निर्दिश्यत इति चेन्न। सर्ववेदान्त प्रत्ययन्यायेन तत्र विग्रहविशिष्टस्यैव ब्रह्मण उपास्यत्वे स्थिते औचित्यात् कोटिशोदृश्यमानो पबृंहणानुरोधाच्चाजरत्वादेर्विग्रहगुणत्वसिद्धेः स्वधीकल्पितैर्न्यायैर्व्यवस्थापनादुपबृंहणानुरोधाद् व्यवस्थापनं ज्यायः। विभेत्यल्पश्रुताद्वेदो मामयं प्रतरिष्यति इतिहासपुराणाभ्यां वेदार्थमुपबृंहयेत् वेदार्थो यः स्वयं ज्ञातस्तत्राज्ञानं भवेदपि ऋषिभिर्निश्चिते तस्मिन् का शंका स्यान्महात्मनामिति स्मृतेः। तथा च तस्योपरि शिवं ध्यायेत् सांबं सर्वमनोहरं सर्वलक्षणसम्पन्नं गाढयौवनशौभनमित्याद्युपबृंहणानुरोधाद्विग्रह गुणत्वेनैवान्वयो युक्तः। तथात्वेऽपि तद्वारा आत्मगुणत्वसंभवेन तद्व्यपदेशस्य तद्गुणैः सह पाठस्य च त्रिलोचनं नीलकण्ठमित्यादविवोपपत्तेः। पुराणैर्निर्णीतेऽर्थे संशयाद्ययोगाच्च। न च तेषामप्यर्थवादत्वं कल्प्यं पुराणेष्वर्थवादत्वं ये वदन्ति नराधमाः तैरार्जितानि पुण्यानि तद्वदेव भवन्ति हीत्यादि तन्निन्दास्मरणात्। तस्माद्विग्रहगुणस्य अजरत्वादेः स्वरूपतो विद्यमानत्वेन निर्दिश्य उपास्यतया विधानेनानारोपितत्वाध्यवसायाद्धर्मिणो विग्रहस्याप्यानारोपितत्वं निश्चीयते। अतोऽगीकार्या एव मायिनो महेशस्य पूर्वोक्ताः शास्त्रसिद्धाः स्त्रीपुमाकारा विग्रहास्त्याज्या य विनानुयायिता एते च विग्रहा मायामात्रस्वरूपाः। 'आकाशशरीरं ब्रह्मेति' श्रुतेः। एषा

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

मायासृष्टा यन्मां पश्यसि नारद। सर्वभूतगुणैर्युक्तं न तु मां द्रष्टुमर्हसीति स्मृतेश्चेति केचित्। अन्ये तु सर्गादिषु स्वयं भान्ति ब्रह्माद्या ये स्वयं भुवः, विज्ञप्तिमात्रदेहास्ते सर्वात्मानः सदास्थिता इत्यादि वासिष्ठादिवचांस्याश्रित्य चिन्मात्र स्वरूपा एव ते माया तु शुद्धचैतन्यविग्रहाकारेण भाने निमित्तमित्याहुः। अवतारा अपीदृशा बोध्याः।

ननु सत्यसंकल्प ईशः किमिति नरतिर्यगादि भावेन युद्धैश्च क्लिश्यतीति चेत् भक्ताभिध्यानाय मनोहराणि चरितानि तत्तद्भूयैर्विधत्ते; तद्रूपधारणमपीशस्य तादृगेव नत्ववतार्यवतारदेहेषु अणुरपि विशेषः क्लेशहेतुरस्ति। तदुक्तं शिवरहस्ये जगद्रक्षायै त्वं नटसि, ननु वामैव विभुतेति नटसि नटवदाचरसि भैरवाद्यैर्मत्सायाद्येश्चावतारैर्विहरसीत्यर्थः। स्कन्दश्च कृष्णं प्रस्तुत्याह स्कान्दे कैवल्यं यत्परं ब्रह्म निराकारमगोचरं तच्च मूर्त्या परिणतं भक्तानां भक्तिहेतुत इति अभियुक्तैश्चोक्तम्। परमिममुपदेशमाद्रियध्वं निगमवनेषु नितान्तखेदखिन्नाः विचिनुतभवनेषु वल्लवीनामुपनिषदर्थमुलूखले निबद्धमिति युद्धमपीशस्यासुरोद्धारार्थमेव। तदुक्तं मार्कण्डेये दृष्टैव किं न भवती प्रकरोति भस्मसर्वासुरानरिषु यत्प्रहिणोषि शस्त्रं लोकान् प्रयान्तु रिपवोपिहि शस्त्रपूता इत्थं मतिर्भवति। तेष्वहितेषु साध्वीति न च युद्धं तस्य क्लेशावहं किन्तु क्रीडैव। मोहादेस्तु नाद्यत्वं प्राङ्निवेदितम्। हरिवंशे च निकुंभ परिघप्रहारान् मूर्च्छित इत कृष्णोऽभिहितं नूनमात्मेच्छया कृष्णस्तथा चक्रेसुरोत्तमः, को हि शक्तो महात्मानं युद्धे मोहयितुं हरिमिति। न चात्र त्वन्मुखाभेच्छया नूनं पद्मैर्वैरायते शशीत्यत्रेव नूनमित्युत्प्रेक्षायामिति भ्रमितव्यम्। यैस्तु भक्त्या स्मृता नूनं तेषां मृद्धिः प्रजायते इत्यत्रेव निश्चयार्थत्वात्। किं चेशमायाया अचिन्त्यत्वेन अतर्क्यत्वात्तन्मयानि चरितानि अप्यतर्क्यानि। नैषा तर्केण मतिरापनेयेति श्रुतेः, अचिन्त्याःखलु ये भावानंतांस्तर्केण चिन्तयेदिति वृद्धोक्तेश्च। तस्मादतर्क्येऽर्थे शास्त्रेणैव निर्णयः। शास्त्राच्चैकमेवाद्वितीयं ब्रह्म स्वमायया हरिहरोद्याकारै रमोमाद्याकारैर्मत्स्यभैरवाकारैश्च प्रतीयते इति निश्चीयते। अतोऽयमेवार्थः श्रद्धेय आस्तिकैः। ननु हरादेरेक ब्रह्मरूपत्वं चेत्तर्हि तत्तन्माहात्म्यपरपुराणादिष्वितरनिन्दा न स्यात्। दृश्यते च सा तथा च तदन्यथानुपपत्त्या साम्यमपि दुर्लभम्। ऐक्यस्य तु का कथा ततश्च यतन्तमनुधावतो बद्धोऽपि गत इति न्यायापात इति चेदत्र केचिदाहुः। उपलशुनकन्यायाद्भेदवादिनः को योत्पादनाय तदिष्टदेवस्यान्यपरपुराणेष्वपकर्षवर्णनमिति परे तु प्रागुक्त वचांस्याश्रित्य कल्पभेदेन स्वेच्छया परस्परस्माज्जन्मनिमित्तकं क्वचिदुत्कर्षापकर्षवर्णनमित्याहुः। नहि निंदानिंदितुं प्रवर्त्तते अपि तु विधेयं स्तोतुमिति न्यायाद्विधेयंस्तूयते वस्त्विति न्याय प्राप्ततत्तद्विग्रहावच्छिन्नेशध्यानादि स्तुतये तदन्य विग्रहावच्छिन्नेशापकर्षणं एव। तच्च यत्परः शब्द इति न्यायात्स्तुतिपरमेव

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

नत्वन्यनिंदापरमपि (यि?) फलाभावात्। उभयपरत्वे वाक्यभेदापत्तेश्च। अन्यत्रापि ह्येवं दृश्यते तद्यथा सर्वशाखाप्रत्ययमेकं कर्मेति न्यायान्नानाशाखाविहितमप्यग्निहोत्रं न भिद्यते इति स्थिते 'केचिदुदिते जुहोति' इति श्रुतिमाश्रित्योदितेऽर्के होमं कुर्वन्ति केचिदनुदिते जुहोतीति श्रुतिमवलंब्य अनुदिते जुहोति। तत्र ये शाखिन उदिते जुह्वति उदयत्तु खलु वा आदित्य आहवनीयेन रश्मीन् संदधातीत्युपक्रम्य प्रातः प्रातरनृतते वदन्ति पुरोदया जुह्वति येऽग्निहोत्रं दिवा कीर्त्त्यमदिवा कीर्त्तयन्तः सूर्यो ज्योतिर्न तदाज्योतिरेषामित्यनुदित होमं निन्दन्ति ये त्वनुदये जुह्वति ते आदित्यो वा अस्तंयन्तग्निमनुप्रविशतीति श्रुतिमुपजीव्य यदुदिते सूर्ये प्रातर्जुहूयाद्यथाऽतिथये प्रद्रुता पशून्यायावसथायाहार्यं हरति तादृगेव तदिसदित होमं निन्दन्ति, अनयोः स्वार्थतात्पर्यकल्पने रागप्राप्तसुरापानादिवत्कालद्वयेऽपि त्याज्यस्य शेषिणो होमस्यैव बाधः स्यात्तथा च यावमग्निहोत्रं जुहुयादित्यादयश्चोदना उपरुध्येरन्। एवं च कालभेदेन अग्निहोत्रमिव गुणभेदेन विग्रहभेदेन वानेशो भिद्यते, ततश्च य एकस्मिन्नीशे गुणादिभेदेन भेदं प्रकल्प्यैकविग्रहावच्छिन्नमुपासीनोऽन्यं निन्दति स ईशविमुखः स्वामिद्रोहान्नरकमेतीति ज्ञेयम्। तस्मान्नैतावता सर्वविग्रहावच्छिन्नेशैकत्व विद्यातः शंक्य इत्यन्ये। ननूमादेर्बहुषु पुराणादिषु शक्तित्वोक्तेः कथमीशत्वमिति चेत्तर्हि सेयं चैतन्यदीप्ता ब्रह्म विष्णु शिवरूपिणीत्यादि श्रुतौ शक्तयो यस्य देवस्य ब्रह्मविष्णुशिवादि पुराणे च ब्रह्मादीनामपि शक्तित्वोक्तेरीशत्वं न स्यात् तेषामीशत्वबोधक शास्त्रात्तत्त्वमिति चेत्तदत्रापि तुल्यमिति न वयं पर्यनुयोज्याः। यत्रोभयोः समो दोषः परिहारोऽपि वा समः नैकः पर्यनुयोक्तव्यस्तादृगर्थविचारण इति न्यायात्। तथा च चित्प्राधान्य विवक्षायामीशत्वस्योपाधि प्राधान्यविवक्षायां शक्तित्वस्योपाधेर्मिथ्यात्वेनात्यंतोपेक्षायां शुद्धचिन्मात्रत्वस्य च व्यपदेशः सर्वत्र समः। तस्मान्न कथमपि भेदलेशावकाशः। येषां तु धीमांद्याद्भूयोभूयो श्रूयमाणोप्यभेदो न बुद्धिमारोहति तेस्तूपवासाद्वरं भिक्षेति न्यायेन भेदबुद्ध्यापि स्वप्रेमास्पद विग्रहावच्छिन्नेशाराधनं कार्यं तत्प्रसादान्मेघोदये शालिसमृद्धौ कोद्रवाशनन्यायेन त्याज्या भेदधीः, भेदधियात्तस्यापि किञ्चित्पापंस्यत्तन्निन्दाश्रवणादिति चेत्तर्हि तदपि कूपखानकन्यायेनेशभक्तिजसुकृतैर्नाश्यते वस्तुतस्तु भेदधीनिंदाये दुराग्रहेण तां न त्यजन्ति तद्विषयापेक्षयास्तभेदधियोपि भवान्तरीय भाववशेनैकविग्रहध्यानादावेवप्रवर्त्तन्ते। ते तु न निन्द्याः। अनेक मूर्त्तिध्यानादेर्युगपत्कर्तुमशक्यत्वात् कालभेदेनानुष्ठाने चित्तस्थैर्यासिद्धेः। अन्यत्र प्रवृत्तस्य जन्मान्तरीयध्यानादिरूपचित्तवृत्तिप्रवाहस्य निम्नगा प्रवाह न्यायेनान्यत्र नयनेऽतिक्लेशाच्च। यथाह श्रीहरिः। पूर्वाभ्यासेन तेनैव ह्रियते ह्यवशोऽपि स इति। न चैवं भेदबुद्ध्यनुवृत्तिरपि स्यात् परमेश्वर प्रसादास्पदित शाब्ददैशिक पूर्वकाभेदधिया तन्निवृत्तेः। प्रत्यगभिन्न ब्रह्मबुद्धौ

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

सत्यां तु शते पञ्चाशत् इति न्यायेनैतद्बाधस्याप्ययत्नसिद्धेश्च। एक विग्रहविषयत्वनियमोऽपि ध्यानादेरेव वा स्वपूजादि तु पञ्चाङ्गपूजादि विधिसामर्थ्यात् सर्वविषयं कार्यं यस्त्वनेकजन्मार्जितपापपुञ्जजन्य दुराग्रहादेकभक्तिछलेनान्यं निन्दति, असकृदबोध्यमानोऽपि चार्जुमार्गेणाभेदं नोपैति भ्रामयति च मन्दान् स यादृशो यक्षस्तादृशो बलिरिति न्यायात्तत्प्रतिपादितोत्कर्षापकर्षविपरीतोत्कर्षायकर्षोपपादनेन विजित्य पश्चात्पूर्वोक्तरीत्यात्यन्ताभेदोपपादनेन बोधनीयः। एवं हि स मारणायगृहीतोंगछेदे स्वीकरोतीति न्यायेनाभेदं स्वीकरिष्यति, स्वयं तु शिष्टैर्हरिहरादि भेदधीः स श्वमांसेव श्वपाकी दूरतस्त्याज्या ये तु दुराग्रहात्तां न त्यजन्ति ते नास्तिका एवेति दिक्। श्रुतिस्मृतिपुराणादि सिद्धाभेदापमानिनो ये ते चेदास्तिकास्तर्हि नास्तिका वद कीदृशाः? आनन्दामृतसागरे सुमनसां ध्यानादि मंथोद्भवः प्रेमाख्यो हि हिमांशुराविर भवत्पुण्यौधरहिमव्रजं स्वर्य्यस्मिन्स सुशैत्य संचरवशात्सान्द्रत्वमापादयन् मन्ये ते न सुखांबुधिर्विजयते संप्राप्यमूर्त्तित्रयमिति। 'एकमेवाद्वितीयं' 'नेह नानास्ति किञ्चन' यदा ह्येवैष 'एतस्मिन्नुदरमन्तरं कुरुतेऽथ तस्य भयं भवति'। 'द्वितीयाद्वै भयं भवन्ति'। 'मृत्योः स मृत्युमाप्नोति'। 'य इह नानेव पश्यती'त्यादि श्रुतयस्तु जीवेशयोर्जीवानां च परस्परमात्मानात्मनोरनां चान्योन्यं भेदमपि वास्तवं न सहन्ते नानेवेति इव शब्देन यो व्यावहारिकमपि नानात्वं पश्यति सोप्यानर्थादनर्थान्तरमेति चेत्तर्हि वास्तवं तं पश्यतः का कथेति सूचितम्। तस्मात्तुच्छमेव द्रष्टव्यं तुच्छत्वबोधश्चैताभिः श्रुतिभिरेव भवति। तदुक्तं तुच्छानिर्वची (चनी) या च वास्तवा चेत्यसौ त्रिधा ज्ञेया माया त्रिभिर्बोधैः श्रौतयौक्तिक लौकिकैरिति। परं तु वास्तव नानात्वभ्रमनिरासाय सोपानारोहणन्यायात्ततुच्छत्वबोधोदयाय च तदनिर्वचनीयत्वबोधक सत्तर्का अप्युपेयाः। न हि श्रुत्यापि सकृदेव तुच्छत्वं बोधयितुं शक्यम्। जातोऽपि वा बोधो न स्थिरीभवति। अन्यथा मननविध्यानर्थक्यापत्तेः। नन्वेकमेवाद्वितीयमिति कथमद्वैतं बोधयति यदि यदेकमेव तदद्वितीयं यदद्वितीयं तदेकमेव वा बोधयेत उभयथाप्यप्रमाणमिदं वाक्यं स्यात्। यदिदं द्वैतं तदद्वितीयमिति कल्पने तु 'माता मे वन्ध्येति'वत्केवलं वक्तुर्लज्जापादकमिदं वाक्यं स्यात्।

उच्यते-कार्यस्य हि द्वैतस्य कारणसत्तैव सत्ताकारणं चास्य ब्रह्मैव सदेवेति पूर्ववाक्येन तथावधारणात्। वाक्यशेषेण च कारणस्य ब्रह्मणः सजातीयादि भेदनिरासेनाखण्डैकरसत्वं बोध्यते।

नन्वेकाकिनी प्रतिज्ञा हि प्रतिज्ञानं न साधयेदिति न्यायेन प्रतिज्ञयार्थसिद्ध्यभावान्नाद्वैतं साधयितुं पार्यते। भेदवादिनो हि जीवेशाभेदमपि न क्षमन्तेऽन्यस्य का कथा। तद्भेदेपि किं मानमिति चेन्नाहमीश्वर इति प्रत्यक्षमवेहि न चेदं भ्रमः अबाधात्। अहमीश्वर इति

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

प्रत्यक्षानुपलब्धेः । मानान्तरस्तूपजीवकत्वेन बाधकत्वायोगादिति चेन्न । नह्यात्मनीशभेदप्रत्यक्षं भवति हेत्वभावात्। न हि बहिरिन्द्रियं तत्र हेतुः रूपादिरहितेशग्रहेऽसमर्थस्यास्य तद्भेदग्रहेऽप्यसमर्थत्वात् । नापि मनः तस्य प्रमाणसहकारित्वेनालोकादिवदप्रमाणत्वात् । न च परोत्प्रेक्षिते क्रमककार्यजनकेऽणौ मनसि मानमप्यस्ति सर्वेन्द्रियेषु तत्तद्विषयसंबद्धेषु युगपदनेकबोधोदयस्य केषुचिन्मेधाविष्वनुभूयमानतया तदनुत्पत्तिरूपलिंगस्यासिद्धेः । शतपत्र पत्रशतभेदन्यायेन क्रमे सत्यपि सूक्ष्मकालभेदस्य दुरवगाह्यतया तत्र यौगपद्यमस्य यो भ्रम इति चेन्न । बाधाभावात् । किं च प्रत्यक्षेणोपलब्धुं योग्यस्य प्रतियोगिनोऽनुपलंभो योग्यऽनुपलंभः सो भावरूपभेदग्राहकेन्द्रियस्य सहकारी वाच्यः। स च मनसेशभेदग्रहेन संभवति तत्प्रतियोगिनः ईशस्य प्रत्यक्षत्वायोग्यात् । न च योग्यत्वमनुपलब्धेरेव विशेषणम् । तच्चानुपलब्धेस्तद्ग्राह्याभावप्रतियोगि तद्व्याप्येतरसकलतदुपलंभककालिकत्वमेवेति वाच्यम्। प्रतियोगिप्रत्यक्षजनकस्य तदुपलंभकपदाभिलप्यत्वात्तत्प्रत्यक्षस्याभावप्रत्यक्षे हेतुत्वापत्योक्तदोषान्निस्वारेण घटकुटीप्रभातन्यायापत्तेः । ननु यत्र यत्सत्वमनुपलंभविरोधि तत्र तदभावः प्रत्यक्षः । ततश्च स्तम्भे पिशाचाभेदसत्वे स्तम्भा चेदवत्तस्याप्युपलंभापत्यानु- पलंभविरोधित्वात्तदभावः रूपपिशाच भेदः स्तंभः पिशाचो न भवति इति यथास्तंभे प्रत्यक्षस्तथा जीवे ब्रह्मभेद सत्त्वे जीवाभेदवत्तदनुपलंभायोगात्तत्र तदभावरूपो ब्रह्म भेदः प्रत्यक्ष इति चेन्न । साक्षादभावविरोधित्वं हि प्रतियोगिन एव। अन्यस्य तु तद्व्याप्यत्वेनेति स्थितिः। तथा च प्रतियोगि सत्वस्यानुपलंभविरोधित्वं तत्प्रतियोग्युपलंभव्याप्यत्वेनैवेति वक्तव्यम्। एवं वान्यत्र प्रतियोगिसत्वस्याभावस्थलीयोपलंभाव्याप्तत्वेन तत्रत्यानुपलंभ विरोधित्वायोगात्। यत्र यत्सत्वमित्यादि वदताऽभावाधिकरण एव प्रतियोगिसत्वम् । तदुपलंभश्च वक्तव्यः । ततश्च नाभावधीसंभव इति वरघातायकन्यावरणमिति न्यायापातः। 'यन्मनसा न मनुत" इत्यादि श्रुतिनिषिद्धं चात्मनो मनोविषयत्वं औपनिषदत्व विशेषणेनापि चात्मनो गम्यता निषिध्यते। सर्वं विशेषणं सावधारणमिति न्यायात् । यद्यपि 'यतो वाचो निवर्तन्ते' इत्यादि श्रुतेर्न शब्दशक्यं ब्रह्म तथाप्यौपनिषदत्वश्रुतेर्वेदान्तप्रमाणकं तदिति निश्चीयते । प्रमाणकृत्यं च तस्मिन्नज्ञाननिवृत्तिरेव नानधिगतार्थाधिगतिः स्वप्रभत्वात्तस्य अज्ञानबाधश्च जीवेशाभेद विषयकत"त्त्वमस्या"दि वाक्यजबोधेन तत्र हि तत्त्वं पदयोः सामानाधिकरण्यं प्रतीयते तच्च प्रकारान्तरेणाघटमानं लक्षणया प्रत्यग्ब्रह्मैक्ये वाक्यपर्यवसानं गमयति। तथा हि न भावद्वैश्वदेव्यामिक्षेतिवदुभयोरेकर्थाभिधानेन सामानाधिकरण्यं भिन्नार्थवाचकत्वात्। नाप्यजहत्स्वार्थयोर्विशेषणं विशेषभावेन नीलमुत्पलमितिवद्युज्यते। विरुद्धार्थयोस्तदयोगात् न वा जहत्स्वार्थत्वेन संबन्धिलक्षणया कुसुमितद्रुमा गंगेतिवदुपपत्तिः । एकार्थत्वस्य विवक्षितत्वात् । अतो जहदजहल्लक्षणया

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh. Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

विरुद्धांशत्यागेनानुगतचिदंशोपादानेन चैक्य एव पर्यवसानं लक्षणा च न पदमात्रवृत्तिः। किन्तु वाक्यवृत्तिरपि। यथा गभीरायां नद्यां धोष इत्यत्र यदद्वयस्य तीरे शक्त्या पदसंबन्धेन यत् ज्ञाप्यते तत्संबन्धो लक्षणाशक्तिज्ञाप्यश्च। यथा पदार्थस्तथा वाक्यार्थोऽपीति न काचिदनुपपत्तिः। अत एव विध्यपेक्षितप्राशस्त्यप्रत्यायकतयार्थवादपदानां पदस्थानीयतया विधिवाक्यैनैक्यवाक्यता भवतीत्यर्थवादवाक्यानां पदैक्यवाक्यता। यत्र तु प्रत्येकं भिन्न भिन्नसंसर्गप्रतिपादकयोर्वाक्ययोराकांक्षावशेन महावाक्यार्थबोधकत्वं तत्र "नष्टाश्वदग्धरथ"न्यायेनान्योन्याकांक्षितांगाङ्गिभावबोधकतया वाक्यैकवाक्यता यथा 'दर्शपूर्णमासाभ्या"मित्यादेः 'समिधोयजती'त्यादेश्च। तदुक्तं भट्टपादैः स्वार्थबोधे समाप्तानामङ्गाङ्गित्वाद्यपेक्षया वाक्यानामेकवाक्यत्वं पुनः संहत्य जायत इति प्रकृतमनुसरामः। तस्माद्वाक्येऽपि लक्षणासंभवाद्वेदान्तानां लक्षणया निर्विशेष ब्रह्म प्रतिपादकत्वादस्य श्रुति विरोधः। मनसस्तु न लक्षणादिकं संभवति शब्दवृत्तित्वात्तस्य 'नाहमीश' इत्यनुभवस्त्वविद्यावृत्ति रूपो भ्रम एव। स विशेषणे हि वर्तमानौ विधिनिषेधौ सति विशेष्यबाधे विशेषणं समुपक्रामत इति न्यायेनोपाधिभेद विषयो नन बोधाः। विशेष्यांशे च श्रौतो बाध उक्त एव। न चानुभवेन श्रुतेर्बाधः शक्यः। श्रुतेर्निरवकाशत्वान्निरवकाशस्य च सावकाशनिरवकाशयोर्निरवकाशो बलीयानिति न्यायाद्बाधकत्वोपपत्तेः। ननु जीवेशयोः क्वचिद्भेदः क्वचिच्चाभेदो निर्दिश्यते तथा च यद्यभेद एव गृह्येत तदा भेदनिर्देशो निरालंबनः स्यात्। न चैतद्युक्तं तस्मादहिकुण्डलन्यायेन जीवेशभेदश्रुती तयोस्तात्त्विकत्व(भु)तुपेत्यैव व्याख्येये यथैकस्याहेरहित्वेनाभेदस्तस्यैव कुण्डलावस्थस्य प्रांशुत्वावस्थाद्भेदश्च तात्त्विकः। एवं ब्रह्मणोऽपि चैतन्यरूपेणाभेदः जीवत्वेश्वरत्वरूपेण भेदश्च तात्त्विक इति। यद्वा जीवचैतन्यमीशचैतन्यं च वस्तुतो भिन्नमेवास्तु, अभेदनिर्देशस्तु प्रकाशाश्रयन्यायेन चैतन्यरूपत्वसाजात्येन द्रष्टव्यः। यथा रवेस्तदाश्रितप्रभारूपद्रव्यस्य च सत्यपि भेदे तेजस्त्वरूपसाजात्येनाभेद निर्देश इति चेन्न। तात्त्विकभेदावलंबिनोः पक्षयोः श्रुत्यादिविरुद्धत्वात् भेदश्रुतिस्त्वनृतभेदेनाप्युपपद्यते। एतेन श्रुतेर्भेदे प्रमाणत्वं निरस्तम्। अत एवार्थापत्तिरपि न तत्र मानम्। तात्त्विकभेदादृतेऽनुपपन्नार्थाभावात् विरुद्धधर्माक्रान्तत्वहेतोस्तु भेदसिद्धेः प्रागसिद्धिरेव। ननु श्रुतित्वसाम्येऽद्वैतश्रुतेरेव कुतः प्राबल्यमिति चेत्तात्पर्यवत्वात् इत्येव हि। तदपि कुत इतिचे"दुपक्रमोपसंहारावभ्यासोऽपूर्वताफलम्। अर्थवादोपपत्ती च लिंगं तात्पर्य निर्णये" इत्यभियुक्तप्रसिद्धतात्पर्यलिंगैरिति गृहाण। तत्र सदेवेत्युपक्रम्यैतदात्म्यमिदं सर्वमित्युपसंहरति। इदमुपक्रमोपसंहारैकरूप्यं तात्पर्यलिंगम्। तथा तत्त्वमसीति नवकृत्त्वोऽभ्यासः रूपादिहीनाद्वितीयब्रह्मणः परिनिष्ठितरूपत्वेऽपि मानान्तरायोग्यत्वादपूर्वत्वमुक्तम्। अत्र वाव [illegible] ब्रह्म न जानासीत्यर्थः। तस्य तावदेव

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh. Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

चिरमित्यादि ब्रह्मबोधात्फलमुक्तम्। 'अनेन जीवेनात्मना इत्याद्यद्वितीयज्ञानार्थोऽर्थवादः मृदादिदृष्टान्तैः प्रकृत्यतिरेकेण विकारो नास्तीत्युपपत्तिरुक्ता। एवं षड्विधानि तात्पर्यलिंगानि व्यस्तानि समस्तानि च प्रतिवेदान्तं दृश्यन्ते। ननु "द्वासुपर्णे"त्यादि भेदेऽप्यस्ति मानम्। उपक्रमादयोऽ पि तत्र संन्तीति कथमभेद एव तात्पर्यम्? तथा हि 'द्वासुपर्णे'त्युपक्रमः परमं साम्यमुपैतीति उपसंहारः। तयोरन्यः अनश्नन्नन्यः अन्यमीशमित्यभ्यासः, ईशस्यापूर्वत्वात्तदभेदोऽप्यपूर्वः। पुण्यपापे विधूयेति फलम्। 'अस्य महिमानमिति अर्थवादः। अन्नस्यभित्युपपत्तिः अत्र द्वित्वं साम्यं च भेदव्याप्यम्। अभ्यासे तु कण्ठोक्त एव भेद इत्युच्यते। 'कस्मिन्नु भगवो विज्ञाते' इति परमोपक्रमेऽभेदस्यैव प्रक्रान्तत्वान्नायमुपक्रमः, नापि द्वित्वं भेदव्याप्यं रामकृष्णावित्यादौ तथानुपगमात् परममिति विशेषणादुपसंहारोऽपि न भेदपरः। अभ्यासस्त्वतात्त्विक भेदपरः, ईशोऽपि सामान्यतोऽनुमितो भेदप्रतियोगीति नापूर्वोऽस्य भेदः। फलार्थवादौ त्वस्माकमपि न प्रतिकूलाविति भेदे तात्पर्यलिंगाभावान्न भेदे वेदतात्पर्यम्। अस्ति चाभेदे तत्सत्वात्। तथा चोपपन्नमभेदश्रुतोऽप्राबल्यं पूर्वकाण्डस्यापि परंपरया ब्रह्मपरत्वं स्वर्गादिफल प्रदर्शनं तदक्षय्यत्वादि प्रदर्शनं च गुडजिह्विकान्यायेनाज्ञतोषार्थं यत्कृतकं तदनित्यमिति न्यायेनानित्ये तत्र श्रुतितात्पर्यायोगात् इत्यलं विस्तरैः जीवानामन्यो य तात्त्विकभेद एकेनेशेनाभेदासंभवात्तेषामप्यभेदः। सुखादि व्यवस्था तु कल्पितभेदेनाप्युपपद्यते। प्रत्युत विभ्वनेकात्मवाद एव तदनुपपत्तिः। एतच्चोष्ट्रलांगूलन्यायेन स्पष्टीभविष्यतीत्युपरम्यते। अनात्मनामपि चिदात्मनि रज्जौ स्रगादिवत् कल्पितत्वेन न ततो भिन्नत्वं संभवति। नन्वेवमपि नाद्वैतसिद्धिः। अन्योन्यानात्मभेदस्य नहि दृष्टेऽनुपपन्नं नामेति न्यायेन जाकरूकत्वात्। तथा च 'भक्षितेऽपि लशुने न शान्तो व्याधिरिति न्यायापात इति चेन्न। दृष्टत्वस्यासिद्धेः। दृश्यत एव सर्वभिन्नो घट इति चेन्न। न हि घटे सर्वभेदप्रत्यक्षं संभवति। भेदग्रहे प्रतियोगिग्रहस्य हेतुत्वात् सर्वस्य चासर्वज्ञेन ज्ञातुमशक्यत्वात्। ततश्च सर्वभिन्नो घट इति प्रत्यक्षं भ्रमः, अनुमानादेस्तु पूर्वोक्तैव गतिरित्येकस्यैव ब्रह्मणो रज्जुसर्पन्यायेनाज्ञातस्य प्रपञ्चाकारेण भानान्नाद्वैतश्रुतिर्मानान्तरविरुद्धाज्ञातस्य च निर्विशेषत्वेन भानान्न प्रपञ्चोपशमत्व श्रवणमपि विरुद्धाज्ञातस्य (?) मिति संक्षेपः। एवं हि सर्वदोषसमाधानान्नापसिद्धान्तो न वा प्रकृतन्यायोदाहरणासंगतिः। येऽपीशे केवलनिमित्तकारणत्ववादिनो न तैरपि विरोधः उभयविधकारणत्ववति केवल निमित्तत्वस्यापि सत्त्वात्। ननु केवलनिमित्तत्वं नामोपादानत्वाभाव समानाधिकरण निमित्तत्वम्। तच्च त्वदभिमत ईशे नास्ति तथा विरोध इति शक्यं ब्रह्मण्युपादानत्वस्य कल्पितत्वाङ्गीकारेण वास्तवतदभावस्यापि सत्त्वात्। तस्मात् सर्वं निरवद्यं इति [illegible]

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

अथात्रत्याः प्रासंगिकास्तत्संगताश्च लिख्यन्ते। क्रिया हि विकल्प्यते न वस्त्विति न्यायः । १ । ९६ ।। यः कारयति स करोत्येवेति न्यायः । राजादिर्हि भृत्यैर्युद्धादिकं कारयन् स्वयमपि करोतीति प्रसिद्धम्। २४। ७। ज्ञानादेर्निष्कर्षवदुत्कर्षोऽप्यङ्गीकार्यो बाधकाभावात् इति न्यायः । यथा ज्ञानापकर्षावसान भूमित्वं स्थावराणां तदुत्कर्षावसानभूमित्वमीशस्येत्यङ्गीकार्यम्। तच्चोत्कृष्टत्वं ज्ञानस्य सर्वविषयत्वमेवेति भाव;। ३। ४८।। काकतालीयन्यायः। अत्र काक ताल शब्दौ समासविषये काकतालसमवेत क्रियावर्तिनौ तेन काकागमनमिव तालपतनमिव काक तालमिति समासाच्च तद्विषयादिति ज्ञायकादिवार्थे समासः। इवार्थसमासाभावे तद्विषयादित्यनेनेवार्थविषयसमासानुवादस्यानुपपन्नत्वात् तज्ज्ञापकत्वम्। तत्र काकतालपदयोरिवार्थे समासेन विधेर्हरेश्च समागमः काकतालसमागमसदृश इति फलति। काकागमनतालपतनयोरुपमानत्वे तदुपमेययोर्विधिगमनहर्यवस्थानयोः पृथगनुपात्तत्वेनान्वयायोगात् काकताल समागम एवोपमानम्। एवं काकतालसमागमसदृशं काकतालपदार्थः। तस्य चाभेदेन हरिविधि समागमरूप उपमेयेत्यन्वयः। तादृश समासानन्तरं काकतालमिव काकतालीयमिति द्वितीयास्मिन्निवार्थे समासाच्च तद्विषयादिति सूत्रेण इवे प्रकृतावित्यधिकारस्थेन छप्रत्ययः। तस्य ब्रह्मविष्णवोः समागमानन्तरं जातो वादि प्रतिवादिभावः, काकतालफलयोर्भोक्तृभोग्यभावसदृश इत्यर्थः। न च सकृदुच्चरिताभ्यां काकतालपदाभ्यां कथमुपमानद्वयावबोधः इति शंक्यम्। अनुभवानुसार्यनुसार्यनुशासनेन व्युत्पत्तिवैचित्र्यस्य स्फुटं प्रतिपत्तेरिति ।४ ।४९ अजाकृपाणीयन्यायोऽपीदृशः। अत्रापि ह्यजाकृपाण पदाभ्यां तदागमनपतने लक्ष्येते। एवमन्यदपि सर्वं तुल्यमेव। एतावांस्तु विशेषः। यत्सोऽवितर्कितेष्ट लाभेऽनिष्टलाभे चावतरति, अकस्मान्महाफलस्यास्ते पतने काकस्य भोगलाभवच्छिरसि पतने मरणस्यापि संभवात्; अयं त्वकस्मात्केवलानिष्टावाप्तौ प्रवर्तत इति। ५ ।५०

नहि भिक्षुकोभिक्षकमिति न्यायः स्पष्टः। ६ ।५१ योजनप्राप्यायां कावेर्यां मल्लवन्धनन्यायः, कावेर्याख्यायां नद्यां योजनचलनेन प्राप्यायां मल्लस्य कैवर्तस्य बन्धनं यथा न युज्यते तथा प्रकृतेऽपीत्यर्थः। इति ।७ ।५२

केचिन्मल्लो वाहुयुद्धकुशलस्तद्वदद्योलंवितवाससांकटौ बन्धनं मल्लबन्धनं तद्यथा योजनप्राप्यायां तस्यामयुक्तं तथेत्यन्ये। अवश्यापेक्षतानपेक्षितयोरिति न्यायः ।८ ।५३ कृताकृतप्रसङ्गीयो विधिः स नित्य इति न्यायः। यथा रंधयतीत्यत्र "रधिजभोरचीतिनम् विधिरत उपधाय" इति वृद्धौ कृतायामकृतायां च प्रसंगितया नित्यत्वेन बलीयस्त्वाह द्विविधेंर्बाधकास्तथा गणेशाराधनविधिरन्याराधन विधेर्बाधकः इति गाणपत्यानामभिमानः।

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant
९।५४।

Gandhi Memorial College Of Education Bantalab Jammu

अनधीते महाभाष्ये इति न्यायः। १० ।५५ एक फलाकांक्षापातदाराधनमन्यदपि फलं प्रयच्छतीति विवक्षायां तु फलवत्सहकारन्यायः यथा सहकारः आम्रश्चूतोरसालोऽसौ सहकारोति सौ प्राप्यापारं ते इत्यभिधानादति सौरभ आम्रवृक्षोऽतिमधुर पक्वफलनमितशाखस्वमुपसन्नं छायार्थिनं जनं फलं परिमलं चाप्रार्थितमपि ददाति तथा प्रकृतेऽपीत्यर्थः ।११ । ५६ तदभिन्नाभिन्नस्य तदभिन्नत्वमिति न्यायः ।१२ । ५७ लक्षणप्रमाणाभ्यां हि वस्तुसिद्धिरिति न्यायः । १३ । ५८ केवलमानेनार्थसिद्धिविवक्षायां मानाधीना मेयसिद्धिरिति न्यायः प्रवर्तते । १४ । ५९ यद्विवाहस्तद्गीतगानमिति न्यायः; केचित्तु प्रागुदाहृतं वरगोष्ठिन्यायमेतदर्थकत्वेन व्याचक्षते। १५ । ६० अन्धगजन्यायः। अन्धैर्निर्धारितो गजोऽन्धगजस्तस्य न्यायः इति मध्यम लोपि गर्भः षष्ठीतत्पुरुषः । यथा हि लोके श्रूयते जन्मान्धा बहवः कञ्चिदनन्धं पुरुषमूचुरस्मान्गजं दर्शयेति। स च गजशालायां तां नीत्वा तं तं गजावयवं तेन तेन ग्राहयित्वा चोवाच अयं गज इति। ते च तं तमवयवमेव गजत्वेन निश्चित्य स्वस्थानमागताः परस्परं कलहं चक्रुः। शूर्पसदृशो गज इति कर्णस्पर्शी, महासर्पसदृश इति शुण्डग्राहीस्तंभतुल्य इति जांघाग्रहीता पुच्छग्राहकस्तु स्थूलरज्जुसमो गज इति उच्येति। तथा शास्त्राभिप्रायानभिज्ञा वादिनोऽपि स्वस्वेष्टदेवमाहात्म्य बोधकानि वाक्यानि पश्यन्त इतराणि तु पश्यंतोऽप्यपश्यन्त एव सर्वमाहात्म्यबोधकवाक्यैकवाक्यतां चाजानन्तोऽन्योन्यं विवदन्त इत्यर्थः। एवमेव 'स्थूलारुन्धती' न्याये प्रर्शितान्वाक्याभासानश्रित्य तत्तात्पर्यानभिज्ञाश्चार्वाकादयो माध्यमिकांतस्त्वंपदार्थ विषये विवदन्त इति बोध्यम् ।१६ । ६१ । कूपमण्डूकन्यायः समुद्रमण्डूकः कथञ्चित्तरीसमीपस्थकूपे प्रविष्टस्तं दृष्ट्वा कूपमण्डूकवर्योभ्रष्टचरोऽयमिति ज्ञात्वा पप्रच्छ। कुत आगतो भवानिति। समुद्रादिति तत्प्रतिवचनं श्रुत्वा कियान्स इति पृष्टवान्। महानिति तेन प्रत्युक्तः। स्वजंघा प्रसार्य किमेतावानित्युवाच। न हि महत्तमः स इति प्रतिवचनमाकर्ण्य द्वितीयजंघां प्रसार्य तर्ह्येतावानिति उवाच। पुनरपि तेन निराकृतस्तृतीयां तुरियां जंघां प्रसार्याप्लुत्य च क्रमेण प्रादेश वितस्तिहस्तपरिमितं देशं किमेतावानिति पृच्छंस्तेन निरस्तश्चेत्तर्हि कूपसदृशो भविष्यतीत्युवाच। भूयोऽपिभ्रातर्नास्ति तत्तुल्योऽन्यः सहि सरितांपतिरनवगाह्य गांभीर्योऽलक्ष्यया एवारोतीव महत्तम इति तेन प्रत्युक्तस्तर्हि नास्त्येव स यः कूपादपि महान् त्वं तु मिथ्यैव प्रलपसीति तं निराचक्रे। स च स्वमनसि तं हसितवानिति गाथा लोके गीयते। तथा च यथांभोनिधिमज्ञात्वा निराकुर्वन् कूपमण्डूक उपहास्यतां प्राप्तस्तथान्यत् परानभिज्ञस्तद्दूषणपरिहासास्पदीभवतीति न्यायसंगतिः ।१७। ६२ ।

तत्त्ववित्वाभिमानि मूढो न तद्गतिं वांच्छन्नपि लभते उपहसनीयश्च भवतीति विवक्षायां चतुर्वेदविन्न्यायोऽवतरति। यथा गोहिरण्यादि रूपं बहुधनं चतुर्वेदविदे देयमस्तती कस्यचिद्वानर्वचनं

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

श्रुत्वा मुग्धः कश्चिद्वेदाश्चत्वार इत्यहं जाने मह्यमिदं देयमिति वदन्न तल्लेभे उपहास्यतां च प्राप्तः। तथा यः सच्चिदानन्दरूपं प्रत्यगभिन्नं ब्रह्मेत्यादि शब्दाविज्ञस्तदर्थाभिज्ञो वा तत्त्ववित्त्वाभिमानेन तद्गतिमिच्छति न स तामेति। उपहसनीयश्च भवतीति ज्ञेयम् ।१८ ।६३ नृपनापितपुत्र्न्यायः। इत्थं हि लौकिकी गाथा कस्यचिन्नृपस्य भृत्यो नापितः कस्यचित्प्रातः सर्वं पुरमन्विष्यातीवरम्यो बालो मे दर्शनाय त्वयात्रानेय इति नृपेण आज्ञप्तः प्रातरुत्थायाखिलपुरमन्विष्य दृष्ट्वापि च तत्र तत्रातिरम्यान् बालान् स्वपुत्र तुल्यानमत्वा तमेव राजवेश्मनि नीत्वा राज्ञे निवेदयामास। स्वामिन्नानीतोऽयं रम्यतमो बाल इति। राजा च तमुपशान्तानलांगाराभं काणं खल्वाटं कृशहस्वबाहुजंघं स्थूललंबोदरं दृष्टवोपहासमयं खलः कृतवान्यपीति मत्वा कुपित उवाच। अरे जाल्म किमिदमिति। नापितश्च कुपितं नृपं ज्ञात्वा कृताञ्जलिर्भूत्वोवाच राजेन्द्रमौले। तव चरणमुपालभे नायमुपहासः। किन्तु मे मनसीत्थमेव निश्चयो नास्तीदृक् त्रिलौक्यां तव पुर्यास्तु का कथेति। राजा च सत्यमीदृश्येव रागग्रहगृहीत चित्तदशेति मत्वा कोपं तत्त्यजेति। तथा च यथा अतिकुरूपेऽपि पुत्रे रागातिशयवशान्नापितस्य सर्वोत्तमत्वधीस्तथा मन्दधियां केषाञ्चिज्जन्मान्तरीय संस्कारप्रयुक्त रागातिशयवशात् कस्मिंश्चिदतिक्षुद्रेऽपि देवे सर्वोत्तमत्वधीः परित्यज्य च हरिहरादींस्तदुपासने प्रवृत्तिरिति न्याय संगतिः १९ ।६४। स्वशिष्टमपि चुम्बन्तमिति न्यायः। २० ।६५। महिषो प्रसवौन्मुख्या इति न्यायः। २१ ।६६। अन्धचटकन्यायः।। यथाऽकस्मादन्धस्य हस्ते पतितश्चटकोऽन्धेन गृहीत इति लोके प्रसिद्धिमगात्तथा दैवाल्लब्धमभीष्टं स्वेष्ट देवत्वेनाभिमतवंशार्कादि दत्तं मन्यन्त इत्यर्थः ।२२ ।६७। घुणाक्षरन्यायोऽपीदृशः। घुणेनभक्षिते काष्ठादावकस्मात्ककारादि सदृशच्छिद्रेषु सत्सु घुणेनाक्षराणि निर्मितानीत्यबुधैः कल्प्यते यथा तथा प्रकृतेऽपि। २३ ।६८। पुत्रलिप्सया देवं भजन्त्या भर्त्तापि नष्ट इति न्यायः। २४ ।६९। वृद्धिमिष्टवतो मूलं विनष्टमिति न्यायः ।२५ ।७०। धर्मतन्तौ महिषीं हन्तीति न्यायः सममीह निमित्ते निमित्तं च फलं तथा च चर्म तन्त्वर्थमित्यर्थः स्पष्टमन्यत्। २६ ।७१। मण्डूकतोलनन्यायः। केषुचिन्मण्डूकेषु अभिष्टमानपूर्णार्थं तुलयामारोपितेष्वन्ये उत्प्लुत्य गच्छन्तीति नाभीष्टसिद्धिस्तथा प्रकृतेऽपि। २७ ।७२ सछिद्रघटाम्बुन्यायः २८ ।७३ एकामसिद्धिं परिहरतो द्वितीयापद्यत इति न्यायोऽपि चेह प्रवर्तते। इयं बौद्धाधिकारे उदयनाचार्योक्तिः। यथांकुराद्यकर्तृकं शरीर्यजन्यत्वादित्यत्र शरीरीति विशेषणेन स्वरूपासिद्धिं परिहरतो बौधस्य व्याप्यत्वासिद्धिरापद्यते तथा प्रकृतेऽपि। २९ ।७४। उपयन्नपयन्धर्मो विकरोति हि धर्मिणमिति न्यायः। यथा पूर्वस्य पूर्वरूप रसादिरूप धर्मस्य परावृत्तौ रूपरसाद्यन्तरोत्पत्तौ च तण्डुलादिर्धर्मिणो विकृति दृश्यते तथा प्रकृतेऽपि स्यादित्यर्थः। ३० ।७५। व्रणं शिशमयिषो शस्त्रापहृता न्यायः। स्वस्थाने समाप्तोऽयम्। ३१ ।७६। सर्वे विशेषणं सावधारणमिति न्यायः।

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

शंखःश्वेतः श्वेत एवेत्यर्थः। एवमन्यत्र प्रकृतेऽपि। ३२ ।७७। सर्वं वाक्यं सावधारणमिति न्यायोऽपि कैश्चनोदाह्रियते। तत्रावधारणार्थक एवशब्दस्त्रिविधः क्रियान्वितो विशेषणान्वितो विशेष्यान्वितश्च। तत्र पूर्वस्यात्यन्तायोग व्यवच्छेदोऽर्थः। यथा नीलं पद्मं भवत्येव द्वितीयस्यायोगव्यवच्छेदः स चोक्तः। तृतीयस्यान्ययोग व्यवच्छेदः। यथा पार्थ एव धनुर्धर इत्यादौ एवमन्यत्रापि बोध्यम्। ३३ ।७८। वृद्धकुमारीवाक्यन्यायः। अयं महाभाष्ये व्याख्यातः। तद्यथा वृद्ध कुमारी इन्द्रेणोक्ता वरं वृणीष्वेति। सा च वरमवृणीत पुत्रा मे वहुक्षीरघृतमोदनं कांस्यपात्र्यं भुञ्जीरन्निति न च तावदस्याः पतिर्भवति, पुत्राः कुतो गावः, कुतो धान्यं तत्रानया एकेन वाक्येन पतिपुत्राः गावो धनं धान्यमिति सर्वा संगृहीतं भविष्यतीति। तथा तथाक्षुन्नया मोक्षबोधकवाक्यैरपि यदन्तरेण एतदसिद्धिस्तत्संगृहीतं भवति। एवं काशीमरणान्मुक्तिरिति श्रुतिवाक्यं तदुपबृंहणभूतानि पुराणादि वाक्या निचयानि काशीमरणान्मोक्षं बोधयन्ति तेषां यथा श्रुतार्थोपगमे "तमेव विदित्वातिमृत्युमेति नान्यः पंथा विद्यतेऽयनायेति" वचनविरोधः स्यात्तद्वारणाय तत्त्वज्ञानद्वारा एव मोक्ष इत्यङ्गीक्रियते। तच्च ज्ञानमुत्पद्यते पुंसां क्षयात्पापस्य कर्मणः ब्रह्मणो निर्वेदमायान्नास्त्यकृत्तः कृतेन शान्तो दान्त उपरतस्तितिक्षुः श्रद्धावितो भूत्वा आत्मन्येवात्मानं पश्येत्।

आत्मा वा अरे द्रष्टव्यः श्रोतव्यः न वेदविन्मनुते तं बृहन्तं आचार्यावान् पुरुषो वेदप्रोक्तान्येनैव सुज्ञानाय प्रेष्टेत्यादि शास्त्रप्रामाण्यादनेक जन्मार्जित पुन्य(ण्य) पुञ्जक्षपितपापसाधनचतुष्टयसंपन्नस्य गुर्वधीनवेदान्तश्रवणादिमत एव नान्यस्य। ततश्च काशीमरणान्मोक्षबोधकवाक्य जातेन यदन्तरेण मोक्षासिद्धिस्सर्वमनेन न्यायेन संगृहीतं भवति। न चैतत्सर्वमत्र कल्प्यम्। किन्तु मानसिद्धं तत्र तावत्पापनिवृत्तौ काशीप्रवेशदर्शनस्पर्शनैः तत्रत्य गंगादिस्नान देवदर्शनादिना च तन्निवृत्तिबोधकानि वचनानि प्रमाणम्। तत्र काशीदर्शनस्पर्शनमाहात्म्यं काशी खण्डेऽभिहितम्। यैद्दष्टाद्दूरतः काशी ते पुण्याः पापा शत्रवः स्पृसृष्टायैस्तेऽपि च ततः श्रेष्ठा मोक्षैकभाजं नन मात्स्ये च ज्ञानादज्ञानतो वापि वर्तमानमतीतकं सर्व तस्य च तत्पापं क्षेत्रं दृष्ट्वा विनश्यति। पाद्मे अस्याः संदर्शनं व्याससर्वपातकनाशनम्। अस्यानिवासोनिर्वाणं साधयत्यञ्जसा मुने। ब्रह्मवैवर्ते पश्य तात परमार्चितां पुरो योगिभिः सुकृतिभिर्मुनीश्वरैः यां निरीक्ष्य पुरुषः पुरा कृतैः पातकैः शरतिमितैर्वियुज्यते पञ्चमहापातकैरित्यर्थः। तथा बहिः कृतानि यानि पूर्वजन्मार्जितान्यपि काशीदर्शनमात्रेण नाशमेष्यन्ति नान्यथा। अत्र बहिः कृतानीति निर्देशात् पूर्ववाक्यान्यपि तद्विषयाणि उपसंह्रियन्ते, चतुर्धाकरण वाक्यानीवाग्रेयविषयत्वेन अन्यथा पंचक्रोशयात्रादि विधानं व्यर्थं स्यात्। तथा पूर्वजन्मशतकोटि सञ्चितं पापराशिमतुलं विनाशयेत्

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

काशिकापरपदप्रकाशिका दर्शन श्रवणकीर्तनादिभिः। एवमन्येष्वपि पुराणादिषु द्रष्टव्यम्। अथ काशीप्रवेशमहिमा ब्रह्मवैवर्त्ते महापातकयुक्तोऽपि श्रद्धया रहितोऽपि वा काशी प्रवेशादनघः सम्यक्स्थित्वा सुखी भवेत्। यत्तु कश्चिदाह-काशीप्रवेशात्पापं न नश्यति, किन्तु च तिष्ठति एतदेवानघत्वं नाम। अत एव लिंगपुराणेवारणस्यां तु काश्चित्प्रविष्टो ब्रह्मघातकः तिष्टते बाह्यतः पापं निर्गते गृह्यते पुनरित्युक्तम्। एवं अन्यान्यपि पुराणवाक्यानि बोध्यानीति। तन्न क्षोदक्षमम्। अदृष्टरूपस्य तस्यान्तःकरणधर्मत्वेन बहिर्निराश्रयावस्थानायोगात्। अथ तार्किकमतमाश्रित्यादृष्टस्यात्मधर्मत्वमुपेत्य पापं प्राग्देहावच्छिन्ने स्थितमिदानीं तु विभुत्वादात्मनो बहिरवच्छिन्ने तस्मिंस्तिष्ठति न तु काश्यवच्छिन्न इति मन्यसे। न तदपि चारु। तस्य देशावच्छेदेन वृसमावात्। अन्यथाऽत्मगुणस्याश्रयगमनं विना अन्यत्र गमनासंभवेनात्र नरदेहावच्छिन्ने जातस्य दृष्टस्य स्वर्गदौ देवादिदेहे भोगानुत्पादकत्व प्रसंगात्। किं च यदि प्रागेव बहिरवच्छिन्ने जातं पापं न काश्यवच्छिन्ने तर्हि काशीप्रवेशेन किमधिकं कृतम्। अतः स्वाथासंभवाद्वहिः पापस्थितिबोधकानि वाक्यानि बहिर्न गन्तव्यम्। किन्त्वत्रैव सदास्थेयमित्येवं पराणि निर्गते गृह्यते। पुनरिति तु न हि निन्दा निन्दितुं प्रवर्त्तत इति न्यायेन बहिर्न यायादिति स्फुटमेवाह। किं च बहूनि वाक्यानि पापनाशमेवोपपादयन्ति तत्र तावच्छैवे। अत्र प्रविष्टमात्रस्य जन्तोः पापं पुराऽऽर्जितं विनाशमाप्नोति; परं पुण्यराशिश्च वर्धते। लैंगे च जन्मान्तरसहस्रेण यत्पापं पूर्वसञ्चितं अविमुक्तं प्रविष्टस्य तत्सर्वं व्रजति क्षयम्। एवमान्यपि बोध्यानि। अत्र काशीदर्शनादिभिः पापसामान्यध्वंस श्रवणेऽप्यारब्धातिरिक्तस्यैव पापस्य ध्वंसो द्रष्टव्यः। तत्त्वज्ञानेनापि तद्ध्वंसानभ्युपगमात्। इदं त्वत्र विचारणीयं किं काशी प्रवेशादिनातीताशेषजन्मजं पापं लीयते तज्जन्मजमेव वेति। अत्र केचित् अतीताशेष जन्मजन्मजपापलयोपगमे लिंगं दशाश्वमेधीशं दृष्ट्वा दशहरातिथौ दशजन्मार्जितैः पापैस्त्यज्यते नात्र संशय इत्यादीनि वचनानि निर्विषमाणि स्युः। प्रवेशादेव सर्वपापनाशात्। अतः प्रवेशादेतज्जन्मजमेव पापं लीयते, तत्तल्लिंगादिदर्शनादिना तु प्राग्जन्मीय पापक्षय इति मन्यन्ते। एवं तु जन्मान्तरसहस्रेणेत्यादि प्रागुदाहृतैः प्रवेशादिनानेकजन्मजपापध्वंसबोधक वचोभिर्विरोधापत्तेः। तत्तल्लिंगार्चनादिनायादिशब्दलक्षिताः पापवासना अनेकजन्मीयाः क्षीयन्ते प्रवेशात्त्वशेषपापनाश एव। न च वासनापि नश्यति काशीप्रविष्टानां पापे प्रवृत्यभावात्तेरित्यन्ये। तेषामयमाशयः। पापस्य द्वे शक्ती। एष एवासाधुकर्म कारयति तं यमेल्पे लोकेभ्योऽधो निनीषते इति श्रुतिसिद्ध न जनकतावच्छेदिका प्रथमा पापः पापेन कर्मणेति श्रुतिसिद्धपापप्रवर्त्तकतावच्छेदिकाद्वितीया तत्र सर्वेषां पापानां प्रथमा शक्तिः प्रवेशादिना नाश्यते द्वितीया तु वासनाशब्दिता तत्तल्लिङ्ग दर्शनादिना तत्तन्माहात्म्योक्त क्रमैणैव नाश्यत इति [illegible] एवं सति पापादि [illegible]

CC-0 Agamnigam Digital Preservation Foundation Chandigarh. Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

ततः प्राचीनजन्मानुवृत्तवासनया तदुपपत्तिः। कृत्तिवासविश्वेशादि दर्शनेनाशेष दुरितध्वंसोक्तेः। तद्वचनस्याखिल वासनानाशपरत्वे पापे प्रवृत्त्यनुपपत्तेर्दुष्परिहारत्वात्। अतः प्रवेशादखिलमेव पापं नश्यति, काशीस्थ तत्तत्तीर्थस्नानादिना एकद्वादि जन्मज पापक्षयोक्तिस्तु येऽन्यत्र मृताः पुण्यातिशयेन काश्यां जातास्तद्विषयेति न काचिदनुपपत्तिः।

न च तेषामपि लिंगदेहस्य क्षेत्र प्रविष्टत्वात् सर्वं पापं नष्टमेवेति शङ्क्यम्। पाष्टतिर्यगधिकरणन्यायात् यतो विधिनिषेधेपु मनुष्याणामधिक्रिया। अतः पशुपिशाचाद्या धर्माधर्मो षण्मता इति पाद्माच्च मनुष्याधिकारित्वाच्छास्त्रस्य लिंगदेहे पापनाशायोगात्। यातु पिशाचमोचनाख्याने। पिशाचस्यापि तत्स्नानात्पैशाच्यनाशोक्तिः। सा निषादस्थपतीष्टिवद्यावद्वचनं तावद्वाचनिकमिति न्यायात्तन्मात्रविषयैव।

न च लिंगस्य काशीप्रवेशात्पापनाशे वचोऽस्ति। तस्मात् का ते विशन्ति महादेवमित्यादि वचनशतेभ्यः शिवलोकं गतानां महेशात्तत्त्वावबोधलाभे कैवल्यं भवतीति। अन्यस्त्वाह यद्यपि पुराणेषु सारूप्याद्यविशेषेण मोक्षो मरण फलतयावगम्यते तथाप्यधिकारितारतम्येन निष्पापानामीशार्पितकर्मणां मरणादेव मुक्तिः। ततो निकृष्टानामग्निप्रवेशादिकृतां शंभुसामीप्यम्।

न चात्र निषिद्धात्स्वेच्छया मरणात् कथमीश साम्यम्। अग्निप्रवेशं ये कुर्युरविमुक्ते विधानतः प्रविशन्ति मुखं ते मेनिः संदिग्धं वरानने कुर्वन्त्यनशनं ये तु मद्भक्ताः कृतनिश्चयाः न तेषां पुनरावृत्तिः कल्पकोटिशतैरपीत्यादि मत्स्यादि वचनैरग्निप्रवेशप्रायोपवेशयोरभ्यनुज्ञानेन निषेधस्येतोऽन्यत्र संकोचात् तिर्याक्प्रभृतीनामत्यन्तपापीयसां च सारूप्यं, ततोऽप्यधमानां सालोक्यमिति।

किं च चतुर्विधक्षेत्रे यथा यथा योगपीठाद्विप्रकर्षस्तथा तथा मरणफलापकर्ष इत्यप्याह। तदपरे न क्षमन्ते। "तमेव विदित्वे"त्यादि श्रुतिविरोधाकरणान्मोक्षायोगात्।

ननु मरणादेव मोक्षबोधक नाना पुराणबलात्तमेवेति श्रुतिरन्यत्र सावकाशेति चेन्मैवम्। पुराणेन वेदसंकोचायोगात्। काशीमरणस्य जाबालोपनिषदा तारकोपदेशद्वारा ज्ञान ज्ञानसाधनत्वबोधनाच्चेति यश्चाह - काशीमरणस्य चित्तशुद्धावेवोपयोगस्तद्वारा क्रमेण मोक्ष इति स प्रष्टव्यः। किं तारकोपदेशो मृतेः प्रागनन्तरं वा।

नाद्यः। उपदेशेन प्रागेव साक्षात्कारे पश्चात्तत्र मरणजशुद्धेर्व्यर्थत्वात्।

न द्वितीयः। मृतौ सत्यामदेहं प्रत्युपदेशानुपपत्तेः। उत्क्रममानार्थकप्रत्ययश्रुतिव्याकोपाच्च। तस्मात्काशीमरणस्य न चित्तशुद्धावुपयोगः। वाराणसीस्थ तीर्थ[illegible] मरणं

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

अन्तःकरणसंशुद्धिमाप्नुयाद्विजितेन्द्रिय इत्यादि वाक्यैस्तस्याः पूर्वमेव सिद्धत्वात्। किन्तु बोधद्वारा मुक्तावेव। योऽपि प्रथमः पक्षः मुमुर्षोर्मणिकर्ण्यन्तरद्धोदकनिवासिन इत्यादि पूर्वोक्तविशेषणवतस्त्रैवर्णिकस्यैव साक्षात्कैवल्यमन्यस्य तूक्तसालोक्यादि द्वारेति सोऽप्ययुक्तः। जन्त्वादि साधारणपदश्रवणात्।

तथा हि अत्र हि जन्तोः प्राणेषूत्क्रममाणेष्वित्यादि श्रुतौ कीटाः पतंगा मशकाश्च वृक्षा जले स्थले वा विचरन्ति मर्त्याः, मण्डूकमत्स्याः क्रमयोऽपि काश्यां त्यक्त्वाशरीरं शिवमाप्नुवन्ति। अविमुक्तरहस्यज्ञा मुच्यन्ते ज्ञानिनो नराः। अज्ञानिनोऽपि मुच्यन्ते क्षेत्रस्मिंस्ते त्वकल्मषाः सर्वाज्जंतून्मोचयेत्। अन्तकाले विश्वेशोऽत्र श्रोत्रमन्त्रोपदेशात् आब्रह्मस्तंबपर्यन्तं यत्किञ्चिज्जन्तुसंज्ञितं चतुर्षु भूतग्रामेषु काश्यां तन्मुक्तिमाप्स्यतीत्यादि काशीखण्डे।

एवमन्येष्वपि श्रुति पुराणादिषु जीवनसामान्यपर जन्त्वादिपदश्रवणेन कृमिपर्यन्तानां साक्षाद् ग्रहणेन च जन्तुपदस्य त्रैवर्णिकमात्रपरत्वकल्पनस्यानुचितत्वात् प्रणवश्रवणे द्विजातातिरिक्तस्य कथमधिकार इति चेत्। सत्यम्। अस्मदाद्युपदिष्ट प्रणवश्रवणे तदितरस्यानधिकारः। अपारजन्मार्जित पुण्यपुञ्जप्रसादित परमेश्वरोपदिष्ट प्रणव श्रवणे तु काशीमाहात्म्य सोमपरमेश्वर साक्षात्काराभ्यां ध्वस्ताशेषकल्मषस्य प्राणिमात्रस्याधिकारः। अत एव ब्रह्मवैवर्त्ते तीर्थान्तरात्काश्य विशेष उक्तः। जितेन्द्रियाः पापविवर्जिताश्च शान्ता महान्तो मधुसूदनाश्रयाः अन्येषु तीर्थेषु हि मुक्तिभाजो भवन्ति। काश्यामपि को विशेष इति शिष्य प्रश्ने गुरुणोत्तरितं विशेषं शृणु वक्ष्यामि काश्याः कथयतो मम कृतानि साधनान्यत्र स्वल्पान्यपि महामते। भवन्ति काशीमाहात्म्यात् सिद्धान्येव न संशयः। अन्यत्र साधु सुकृतैः कृतैर्मुच्येत वा। अत्र साधनवैकल्ये काशीपूर्णं प्रकल्पयेत्। तथा कलिकालस्त्वयं तीक्ष्णः क्व नयः (तपः) क्वपरात्मदृक् काश्येव शरणं तेषां श्रुद्धिदा मलिनां नृणां कलौ विनष्टव्रताद्धैर्य वीर्या गच्छन्तु काशीं परमार्थराशिम्। तथा ये वा द्विजाग्न्याः श्वपचाश्च निन्द्या ये चक्रवर्तिष्वपि धर्मरूपाः ये वा दरिद्राः परमार्तिभाजः समानरूपां गतिमाप्नुवन्ति। काशीखण्डे च। संसारभयभीता ये ये बद्धाः कर्मबन्धनैः येषां कापि मतिर्नास्ति तेषां वाराणसीगतिः। श्रुतिस्मृदिविहीना ये शौचाचारविवर्जितायेषामित्यादि पूर्ववत्। तथासौ भाग्याभाग्य इत्यत्र विषयाणि त-त्तल्लिंगदर्शनादिनैकतादि जन्मपापक्षय बोधकानि वचांसीत्याहुः। अपरे तु काशीस्मरणगमन दर्शन तत्तत्तीर्थस्नानात्तल्लिगदर्शनां नियतक्रमाणां फलावैलक्षण्ये उत्तरोत्तरानर्थक्यापातात्। प्रत्येकं सर्वपापनाशश्रवणाश्रयणे च स्वतो वैलक्षण्याभावेऽपि कायिकवाचिकमानस बुद्धिपूर्वाबुद्धिपूर्व सकृदावृत्तात्यन्तावृत्तमहापातकोपपातकादि प्रतियोगिकृत वैलक्षण्यसंभवात्।

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

पापे च सर्वत्वस्यावान्तरवैजात्यावच्छेदेनैव संकुचद्वत्या सर्वेभ्यो ज्योतिष्टोमः सर्वेभ्यो दर्शपूर्णमासौ सर्वेभ्यश्चातुर्मास्यानीतिवत्संभवात् गमनादौ प्रत्येकमशेषपापक्षयेऽपि न काचिदनुपपत्तिः। तथा च प्रवेशाद्याज्जातीयाशेष पापं नष्टं तद्विजातीयऐकद्यादि जन्मीयं तत्तत्तीर्थस्नानादिना नश्यतीति वदन्ति। काशीप्रवेशेन कायिकादि भेदभिन्नानामनारब्धानां सवासनानां सर्वेषां पापानां निवृत्तिरेव भवति।

न चैवं काशीस्थानां पापे प्रवृत्तिर्न स्यात्। प्रारब्धेनैव दुःखोत्पत्तिवत् पाप प्रवृत्तेरपि संभवात् तत्तत्तीर्थस्नानादिनैकद्याति जन्मीयपापनाशबोधकं तु शास्त्रं यावता पुण्येन तन्नश्यति तावत्पुण्योदयपरं यद्वा यथा काश्यां कृतमल्पमपि पुण्यं बहु भवति तथा पापमपीति स्पष्टं पुराणादौ। तथा च काश्यां च कृतं यावत्पापमेकद्यादि जन्मीयसमं भवति तत्तत्तीर्थ स्नानादिना तावन्नश्यतीत्यर्थकं तच्छाश्त्रं स्मरणगमन क्षेत्रविश्वेशकृत्तिवासेशदर्शनादिना सर्वपापनाशबोधकशास्त्रस्याप्येषैव गतिः। यत्तु तत्र ब्रह्मेश्वरं दृष्टा ब्रह्मलोके महीयत इति ब्रह्मलोकादि फलं यच्च क्वाचिन्मुक्त्यादि फलं तदपि यात्रां कृत्वा देशान्तरमृतविषयम्।

ननु काशीप्रवेशात्प्रवेशावधिकाशेषपापक्षये कृते कृतकाशीयात्रस्याकृतकाश्यद्यस्य बहिर्गमनानन्तरमेव मरणेऽक्षयस्वर्गापत्तिः केवलपुण्येन मर्त्यत्वासंभवात्।

न च पुण्यान्तं यावत्स्वर्गभोगानन्तरं मुक्तिरेव तस्येति युक्तं श्रवणादि जन्यज्ञानाभावे तदयोगादिति चेत् न। तस्यापि मार्गस्थ जन्तुमरणादिजन्याज्ञातपापोपपत्तेः व्याघ्रादिभिः हनने दुर्मृत्युजपापसंभवात् दुष्टेनारब्धकर्मणां ते दुष्टमति संभवेनान्ते या मतिः सा गतिरिति न्यायेनापि मर्त्य जन्मसंभवात्। अन्येषामभावेऽप्यविमुक्तमेव निषेवेताविमुक्तं न विमुञ्चेदित्यविमुक्ते प्रविष्टस्य तत्र मरणान्तवाशाविधि तत्त्यागनिषेधातिक्रमप्रयुक्त पापस्यावश्यकत्वाच्च। परं तु तस्योदयः देहक्षयश्चात्र भवतीत्यन्यदेतत्। अतः काशीप्रवेशदशेषपापलयेऽपि न काचिदनुपपत्तिरिति तु नवीनतमाः। अत्र परीक्षकैर्विचार्य युक्तः पक्षो ग्राह्यः। आरब्धानां च भोगेन नाशे शुद्धचित्तो जीवो गौरीशानुग्रहाच्छमादिसाधनसंपत्तिं लभते। स्वयं च जगद्गुरुः स परमकृपया ब्रह्मात्मैक्यबोधसाधनं तारकमुपदिशतीति न श्रवणस्याविज्ञानं प्रति व्यभिचारः। तथा च जाबालोपनिषद्याम्नायते।

अविमुक्तं वै देवानां देवयजनं सर्वेषां भूतानां ब्रह्मसदनम्। अत्रहि जन्तोः प्राणेषु उत्क्रममाणेषु रुद्रस्तारकं ब्रह्म व्याचष्टे येन अमृतो भूत्वा मोक्षो भवतीत्यादि स्मर्यते च पुराणेषु। तत्र तावत्कौर्मे यत्र साक्षान्महादेवो देहान्ते स्वयमीश्वरः आचष्टे। तारकं ब्रह्म तदेवमतिमुक्तिदम्।

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

काशीखण्डे च ब्रह्मज्ञानेन मुच्यन्ते नान्यथा जन्तवः क्वचित् ब्रह्मज्ञानं तदेवाहं काशिसंस्थितिभागिनां दिष्टामि तारकं प्रान्ते मुच्यन्ते तेन तत् क्षणात्।

पाद्मेऽपि निर्वाणपदमेवैतद्यदधिष्टामि नित्यशः म्रियमाणस्य जन्तोश्चयो वाक्यं कर्णे समुच्चरन् विना वाक्योपदेशेन ब्रह्मात्मैक्यं न भासते ब्रह्मात्मैकत्वविज्ञानादृते मुक्तिर्न जायते। एवमन्यत्रापि तारकं किमिति चेत् प्रणव इत्यवेहि।

तदुक्तं काशीखण्डे न वर्ण्यते कैः किल काशिकेयं जन्तोः स्थितस्यात्र यतोऽन्तकाले पचेलिमैः प्राक्तनपुण्यभारैरोंकारमोंकारयतीन्दुमौलिः। अन्यत्रापि प्रणवं तारकं ब्रूते काश्यां देवो महेश्वरः।

ननु प्रणवेन कथं ब्रह्मात्मैक्यबोधः श्वराड अकारोकारवाच्यान् विश्व वैश्वानर तैजससूत्रात्म प्राज्ञेश्वरान् ज्ञात्वा प्रथमं विश्वं वैश्वानरत्वेन अहमेव वैश्वानरोऽस्मीति विभाव्य ततस्तैजसं सूत्रात्मत्वेनाहमेव सूत्रात्मास्मीति विभाव्य पश्चात् प्राज्ञमीश्वरत्वेन अहमेवेश्वरोऽस्मीति विभाव्यानंतरं समष्टि व्याष्टिस्थूलसूक्ष्मकारणोपाधिकत्वोंकार वाच्यं परं ब्रह्माहमस्मीति सर्वात्मत्वेन विभाव्य पश्चान् मनस्यैकाग्रतामापन्ने स्थूलसूक्ष्मादि सर्वं जगत्-सोपानावरोहण न्यायोक्तक्रमेण निर्विशेषे ब्रह्मणि विलाप्यैकाग्रेण मनसा स्वस्य ब्रह्मत्वं साक्षात्करोतीति।

यद्वा नद्योऽहं सोपसौ सोहमित्यत्र सशन्देन परमात्मोच्यते, अहं शब्देन प्रत्यगात्मा अवगम्यते। ततश्च समानाधिकरणयोः सोहमित्यनयोः परमात्माहमित्यर्थस्तथा प्रणवस्यापि सोऽहमित्यस्यैव प्रणवत्वेन निपातनात्।

तथा हि सोऽहमित्यस्य पृषोदरादित्वेन निपातनात् सकार हकार लोपे कृते परिशिष्टयोरो अमित्यनयोरेकः पदान्तादतीति पूर्वरूपैकदेशात्मकं संधिं कृत्वा उच्चारणे ओमिति शब्दो निष्पन्नः।

तदुक्तं सकारं च हकारं च लोपयित्वा प्रयोजयेत् सन्धिं च पूर्वरूपाख्यं ततोऽसौ प्रणवो भवेदिति। एवं च ओमित्यस्य परमात्माहमित्यर्थ इति सिद्धम् । अत्र कश्चिदाह काश्यपादि कक्षाभेदेन चतुर्विधे क्षेत्रे मणिकर्ण्यो जार्ह्रोदके भूमौ विश्वेशाभिमुख्येन कालतो मृतस्य द्विजमात्रस्य भैरवपातनादि जनकपापहीनस्य विश्वेशभक्तस्य काशीमरणान् मुक्तिर्भवति न वेति संशयरहितस्य सद्यःपरब्रह्म सायुज्यं भवति। द्विजे तस्यापापस्य नरमात्रस्य द्विज मात्रस्यापि कस्यचिदपापत्वेऽपि विश्वेशाभक्तस्य तद्भक्तत्वेऽप्यपापत्वेऽप्युक्तप्रकारात्प्रकारान्तरेण मृतस्य चतुर्विधे क्षेत्रे यत्र क्वापि मरणक्षेत्रावान्तर भेदतारतम्येन मरणस्य बुद्धिपूर्वकत्वाबुद्धिपूर्वकत्व प्रयुक्ततारतम्येन

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

कर्मादि तारतम्येन च सालोक्यादि प्राप्तिद्वारा कैवल्यं भवति; पापिनस्तु नरमात्रस्य चतुर्विधेऽत्र क्षेत्रे तत्र क्वापि ये येन केनापि प्रकारेण मृतस्य भैरवपातनानुभवानन्तरं मोक्षः।

नन्वत्र हि जन्तोः प्राणेषूत्क्रममाणेष्विति जन्तुमात्रस्य श्रवणात्कथं त्रैवर्णिकस्यैव सायुज्यमिति चेन्न। रुद्रस्तारकं ब्रह्म व्याचष्ट इत्यनेनैकवाच्यतया प्रणवाख्यतारक व्यांनयोग्य त्रैवर्णिक मात्रपरत्वाज्जन्तुपदस्य अथोत्क्रान्त्यनन्तरं देहाभिमानाभावाज्जन्तुमात्रस्य प्रणवाधिकार उपव्यधत इति चेन्न। उत्क्रममाणेष्विति वर्तमानप्रत्यय दर्शनेनोत्क्रमदशायामेवोपदेश स्वीकारात्। उत्क्रमानन्तरमदेहस्योपदेशायोगाच्च कर्णमूलगतो हर इत्यादि वचनविरोधाच्च विदेहस्य कर्णाभावत्। एवं पुराणगतजन्तुशब्दस्यापि त्रैवर्णिकमात्रपरतैव। तस्मात् काष्ठपाषाणभूतस्तु जाह्नवीजलमध्यगः अविमुक्तान् मुखस्तस्य कर्णमूलगतो हर इति वचनात् मुमूर्षोर्मणिकर्ण्यंतरर्द्धोदकनिवासिन इत्युक्तेश्चार्धजले मणिकर्ण्यं विश्वेशाभिमुखस्य कालेनोपरतो यातीत्युक्तेः। आत्मरक्षात्र कर्त्तव्यता महाश्रेयोऽभिवृद्धये, अत्रात्मत्यजनोपायं मनसापि न चिन्तयेदिति वचनाच्च कालान्नतु बलात्। अविमुक्त इत्यादि सप्तमी बलाद्भूमौ मृतानां त्रैवर्णिकानामपायत्वाद्विनन्त्वात् च (च्च) । तदैव तारकोपदेश योग्यानां मद्भक्तःकृतनिश्चय इत्युक्तेर्विश्वेश भक्तानां काशीमरणं मोक्षदं न वेति सन्देहशून्यानां च विश्वगुरु श्रीविश्वेशोपदिष्टतारकोदित ब्रह्मबोधात्सद्यस्तत्सायुज्यं भवतीति सिद्धम्।।

ननु ब्राह्मणाः क्षत्रिया वैश्या शूद्रा ये वर्णसंस्थिताः स्त्रियो म्लेच्छश्च ये चान्येसंकीर्णा वर्णजातयः कीटाः पिपीलिकाश्चैव ये वर्णसंस्थिन्ये पक्षिणस्तथा कालेन निधनं प्राप्ता अविमुक्ते वरानने चन्द्राद्र्ध मौलयस्त्र्यक्षामहावृषभवाहनाः शैवे मम पुरे देवि जायंते तत्र मानवाः मानव इति ब्रह्मणश्रमणा न्यायेन ये भक्ता वरदं देवमविमुक्तं परं पदं ते विशंदि महादेवमाज्याहुतिरिवानलम्। अकामो वा सकामो वा तिर्यग्योनिगतोऽपि वा अविमुक्ते त्यजन् प्राणान्मम लोके महीयते गृहस्थाश्चैष पतयस्तस्मिंस्तीर्थ उपासकाः एकदण्डास्त्रिदण्डाश्च हंसव्रतधराश्च ये कर्मभेदेन तेषां तु सर्वेषामास्थितोस्म्यहं विभजामि परंस्थानं यच्छन् मोक्षपदं शुभं इत्यादि नानापुराण वचनैः काश्यां मृतानां क्षेत्रावांतर भेदतारतम्यात् सारूप्यादि संभवेऽपि विदेहकैवल्यं कथं स्यादिति चेदुच्यते। तदुपर्यपि हि बादरायणः संभवादिति व्याससूत्रादेवानामपि ब्रह्मविख्याता मणिकर्णिका ददामि तस्यां सर्वस्वमग्रजायांत्यजाय चेति। अतएव पादो अधिकार संपादनमुक्तं पुमांसं क्षीणकलुषं शंकरस्तारकं वचः श्रावयामास, विधिवत्संपाद्याधिकृति परां इति, इदं चाधिकारसंपादनं नीचेषु नरेष्वेव जातिकर्मभ्यामुत्तमानां स्वतएवाधिकार सत्वेन संपादनानर्थक्यात्। यतस्तत्रैवोक्तम् गणपतिना कथंचिच्छंकरः काशिकायां किमुत मम सुभक्तो

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

ब्राह्मणः पुल्कसो वा उपदिशति स दांतो वाक्यमेकात्मनिष्टं द्विजकुलनिरपेक्षो भाव्य तत्राधिकारमिति। यत्तु भूमौ मृतानामेव मुक्तिरिति तदभिन्नभूमौ जलेऽतरिक्षे वा यत्र क्वापि मृतो द्विजः ब्रह्मात्मैकत्वमाप्नोति काशीशक्तिमुपाहितः, सूच्यग्रमात्रमपि नास्ति ममास्पदेऽस्मिन् स्थानं सुरेश्वरि मृतस्य न यत्र मुक्तिः भूमौ जले मध्यतो वांतरिक्षे सूर्याग्नि दस्युपविभिर्निहितस्य जंतोरित्यादि वचनात्। अनेन दुर्मृत्युजदोषोऽप्यत्र नास्तीत्युक्तम्। न चात्र कालकृतोऽपि विशेषोऽस्ति उत्तरं दक्षिणं वापि अयनं न विचारयेत्। सर्वोऽप्यस्य शुभः कालो ह्यविमुक्ते म्रियेत यः इति काशी खंडात्। तस्मात् सर्वस्यापि काश्यां यत्र वापि यथा कथंचिन्मृतस्य मोक्ष इति सिद्धम्। क्वचिद्धि शिवेत्युपदिशाम्यहमिति द्विरावृत्तः शिवशब्दस्तारकतयोक्तरामतापनीये मुमूर्षोदक्षिणे कर्णे यस्य कस्यापि वा स्वयं उपदेक्ष्यसि मन्मन्त्रं स मुक्तो भविता शिवेति। पाद्मे तु श्रीरामरामरामेति एतत्तारकमुच्यते इति श्रीशब्दपूर्वकस्त्रिरावृत्तो रामशब्दस्तारकतयोक्तः। अनेन षडक्षरमंत्रोपलक्षणम् श्रीशब्द प्रयोगस्य भक्त्यतिशयार्थत्वान्नपाह्नतापनीययोर्भिन्नार्थत्वं तथा च प्रणवाधिकारिणां सर्वेषां प्रणवोपदेश एव तदनधिकारिषु शैवानां शिवमंत्रोपदेशः, वैष्णवानां तु राममंत्रोपदेशः। शिवमद्वैतं चतुर्थं मन्यंते इति श्रुतेः, शिवेतिशब्दस्य रम्यंते योगिनोऽस्मिन्निति निर्वचनेन रामशब्दस्यापि चाद्वितीय प्रत्यगभिन्न ब्रह्मबोधकत्वान्न ताभ्यां मोक्षफलकतद्बोधानुपपत्तिशंकापीत्यपि केचित्। अस्मिन् मतेऽपि क्षुद्रजंतूनामधिकारोपपत्तिरीशाधीनैव। तेषां फलोन्मुखेन केनचिद् दुष्टेन कर्मण क्षुद्रजन्मोपपत्तिः। अनादिभवसंचितासंख्यपुण्यैः काश्यां मरणे मुक्तिश्चेति बोद्ध्यम्। यत्तु क्वचित् क्षेत्रभेदादधिकारिभेदाच्च सामीप्यादि फलकीर्तनं तन्निर्विषयमोक्षाभीरूणां तन्माहात्म्यानभिज्ञानां संतोषार्थं ज्ञेयं काश्यां स्वर्गादिकमुद्दिश्य यागाद्यनुष्टातापि वराटकान्वेषणे प्रवृतश्चिंतामणिं लब्धवानिति वासिष्टोक्ताभाणकन्यायेन मोक्षमेव लभते। अत्र वे (वि) दा दुःख स्वधर्म निरतस्यापापस्य सर्वस्याप्यनंतरमेव मोक्षः तद्विलक्षणस्य तु यातनातोधिकार संपादनेन, तदुक्तं स्वे स्वे कर्मणि निष्णातानुत्तमाधममध्यमात् अधमानपि मार्गस्थान्न यामि परमां गतिं केवलं धर्मसापेक्षः कर्णेजपति तद्वचः अधार्मिष्टस्य तत् क्षेत्रे यातनांते दिशेन्मतिं इत्यादीनि। अन्ये तु सर्वत्र तारकोपदेशे वर्तमानतानिर्देशात् कर्णे जापोक्तेश्च देहे सत्येवोपदेशे ज्ञानं च देहापाये तु कैवल्यमेव। तथा च धर्म मर्यादास्थापनार्थं भैरवपातनोक्ती रुद्ररोदनादिवदर्थवादः, यदि तु साप्रामाणिकीति तदा प्रारब्धवद् ज्ञेयाज्ञानं तदैव भवतीति मन्यंते। ननु मृतिकाले कफाद्यवरुद्ध कण्ठस्यौदर्य वाताभिघातेन विदीर्यमाणाशेष मर्मणो व्याकुल बाह्यांनरिंद्रियस्य प्रणवात्म शब्दस्य श्रवण साक्षात्कार एव दुर्लभः, सत्यपि तस्मिन् तदर्थ दुरवगमः तस्मिन्नपि सति तस्य सर्वेषां वेदांतानां चाद्वितीये तात्पर्यनिर्धारणानुकूलविचारात्मकस्य तादृशतात्पर्यविशिष्टशब्दज्ञानात्मकस्य वा श्रवणस्य श्रुतार्थस्य

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

युक्तिभिरनुचिंतनरूपस्य विपरीतभावना निवृत्तिफलकप्रमेय तत्त्वावधारणानुकूल तर्कानुसंधानात्मकस्य वा मननस्य संभवेऽत एवासंभावना विपरीतभावभयोस्तत्त्वसाक्षात्कारप्रतिबंधकयोरभावात् भावे च शब्द प्रमाणादुत्पन्नोऽपि ब्रह्मसाक्षात्कारः पुरुषापराधासंभावनादि प्रतिबद्धत्वान्नाविद्यानिवर्तनक्षमः। तदनिवृत्तौ च तन्मूलक संसारानिवृत्तेः कथं मोक्षः तस्मात्काशी मरणान् मुक्तिप्रतिपादकवचनजातं तद्वासिसिद्ध्यैक वाक्यतया तदर्थवाद एवेति चेन्मैवं वृंदारकवृंदवंदितपादारविंदोमासहायाचिंत्यशक्त्यपरिमेयमहिम श्रीशंकरकृपया श्रीकृष्ण कृपया भीष्मस्य शरतल्पजवेदनानिवृत्तिवत् काश्यामुमूर्षोः सकलवेदनानिवृत्त्या चित्तप्रसादकरणपाटवादिसंभवेन श्रवणादि संभवात्। अत एव मात्स्ये अंतकाले मनुष्याणां छिद्यमानेषु मर्मसु वायुना प्रेर्यमाणानां स्मृतिर्नैवोपपद्यत इति क्षेत्रांतर मरणप्रकारमुक्त्वाअविमुक्ते त्वंतकाले भक्तानामीश्वरः स्वयं कर्मभिः प्रेर्यमाणानां कर्णजापं प्रयच्छति ईश्वर प्रेरितो याति दुःप्रापमकृतात्मभिरिति तु शब्देन क्षेत्रांतरापेक्षया विशेषोऽभिहितः स च मरणकाले स्मृत्युपपत्तिरूप एव। गारुडे च मरणावसरे सकलश्रमनिवृत्तिः सहेतुकोक्ता, अनिलो मृगनाभिरेणगंधैरधिकाशिप्रणवोपदेशकाले हरते मरणश्रमं नराणां हरवामार्द्धकुचोत्तरीयजन्मेति केचित्। यथा स्वप्ने दृष्टेरेव सृष्टित्वेनेंद्रियाणां चातींद्रियत्वेन तत् सृष्टेरभावेष्वपि श्रवणादि व्यवहारस्तथा जागरेऽपि दीर्घ स्वप्ने बाह्येंद्रियाभावेऽपि मनोमात्रेणैव श्रवणादि व्यवहार इति स्थितेऽत्र मरणकालेऽपि बाह्येंद्रियापेक्षामन्तरेण मनसैव श्रवणाद्युपपत्तौ काशीमरणादत्यन्तशुद्धस्य श्रीचन्द्रशेखरसाक्षात्कारान्नष्टाशेष सन्तापस्य तदनुग्रहाच्च सर्वविक्षेपापगमेन प्रत्यगभिन्न ब्रह्मनिमग्न चित्तस्य अतरान संजाततत्साक्षात्कारस्य क्षमेनैवासंभावनादेः समूलस्यात्यन्तिको बाध उपपद्यत एव। ननु दीर्घकाल नैरंतर्य्यादरैरनुष्टितं श्रवणमनननिदिध्यासनादिकं विना शोधितत्वं पदार्थसाक्षात्काराभावत् तादृश तत्पदार्थ ज्ञानासंभवाच्च न वाक्यार्थसाक्षात्कारोत्पत्तिः पदार्थबुद्धेर्वाक्यार्थबुद्धौ हेतुत्वादिति चेन्न। चिरत्वविशेषणवैयर्थ्थात् उत्तमाधिकारिषु शीघ्रमेव सर्वसंभवात्। नचावृत्तिरसकृदुपदेशादिति सूत्रविरोधः। तस्य मध्यमाधिकारिविषयत्वात्। न च काश्यां म्रियमाणनां सर्वेषां कथमुत्तमत्वमिति शंक्यम्। यतः स्थावराणां कृम्यादीनां तत्वावबोधाधिकारं संपादयितुर्विश्वेशस्य सर्वेषामुत्तमाधिकारित्वं संपादनेन कश्चित्प्रयत्नः। स्मर्यते हि मार्कण्डेये परमेश्वरानुंगृहीतमहर्षिवरप्रभावेन पक्षिणामुत्तमाधिकारित्व लाभेन बाल एवातिशीघ्रमेव तत्वसाक्षात्कारलाभः जैमिनिं प्रति पुराणवक्तृत्वं च। वासिष्ठे च श्रीसरस्वती करकमलस्पर्शप्रभावेण भुशुण्ड प्रमुखानां काकानां तत्त्वसाक्षात्कारः, तत्र भुशुंडस्य श्रीवसिष्ठं प्रति वक्तृत्वं च स्मर्यते। एवं च परमेश्वरानुगृहीतानां किंकिं न संभाव्यते। न चैवं श्रवणादेः साक्षात्कारं प्रति व्यभिचारः भगवतीकृपया वामदेवादिवद्गर्भवर्तिनाम् श्रवणादि सति संभवात्।

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

आदरनैरंतर्ये तु संभवत एवात किं चात्र म्रियमाणैरपि पूर्वजन्मसु सर्वं प्रणवादिकमनुष्ठितमेव। तदुक्तं पाराशरीये अत्रैव मरणं सम्यग् यस्य सिद्ध्यति देहिनो विज्ञानसाधनं तेन सर्वं पूर्वमनुष्ठितमिति। तस्माच्छ्रीशंभुमुखचन्द्रनिःसृत प्रणवामृतस्य श्रुतिपुटेन पानादेवाविद्याविष निवृत्तिसिद्धिः काशीमरणान्मुक्तिरित्यादि वाक्यानां नार्थवादतेति सिद्धम्। एतेन मरणात्साधनचतुष्टयसंपत्तेः प्रायेणानुपलंभात्। तद्रहितायोपदेशोपगमे 'अथातो ब्रह्म जिज्ञासेति' सूत्रे अथ शब्देन साधन चतुष्टय संपत्यानंतरर्योक्तेः अधिकारिणं प्रति वेदान्त शास्त्रारंभो न स्यात् तद्वतामपि श्रवणादि परिहारेण काशी मरणायैव प्रयासापत्तिश्चेति परास्तम्। वल्गु जन्मार्जित पुण्यपुंजप्रसादित परमेश्वरकृपया मरणावसर एव साधनसंपत्तिस्वीकारात् जीवदवस्थायामेव सद्यो मोक्षप्रद विज्ञानोपायं श्रवणादिकं हस्तगतं त्यक्त्वेंद्रविहित कामादि दशविघ्नवत्यां काश्यां मृतिकालिकविज्ञानाय प्रवृत्यसंभवाच्च शास्त्राधिकारिणां सर्वेषां सिद्धसुरासुर पक्षगंधर्वकिंनर नरादीनां काश्यां मातुमशक्यत्वाच्च काशी मरणस्य मोक्षं प्रति साक्षाद्हेतुत्वाभावात् तत्र कस्यापि मुमुक्षोः प्रवृत्तिर्न स्यादित्यपि न शंक्यम्। परंपराहेतावपि प्रवृत्तिसंभवात्। अन्यथा मुमुक्षोः शास्त्रेऽपि प्रवृत्तिर्नस्यात्तथा चानिर्मोक्ष प्रसंगः न स्याच्च बुभुक्षोर्भोजनजन्य तृप्त्यर्थिनस्तण्डुल क्रमणादौ स्वर्गकामस्य स्वर्गसाधनयागसाधन पुरोडाशानुकूल व्रीहिक्रमणादौ च प्रवृत्तिरिति वैदिकलौकिक सर्वव्यवहारोच्छेद प्रसंगः, तस्मात् काशीमरणान्मुक्तिरिति श्रुत्या यद्यत् साधनमंतरेण मुक्त्यनुपपत्तिस्तत्सर्वं संगृहीतं भवति इति युक्तमस्या वृद्धकुमारी वाक्यान्याक्षीयोहरणत्वं तथा सितासिते सरिते यत्र संगते तत्राप्लुता सोदिवमुत्पतांति। यै वै तनुं विसृजंत्यत्र धीरास्ते वै जनासो अमृतत्वं भजंत इति श्रुतिवाक्यं दुःकृतोऽपि दुराचारो ब्रह्महत्यादि पातकी हरिं ध्यात्वात्यनेद्देहं प्रयागे मुक्ति भुग्गिवेदित्यादि पुराणवाक्यं न यदंतरेण मोक्षोनुपपन्नस्तत्सर्वमनेन न्यायेन कल्पयति तत्र तावत्तमेव विदिते सादि श्रुतिविरोधाद्धरिं ध्यायते मुमुक्षोः प्रयागमरणावसरे तत्वज्ञानं भवतीति कल्प्यते। ज्ञानं प्रति श्रवणादेर्व्यभिचार वारणाय व्यवहितोत्तरत्व निवेशययुक्त गौरव निरासाय च जन्मान्तरीय प्रवणादिस्मरणं वागदेवदिवत्कल्प्यते काश्यामिव प्रयागेऽपि मृतिकाल उपदेशो भवती श्रवणात् तथा च प्रयागमाहात्म्ये विना ज्ञानेन मुच्यंतदित्यादिवचनं तज्जन्मानुष्ठित श्रवणादि जन्यज्ञानं विना मुच्यंत इत्यर्थपरतया नेयं चित्तशुद्धिस्तु क्षेत्रगमनदर्शन प्रवेशमुंडनस्नान श्राद्ध लिंगदर्शनादिभिर्भवतीति बोद्ध्यम्। तद्वचनानि ग्रन्थविस्तरभयान्नेह लिख्यंते। चित्त शुद्धौ च शमादयोपीशानुग्रहात्सिद्ध्यंतीति सर्वं पूर्ववत् ज्ञेयम्। इयांस्तु विशेषः यत्काश्यां मृतस्य जन्तुमात्रस्य मोक्षः प्रयागे तु स्वयं कालेन वा मृतस्य मुमुक्षोरेव मोक्षः। अन्येषां तु प्रातीच्छया

CC-0 Agamnigam Digital Preservation Foundation Chandigarh Funding by IKS-MoE-2025-Grant

वा मृतस्तत्प्राप्तिरेव तस्य भवतीति स च विशेषोस्तिष्ठतु नाम उदाहृतश्रुत्यादिरत्रापि दाहरवस्तु

Gandhi Memorial College Of Education Bantalab Jammu

न कापि क्षतिः इति वृद्धकुमारी वाक्यन्यायः । अयमेव कश्चिद्वृद्धकुमारी वरन्यायत्त्वेनोदाह्रियते । ३४/७९ । अत्रापि प्रसंगात्पढितं न्यायत्रयं अंतेयामतिः यथा तस्याशास्त्रीयविधिना त्यक्त शिखासूचकक्षादेस्त्यक्त नित्यादि कर्मणश्चेदानीं ब्राह्मणत्वाभावेपि भूतपूर्वेण ब्राह्मणत्वेन निर्देशस्तथा शिवसारूप्यं प्राप्तानामपि प्राक्तनया मानवसंज्ञया निर्देश इत्युदाहरणसंगतिः । एवं विज्ञातारमरे के न विजानीयादिति मुक्तजीवपरतया तया वृद्धैर्विवृतायां श्रुतौ विज्ञातृत्वोक्तिर्निरुपाधिके तस्मिस्तदसंभवात् । अनेन न्यायेन भूतपूर्वगत्यैव संगच्छत इति बोध्यम् ।। ३६ । ८१ । यत्र तु भाविसंज्ञया निर्देशो यथा नारुद्रोवसेत्काश्यामित्यत तत्र सूत्रकशाटिकान्यायावतारः । सूत्रस्य शाटिकां वापयतीत्यत्र यथा सूत्रावस्थायां भाविन्या शाटिकेति संज्ञया निर्देशस्तथा दार्ष्टांतिकेऽपीति बोध्यम् । ३७ ।८२ । अत्र जातपुत्रनामोत्कीर्त्तनन्यायोऽप्यवतरति ।३८ ।८३ । आभाणकन्यायः आभाणकं लौकिकी गाथा न्यायोयं तत्रैवाख्यातविषयः । ३९ ।८४ । कुमारीन्यायः । कुमारी न्यायविषय एव जलानयनन्यायोऽप्यवतरति । तद्यथा जलमानीयतामित्युक्तेऽ चोदितमपि पात्रानयनं जलानयनेऽन्तर्भवति । एवमिहापि बोध्यम् ४० ।७५ । एतेनाग्न्यानयनन्यायो व्यख्यातः ४१ ।८६ । राजसं तामसं चेति न्यायः ४५ ।९० । यः करुते सभुंक्त इति न्यायश्च स्पष्टः ४५ ।९१ । कीटभृंग न्यायः, कीटो यथा भृंगेणगृहीतस्तद्भयात्मभिध्यायंस्तत् सरूपतामिमति तथा हरिहरौ प्रेम्णान्योन्यमभिध्यानादन्योन्यात्मकतां प्राप्तावित्यर्थः ४७ ।९२ । अश्म अयं वैषम्याधिक्य विवक्षायां स्वल्पवैषम्य विवक्षायाँ तु पाषाणेष्टिका न्यायः ४८ ।८ ।९४ । विल्वखल्वाढ न्यायः अयंकेनचित्यद्येननिवृद्धः तद्यथा खल्वाढो (रो) दिवसेश्वरस्य किरणैः संतापितो मस्तके वांछन्देशमनातपं विधिवशाबिल्वस्यमूलंगतः तत्राप्याशु महाफलेन पतता भानं सशब्दं शिरः प्रायो गच्छति यत्र भाग्यरहितस्तत्रैव यांत्यापद । ५० ।९५ । कोशपानन्यायः । कोशपानं नाम दिव्यविशेषः तस्य न्यायः कोशपानम् नाम दित्प्रकारश्चेत्थं दुर्गादीनुग्रान् देवान् पूजयित्वा तत्स्नानोदकं चाहृत्य तोयत्वं प्राणिनां प्राण इत्यादि मंत्रेण प्राड्विवाकस्ततो यं संश्राव्य शोध्येन च त तोयं पात्रांतरे कृत्वा सत्येन मामभिरक्षेत्यनेनाभिमंत्रितं प्रसृतित्रयं पाययेत् । एवं कृते चतुर्दश दिनात्प्राग्यस्य राजनिमित्तं दैवं वाद्योरदुःखं न जायते स शुद्धः अशुद्धोऽन्यः । तथा च यथा सर्व दिव्यसाधारणपूर्वदिनोपवासवतश्चौरस्य तत्पानकाले सुखं भवति शास्त्रनिर्दिष्टावधिकाले तु महद्दुःखं यथा तथा हरिहरादिष्वेकत्र भक्तिव्याजेनेतरनिंदा कुर्वतो निंदाव्यसनिनो यद्यपि तत्काले स्यात्किंचित् सुखं तथापि निंदाजन्याघपरिपाक कालेऽतिघोरं नरकादिदुःखं भवतीति न्यायसंगतिः । ५१ ।९६ । यदि त्वीशकोपाच्छीघ्रमेव निंदकस्य दुःखं स्यात् तदा तंडुलभक्षणन्यायप्रवृत्तिः एवमग्रेपि षट्सु न्यायेषु बोध्यम् । तच्चेत्थं शुक्लाच्छालितंडुलानादित्याग्रे मृत्पात्रधृत्वा स्नानोदकेन संमिश्रान रात्रैव वासयेत प्रातः स्नातं

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

प्राङ्मुखमुपोषितं भक्षयित्वा पिप्पलपत्रे निष्ठीवयेत्। एवं कृते यस्य हनु लाहितं दृश्यते तालु च शीर्यते कंपते च गात्रं सोऽशुद्धः शुद्धोन्य इति। ५२ ।९७। विषभक्षणन्यायोऽपीह बोद्ध्यः। तद्यथा कृतोपवासः शंभुं संपूज्य तदग्रे विषं संस्थाप्य त्वं विषब्रह्मणा सृष्ट इत्यादिनाभिमंत्र्य त्रिंशुदुणेन घृतेन संयोज्य च दक्षिणाभिमुखाय शीतलदेशे निविष्टा यदद्यात् एवं कृते आकरतालिकाशतपंचकं यो निर्विकारः स शुद्धः अनंतरं चिकित्सनीयः अशुद्धोऽन्यः। ५३ ।९८। सत्याभिसंधस्य मोक्षो बंधोऽन्यस्येति विवक्षायां तप्तपरति अयसोदाहरणं श्रुत्योपपादितः पुरुषं सोम्य हस्तगृहीतमानयंति। अहार्षीत्स्तेयमकार्षीत्परशुमस्मै तपतेति सपदि तस्य कर्त्ता भवति तत एवानृतमात्मानं कुरुते सोऽनृताभिसंधोऽनृतेनात्मानमतर्धाय परशुं तप्तं प्रतिगृह्णाति सा दह्यते। अथ हन्यते अथ यदि। तस्याकर्त्ता भवति तत एव सत्यमात्मानं कुरुते सत्याभिसंधः सत्येनात्मानमन्तर्धाय परशुं तप्तं प्रतिगृह्णाति स न दह्यते। अथ मुक्तो भवति स यथा तत्र नादह्यत। ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो इति। ५४ ।९९। घटरोहण न्यायो धर्माधर्मन्यायस्ततमाषिकोद्धरणन्यायः उदकनिमज्जनन्यायश्चापीह वर्तते। तत्र तावद्धटारोहणप्रकार उच्यते। सर्वदिव्यसाधारणधर्मानुष्ठानानंतरं प्राड्विवाको घटं त्वं ब्रह्मणा सृष्ट इत्यादि मंत्रैरामंत्रयते शोध्यस्तत्वं तुलेत्यादिना मंत्रेण घटापरनामधेयां तुलामामंत्रयते। अनंतरं प्राड्विवाकः शोध्यं तुलामारोपयति आरोपि च तं विनाडीपंचकं यावत् तथैवावस्थापयति दशगुर्वक्षरोच्चारणकालः प्राणः, षट्प्राणा विनाडी शुद्ध्यशुद्धिनिर्णयकारणं चोक्तम्। तुलातोपदिवर्धेत स शुद्धः स्यान्न संशयः। समो वाहीयमानौ वा न विशुद्धो भवेन्नर इति। ५५ ।१००। धर्माधर्मदिव्यविधिः। राजतं कारयेद्धर्ममधर्मं सीसकाय संलिखेद्भूर्जे पटे वापि धर्माधर्मौ सितासितौ अभ्युक्ष्य पंचगव्येन गंधमाल्यैः समर्चयेत्, सितपुष्पस्तु धर्मः स्यादधर्मोऽसितपुष्पभृत् मृद्भांडे के नृपहते स्थाप्यौ चानुपलक्षितौ उपलिप्ते शुचौ देशे देव ब्राह्मण संनिधौ आवाहयेत्ततो देवांल्लोकपालांश्च पूर्ववत् धर्मावाहन पूर्वं तु प्रतिज्ञापत्रकं लिखित्। ततः यदि पापविमुक्तोहं धर्मस्त्वायातु मे करे इत्यभिशस्तोऽभिमंत्रयेत्। अभिमुक्तस्तयोश्चैकं प्रगृहीताविलंबितः धर्मगृहीते शुद्धिः स्यादधर्मे तु स हीयते इत्यादिना पितामहेनोक्तः ५६ ।१०१। एवमतितप्ततैलादेः सौवर्ण माषकोद्धरणेन शोध्यस्य करे स्फोटाद्यभावे शुद्धिः। अन्यथा त्वशुद्धिः ५७ ।१०२। शोध्यस्य निमज्जनसमये तत्स्थानान्निक्षितं शरमादाय तत्पत्यतनस्थानेस्थितो नरो पद्यति वेगेन शोध्यस्थानमागत्य तच्छिरोऽतिरिक्तं मुखनासिकादिरूपं तदवयवं न पश्यति तदा स शुद्ध इतरथा त्वशुद्ध इति एतेऽष्टावपि न्यायाः परशु ग्रहणन्याय विषये वर्त्तन्ते, घटन्यायश्च कोशपानविषये तंडुलभक्षणविषयेऽपि वर्तते इति बोध्यम्।।५८।१०३। इत्याज्यादुस्वटिनीति न्यायः ५९ ।१०४। चौरापराधान्मांडव्यनिग्रह

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

इति न्यायः।। ६०।१०५। काकदधिघातक न्यायः यथा काकेभ्यो दधि रक्षतामित्यत्र काकपदं दधि घातकपदं दधिघातकलक्षकं तथा प्रकृतेऽपीत्यर्थः ६१।१०६। गणपतिन्यायः ६२।१०७। तिलतंडुलन्यायः ६३।१०८। नीर क्षीरन्यायः ६४।१०९। वेण्याकाशन्यायः इदं न्यायचतुष्टयं स्वस्थाने व्यख्यातम्। ६५।११०। येनोपक्रम्यते तेन चोपसंह्रियते सवाच्यार्थ इति न्याय इति परार्थानुमाने प्रसिद्धं यत्स्वयं धूमादग्निमनुमाय परं प्रतिबोधयितुं पंचावयववाक्यं प्रयुज्यते तत्परार्थानुमानं पंचावयवाश्च प्रतिज्ञाहेतूदाहरणोपनयनिगमनरूपाः तत्र गिरिरग्निमानिति प्रतिज्ञा धूमादिति हेतुः यो यो धूमवान् ससोग्निमान् यथा महानस इत्युदाहरणः धूमवांश्चायमित्युपनयः। तस्मादग्निमानिति निगमनम् इति साध्यवत्तया पक्षवचनं प्रतिज्ञापंचम्यन्तं लिंगप्रतिपादकं वचनं निगमनं व्याप्तिप्रतिपादकमुदाहरणं, पक्षधर्मताज्ञानार्थमुपनयः हेतुसाध्यवत्तया पक्षप्रतिपादकं वचनं निगमनम्। तथा च यथात्र पक्षस्यसाध्यवत् योपक्रमस्तथा तेनैव चोपसंहार इति तदेव वाक्यार्थस्तथा प्रकृतेऽपीति बोध्यम्। ६६।१११। संभवत्येकवाक्यत्वमिति न्यायः। ६७।११२। एकवाक्यतापन्नानामिति न्यायः ६८।११३। अपंथानं तु गच्छंतमिति न्यायः ६९।११४। वध्यतां वध्यतामेष इति न्यायः।७०।११५। विषवृक्षोऽपीति न्यायः।७१।११६। यत्प्राये श्रूयत इतिन्याय्यः ७२।११७। इदं न्याय षट्कं स्वस्थाने संदंशन्यायेन स्पष्टतया प्रतीयते स्वभावतोऽपि स्पष्टार्थं चेति नेह व्याख्यातम्। ७३।११८। तात्स्थ्याताच्छब्दमिति न्यायः मुद्रिकयोष्ट्रः क्रीतः द्वारात्सुष्ट्रु पथः पृष्ट इत्यादौ काष्टपुरुषादीनामुष्ट्रद्वारादिनिष्ठत्वादुष्ट्रद्वारादि शब्दविषयत्वं यथा तथा प्रकृतेऽपीत्यर्थः। यजमानपंचमा इडां भक्षयन्तीत्यप्यस्योदाहरणं बोध्यम्। ७४।११९ एकं संधित्सतोऽपरं प्रच्यवते इति न्यायः यथैकं कांस्यपात्रावपात्रादि संधातुमिच्छतो परं तदन्यन्नानलयोगादेव प्रच्यवते तथेत्यर्थः।७५।१२०। सुतजनि मृतिन्यायोपीदृशः यथा कश्चित्कंचिद्देवमाराध्य ततः पुत्रं लब्धान्यपुत्रलाभाय देवतान्तरमाराध्य ततः तं लब्धवान् जन्मक्षम एव पूर्वदेवकोपात्पूर्वमरणं तथा प्रकृतेऽपि जातमित्यर्थः ।७६।१२१। सर्वजनीनस्तुल्यायव्ययन्यायोऽपीह बोध्यः ७७।१२२। पतंतमनुधावतो बद्धोपि गत इति न्यायः पतंतं कथंचिज्जालान्निसृत्योडीय गच्छंतं पक्षिणमनुधावतो जीवांतकस्य बद्धोपि पक्षी यथा गतस्तथा प्रकृतेऽपीत्यर्थः। ७८।१२३। शालशुनकन्यायः इत्थं हि लौकिकी गाथा कश्चित् कुतुकी स्वसद्मस्थे शुनि श्यालनाम संकेतं कृत्वा स्वस्त्रीकोपोत्पादनापतंगालीर्ददौ सा च तं भ्रातरं मत्वातिकोपपरीतात्मतया दुःखिता बभूवेति। तथा च यथा स्वभ्रातरि शुनि भ्रातृताभ्रांतिमत्या भार्यायाः कोपनाय भर्त्ता श्वनिंदा क्रियते तथात्यंतामित्रेऽपि तत्तद्विग्रहावच्छिन्नेशस्तुतिः क्रियते। अथवा कार्यब्रह्मणिविडालादौ विश्वादि नामसंकेतं कृत्वा शास्त्रेण तन्न्यूनताद्युक्त्या शिवादिस्तुतिः क्रियते इति भावः।७९।१२४। नहि निंदां निंदितुं

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

प्रवर्त्तते। अपि तु विधेयं स्तोतुमिति न्यायः केवलायां निन्दायां प्रयोजनाभावादुभयपरत्वे वाक्यभेदप्रसंगाच्चेति भावार्थोऽस्य प्रागेवोक्तः। अक्षरार्थस्तु स्पष्टः।८०।१२५। यत्रोभयोः समे दोष इति न्यायः।८१।१२७। उपवासाद्वरं भिक्षेति न्यायः वरमिति सामान्ये नपुंसकं एवमग्रेऽपि।८२।१२७। शालिसमृद्धौ को द्रवाशनत्यागन्यायः।।८३।१२८। कूपखानक न्यायः यथा कूपखानके पतितं पंकादि कूपान्निसृतेनांभसा प्रक्षाल्यते तथा तत्तद्विग्रहावच्छिन्नेशभेदबुद्धिजो दोषः तदुपासनाजन्य सुकृतमहिम्नोत्पन्नेनाद्वैतबोधेन समूलं विनर्त्यत इति ज्ञेयम्। ८४।१२९। निम्नगाप्रवाहन्यायः। अयं स्वस्थातेस्पत्वं प्रतीयते।८५।३०। शतेपंचाशदिति न्यायः। ८६।३१। यादृशो यक्षस्तादृशो बलिरिति न्यायः। ८७।३२। यादृशं सुखं तादृशी च पेटेति न्यायः ९०।३५। सारणाय गृहीतोंगच्छेदं स्वीकरोतीति न्यायः मरणाद्वरं व्याधिरिति न्यायोपीह ज्ञेयः। एकाकिनी प्रतिज्ञाहीति न्यायः। ९१।३६। नहि प्रतिज्ञामात्रेणार्थसिद्धिरिति न्यायोपीदृशः एतेयोरर्थैक्येऽपिस्वरूप भेदमाश्रित्य भेदेन निर्देश इति बोध्यम् ९२।३७। शतपत्रपत्रशतभेदन्यायः यथा सूच्या पद्मशतपत्रभेदने कालयौगपद्यप्रतीतिर्भ्रमस्तथेत्यर्थः। ९३।३८। घट्टकुटीप्रभातन्यायः। यथा घडकुटीस्थेभ्याकरग्राहिभ्योभीसारात्रौ पलायितानां पथत्यजां वणिजां दूरे गत्वापि यथा भ्रांतिवशात् घट्टकुट्यामेव प्रभातोदय इति लोके प्रसिद्धं तथा प्रकृतेऽपि जातं इति तत्रैव स्पष्टम्। ९४।३९। वरघाताय कन्या वरणमिति न्यायः। अथमेवक्वचिन्नहि वरघाताय कन्यामुद्वाहयतीति लिख्यते। ९५।४०। नष्टाश्वदग्धरथन्यायः - द्वौ हि रथिनौ कंचित् ग्रामं प्रविश्य रथाभ्यामवतीर्याश्वांश्च ताभ्यां मोचयित्वा खद्धादौ निविष्टौ ततो दैवेन ददध(ह्य) माने ग्रामे तयोरेकः पश्चादश्वान्निःसारयिष्यामीति धिया रथमादौ निसारितवान्। अपरस्तु अश्वान् तावता तस्मिंस्थले दग्धे एकस्याश्वा नष्टा द्वितीयस्य रथो दग्धः तौ च यथान्योन्याकांक्षयैकं रथं कृत्वा स्वेष्टदेशं प्रायतुस्तथापि वादविधिवाक्ये प्रधानांगवाक्ये चेतरेतराकांक्षयैकवाक्यतां प्राप्य प्रवृत्यादि जनयत इति संक्षेपः। ९६।४१। यदा तु निराकांक्षेपि वाक्ये आकांक्षामुत्थाप्यैकवाक्यता क्रियते तदा रक्तपटन्यायप्रवृत्तिः। यथा पटोऽस्तीति वाक्यस्य निराकांक्षस्यापि कीदृश इत्याकांक्षामुत्थाप्य रक्त इत्यनेनैकवाक्यता क्रियते तथा प्रकृतीनां दर्शपूर्णमासादीनां स्वप्रकरणस्थांगैर्निवृत्तोयकाराकांक्षाणामनारभ्याधीतांगैर्विकृतीनां चातिदिष्टांगैः परिपूर्णानां शरमयादिभिः सहोत्थिताकांक्षाविरहेप्युत्थापिताकांक्षयान्वय इति संक्षेपः।९८।४२। सविशेषणे हि वर्त्तमानौ विधिनिषेधौ सति विशेष्यबाधे विशेषणमुपसंक्रामत इति न्यायः। घटाकाशमानयनमण्याकाशमित्यानयन विषयौ विधिनिषेधौ विशेष्य आकाशे बाधाद् घटादिरूपं विशेषमुपसंक्रामतस्तथा प्रकृतेपि न च निषेधस्य कथं बाधः, तस्य प्रसक्तिपूर्वकतया

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

तदभावेऽनुपपत्तेः किंचात्र विधिनिषेधशब्दौभावाभावमात्रबोधकौ तथा च घटाकाशोत्र नीतो न मण्याकाशः घटाकाश उत्पन्नः शरावाकाशो नष्ट इत्यादौ भावाभावौ विशेष्ये बाधाद्विशेषणमुपसंक्रामतस्तथा प्रकृतेऽपि विशेष्ये बाधाद्विशेषणे तयोः पर्यवसानमित्यर्थः। ९८।४३। सावकाशनिरवकाशन्यायः स्वस्थाने स्पष्टः। ९९।४४। अहिकुंडलन्यायः।१००।४५। प्रकाशाश्रयन्यायः - इदं न्यायद्वयं स्वस्थाने व्याख्यातम्। १०१।४६। गुडजिह्विकान्यायः - यथा तत्कटुता भीत्या निंबपानमकुर्वाणस्य बालस्य जिह्वायं गुडलेपनं कृत्वा तं निंबं पाययंति तथार्थवादवाक्यानि कष्टे कर्मण्यप्रवर्तमानं पुरुषं स्वर्गाद्यक्षय्यत्वादिकं श्रावयित्वा तस्मिन् प्रवर्तयंति इति संक्षेपः। १०२।४७। यत्कृतकं तदनित्यमिति न्यायः १०३।४८। नहि द्रष्टेऽनुपपन्नं नामेति न्यायः १०४।४९। नहि करकंकणदर्शनाय दर्शापेक्षेति न्यायः। १०५।५०। प्रत्यक्षे किमनुमानमिति न्यायश्चैततकल्पः।१०६।५१। भक्षितेऽपि लशुनेति न्यायः।१०७।५३। रज्जुसर्पन्यायः। यथा रज्जोरक्षतायाः सर्पाद्यात्मना भानं ज्ञाता यः स्वरूपेण तथा ब्रह्मणोऽनवबुद्धस्य प्रपंचत्वेन बुद्धस्य च निष्प्रपंचत्वेन भानं न मानान्तरविरुद्धमित्यर्थः।१०९।५४। उताहमीश्वर इति प्रत्यक्षविरोधपरिहारायौपाधिकाकाशभेद न्यायावतारः यथौपाधिकाकाशभेदविषयमिति न तदैक्यपरागम विरोध इति दिक्।१०९।५४। इति वृक्षप्रकंपनन्यायांतर्गतास्तैः संगताश्च न्याया व्याख्याताः। कैश्चित्तु प्रचालनेति पढ्यते तदस्तु नामार्थेनाणुरपि विशेषोऽस्ति प्रचलनेत्यपि क्वचित्पाठः। यत्रान्योन्य विरुद्धानामपि संभूयैककार्यकारित्वं तत्र प्रदीप न्यायावतारः। यथा हि वर्त्तितैलेऽग्नि विरोधिनी अग्न्युपरि तैलपातेऽग्निनाशा तु वर्तिरपि स्वल्पकालेनाग्निनाशिका, स च तस्याः अथ च संभूय प्रकाशलक्षणमेककार्यं कुर्वंति तथा सत्वरजस्तमांसि परस्परं विरुद्धानि अपि संभूयैकं देहादिकं प्रवृत्त्यादिकं च कार्यं जनयंति। तथा हि सत्वमेव लघु तत्र हि कार्योद्गमने हेतुर्धर्मो लाघवं यतोग्नेद्र्व्यज्वलनं जीवानां चोद्ध्वं गच्छंति सत्वस्था इति स्मृतिसिद्धमूर्ध्वगमनं प्रकाशकं च सत्वात्संजायते ज्ञानमिति स्मृतेः। सुखकारणं च सत्वं सुखे संजयतीति स्मृतेः। तथा च सति ज्ञानसुखहेतुत्वं सत्वलक्षणं रज उपष्टंभकं संश्लेषजनकं सत्वतमसी स्वयमविक्रियतया स्वकार्य प्रवृत्तिं प्रत्यवसीदती रजसोपष्टभ्येते अवसादात् प्रच्याव्य स्वकार्ये प्रयत्नं कार्येते चलं च रजः चलत्वं च सक्रियत्वं, एवं च प्रवृत्तिहेतृत्वं रजसः, तथा च स्मृतिः रजसो लोभ एव चेति। लोभस्य च प्रवर्त्तकत्त्वं प्रसिद्धमेव। दुः खकारणं च रजः; रजः कर्मणि भारतेति स्मृतिः कर्मणो दुःखहेतुत्वं च सर्वानुभवसिद्धं कष्टं कर्मेति न्यायसिद्धम्। तथा च प्रेरकत्वे सति सक्रियत्वे च सति दुःखहेतुत्वं रजोलक्षणं तमस्तगुरु आवरकं मोहकरं च भवति। तथा च गुरुत्वे सत्यावरकत्वे च सति मोहकत्वं तल्लक्षणम्। एतेनैषां विरुद्धत्वं

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

प्रतीयते, विद्यते चैषां संभूयैककार्यजनकत्वम्। तत्र रज उभयोः स्वकार्ये प्रवर्तकं, तच्च परितस्त्रैगुण्यं चालयद्‌गुरुणा आवृण्वता तमसा तत्र तत्र प्रवृत्तिबंधकत्वे न कचिदेव प्रवक्ष्यते ततस्ततो व्यावृत्येति तमसो नियामकत्वं सत्वं च प्रवृत्तिविषय द्रव्याद्यवभासकं नहि मृद् घटादि ज्ञानं विना तद्विषया प्रवृत्तिः। तस्मात् त्रयाणां अन्योन्यविरुद्धानामपि संभूयैक प्रवृत्यादिकार्यहेतुत्वं तथा देहादिषु सर्वकार्येषु अपि ज्ञेयम्।

तथा हि सुखदुःखमोहाः परस्परं विरोधिनः स्वानुरूपाणि सुखादीनि निमित्तानि कल्पयंति। तद्यथा एकैव नाम्ना भामतीस्त्रीरूपयौवतादिसंपन्ना धवं सुखाकरोति दुःखाकरोति च सपत्नीः मोहयति च नरांतरं तत्कस्य हेतोः तं तं प्रति तस्यास्तत्तद्रूप सद्‌भावत्। एतेन भामती न्यायो व्याख्यातः। न चैकस्य त्रिरूपत्वमयुक्तम् वह्निन्यायेनोपपत्तेः। यथा ह्येकस्याग्नेर्दाहकत्वं पाचकत्वं प्रकाशकत्वं च तथा सत्वादेरपि किं न स्यादिति कार्यजाते च कारणेसदेव कूर्मागन्यायेन निःसरति। पुनश्च सत्वादेरपि किं न स्यादिति कार्यजाते च कारमणेसदेव कूर्मांगन्यायेन निः सरति। पुनश्च तत्रैव लीयते। यथा कूर्मदेहे सन्त्येवांगानि निसरन्ति विभज्यन्ते इदं कूर्मशरीरमेतान्येतस्यांगानि इति एवंविशमानानि तत्राव्यक्तीभवन्ति तथा मृत्पिण्डाद् हेमपिण्डाद्वा घटमुकुटादीनि इति प्रदीपन्यायः।१०० ।५५। प्रासंगिकोऽत्र कष्टं कर्मेति न्यायः। १ ।५६। भामतीन्यायः २ ।५७। बह्निन्यायः। ३ ।५८। कूर्मांगन्यायश्च।

तत्राद्यो निगदव्याख्यातः । शिष्टं न्यायत्रयं तु स्वस्वस्थाने व्याख्यातम्। ४ ।५९। वादादि न्यायोऽपीह। बोध्यः। वातपित्तश्लेष्माणो हि अन्योन्य विरोधिनोऽपि देहधारण लक्षणैककार्यकृत इति प्रसिद्धम्। ९ ।५१०। भ्वादिन्यायस्तु यथा भूसत्तायामित्यादयो धातवो गृह्यन्ते तथैकस्योपाधिभेदेन नानात्वविवक्षायां प्रवर्तते, यथैकएवधातुरूपसर्ग प्रत्यय रूपोपाधिभेदेन नानात्वं भजति। तद्यथा करणं क्रिया कर्मेत्यादौ प्रत्ययभेदेन पराभवोऽनुभव इत्यादौ चोपसर्गभेदेन पुरुषार्थभेदः प्रतीयते। तथैकमेव ब्रह्मोपाधिभेदेन नानेवावभासत इति। यदि तु भ्वादिशब्देन पृथिव्यादयो विवक्षितास्तदा तूक्तविषय एवास्य प्रवृत्तिं प्रसिद्धं हि परस्पर विरुद्धा नाम तेषां संभूयैककार्यकारित्वमिति भ्वादि न्यायः। १० ।१६०। यत्रोभयोरुपकार्योपकारि भावेनान्योन्यापेक्षयासंबंधे सति कार्योदयस्तत्र अंधपंगुन्यायः। यथा हि कश्चित्पुरुषो दृक् शक्तिसंपन्नः प्रवृत्तिविहीनं पंगुरन्यं पुरुषं प्रवृत्तिमन्तं दृक्शक्तिरहितमंधमाश्रित्य प्रवर्तयति किंचित् फलमुद्दिश्य तथा चेतनः पुरुषः स्वयमप्रवर्तमानं प्रवृत्तिशक्तिमदचेतनं प्रधानं प्रवर्तयति। तत्र प्रधानं स्वकर्मकार्यक पुरुषकर्तृक दर्शनार्थं पुरुषमपेक्षते, भोग्यं हि प्रधानं न च भोक्तारं विना भोग्यस्य भोग्यत्वं संभवतीति युक्तास्य भोक्त्रपेक्षा। पुरुषस्तु मोक्षार्थप्रधानमपेक्षते।

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

तथाहि भोगेन हि प्रधानेन संबद्धः पुरुषस्तद्गतं दुःखत्रयमात्मन्यभिमन्यमानो मोक्षं प्रार्थयते। स च सत्वपुरुषान्यथाख्याति निबंधनः। न च सा प्रधानं विनेति भवति पुरुषस्य मोक्षाय प्रधानापेक्षा। अनादित्वाच्च संवंधपरंपरया भोगाय संबद्धोपि मोक्षाय पुनः संयुज्यते इति युक्तम्। यथा चान्धपंगुसंयोगः स्वजन्यगमनादिकं विना नेष्टफलाप्तये इति स एव तदर्थगमनादिकमुत्पादयन्ति तथा प्रकृति पुरुषसंबंधोऽपि न भोगाय न मोक्षाय च पर्याप्त इति। स एव तदर्थं सर्गं करोति इति दिक्। ११।६१। ननु सांख्यैः प्रधानस्य स्वतंत्रस्य प्रवृत्युपगमात् पुरुषस्य च प्रवर्त्तकत्वास्वीकारात्। तथा च तेषां अपसिद्धान्तः स्यात्। कथं चोदासीनः पुरुषः प्रधानं प्रवर्तयेत् पंगुरपि त्वन्धं वागादिभिः प्रवर्तयते नैवं पुरुषस्य कश्चित् प्रवृत्तिः। "इंद्रियेभ्यः पराह्यर्था अर्थेभ्यश्च परं मनः। मनसस्तु पराबुद्धिः बुद्धेरात्मा महान् परः महतः परमव्यक्तमव्यक्तात्पुरुषः परः, पुरुषान्न परं किंचित् सा काष्ठा सा परा गतिरिति।" तत्र संशयः किमव्यक्तशब्देन प्रधानमुच्यते उत पूर्ववाक्यसन्दर्भे प्रकृतं शरीरमिति। तत्र द्वितीयपक्षस्वीकारे अव्यक्तपदमुख्यवृत्तिमात्रत्यागः प्रसज्यते। अत्रहि विषं मृत्युरिति न्यायात् प्रकृतिवाचि शब्देन विकारो लक्ष्यते, न च कथं देहस्य महतः परत्वं अविद्यानिष्टपरत्वस्यात्रोपचारत्। पूर्वकल्पस्वीकारे तु परिशेषात् न्यायत्वेन प्राप्तग्रहस्य शरीरस्य परित्यागः प्रसज्यते। पूर्ववाक्येषु श्रुतस्य प्रधानस्य परिग्रहश्च।

किञ्च सांख्यैः प्रकृतिपुरुषविवेकान्मोक्षं वदद्भिः प्रकृतिरपि तदर्थं ज्ञेयेति स्वीक्रियते, न चात्र अव्यक्तं ज्ञेयत्वेनोच्यते। तथाच ज्ञेयत्ववचनानुसारेण अव्यक्तपदेन न प्रधानं गृहीतुं शक्यम्। तद्ग्रहे तु तदनुसारित्वत्यागः। किं च कठवल्यां अग्निजीव परमात्मनामेव पूर्वोत्तरवाक्यपर्यालोचनया वक्तव्यत्वेनोपन्यासः तद्विषय एव प्रश्नश्च दृश्यते न प्रधानस्य येनास्याव्यक्तपदवाच्यत्वं स्यात्। तथा चैतदनुसारेणापि नेदमव्यक्तपदवाच्यम्। तदुपगमे तु तदनुसारित्व त्यागोऽपि प्रसज्यते इति। २।६। विषमृत्युरिति न्यायोऽत्र प्रासंगिकः। १।७। लांगलं जीवनमिति। २।८। आयुर्घृतमिति ३।९। दधिपयसा प्रत्यक्षे ज्वर इति च योऽनेन तुल्यः। नानुसरतिरः अल्पस्य हेतोर्वहुहातुमिच्छन्विचारमूढः प्रतिभासि मे त्वमिति न्यायविषयतां नातिवर्त्तते। ५।११। एकस्मिन् साध्ये अनेकेषु साधनेषु सत्स्वप्यादावेकस्मिन् प्रयुक्ते सति साध्यसिद्धावन्यप्रयोगेऽर्थाभावत्तत्स्वयमेव निवर्त्तते पूर्वं कस्यचित् प्रयोगे चेच्छैव नियामिकेति विवक्षायामशोकवनिका न्यायः प्रसज्यते। यथा रावणो लंकायां सीतां नीत्वा राक्षसीभ्य आज्ञप्तवान् अशोकवनिकायां स्थाप्येति। ताश्च तत्र बह्वः सन्ति तत्रैकस्यां स्थापिता चेत्तावतैव तदाज्ञायाः परिपालितत्वात् सर्वत्र स्थापयितुमशक्यत्वाश्चेतरत्र स्थापनं स्वयमेव निवर्तते

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

न्यायोऽनेन तुल्यः ।४ ।१० । यस्तु त्यजेकमिति न्यायं पूर्वं कश्यचित्प्रयोगे चेच्छैव नियामिकेति दिक् । ७२ । अत्र पिष्टेति प्रासंगिकः ।२ ।३ । मृतमारण न्यायोपीह बोध्यः । २ ।४ । जलमंथनन्यायोपि । ३ ।५ । काकदन्तपरीक्षा न्यायः । ४ ।६ । गर्दभरोमगणन न्यायः । इदं न्यायत्रयं वैयर्थ्यमात्रे बोध्यम् । ५ ।८ । एव पटे काश्चित्प्रवर्तत, व्यापारोस्ति निष्क्रियत्वान्निर्गुणत्वाच्चेति शंकानिरासाय लोहचुंबकन्यायोऽवतरति । यथा चुम्बकमणिः स्वयमप्रवर्त्तमानोऽपि लोहं प्रवर्तयति तथा पुरुषः प्रधानं प्रवर्त्तमानोऽपि लोहं प्रवर्तयति तथा पुरुषः प्रधानं प्रवर्तयिष्यतीति । अयं न्यायो ब्रह्मवादिमतेऽपि प्रवर्तते । इयांस्तु विशेषः । यद् ब्रह्मावादिभिरनिर्वचनीयस्याध्यासिकस्य माया ब्रह्मसंबंधस्यांगीकारान्नतन्मते कोऽपि दोषः, ब्रह्मणि प्रवर्तकत्वस्याप्यविद्यकत्वांगीकारान्न कौटस्थहानिरपि । सांख्यमते तु चुंबकस्यानित्यसंनिधिरेव व्यापारः । प्रधानपुरुषसंनिधेस्तु नित्यत्वेन व्यापारत्वयोगः । तुष्यतु दुर्जन इति न्यायान्नित्यस्यापि व्यापारत्वोपगमे प्रधानप्रवृत्यविच्छेद इत्यादयो दोषो वज्रालेपवदनिवार्या इति दिक् । २ ।६२ । तुष्यवत्वितिन्यायः प्रासंगिकः ११ ।६३ । इति सकलकल्याणगुणभूरुहारण्यश्रीभानक सद्वंशसन्मौक्तिक श्रीरामदयालु शिष्येण सोमवंशीय विदराय कुलोत्तंस श्रिगुलाबराय धर्मात्मजेनोदासीनावस्थेन श्रितशिशिरवेनाविमुक्ति क्षेत्रस्थेन रघुनाथवर्मणा विरचिते लौकिक न्यायसंग्रहे प्रमेयनिरूपणपरः पूर्वभागः ।।

अथ प्रमाणनिरूपणप्रचुरो भागः प्रारभ्यते । अत्रैव च प्रसंगात् पूर्वोक्तार्थोऽपि दृढीक्रियते । यदाहित रतिशोकमात्मविदित्यादौ प्राचीनतार्किकमतमाश्रित्याखिल पदार्थस्मरणाद्युगपदेव विशेष्ये विशेषणं तत्र विशेषणान्तरमिति न्यायेन सर्वपदार्थानामन्योन्य क्रियाकर्मभावेनान्वयरूपः शाब्दबोधः स्वीक्रियते । तदा खले कपोतन्यायोऽवतरति ।

यथाहुः वृद्धाद्वा युवानः शिशवः कपोताः खले यथामी युगपत्पतंति तथैव सर्वे युगपत्पदार्थाः परस्परेणान्वयिनो भवन्ति इति । अत्र वृद्धयुवशिशुभिः कपोतैश्चिरतरचिरं संनिहित कालोक्तानां पदार्थानां साम्यं बोध्यम् । न चोत्तर पदार्थस्मरणेन पूर्वपदार्थस्मरणनाशात् कथं युगपत् सर्वपदार्थ स्मरणमिति शंक्यम् । प्रत्येकपदार्थानुभवजन्यसंस्कारैरंत्यस्य तावद्विषयकस्मरणस्थोदयसंभवात् । १ । एतेन विशेष्ये विशेषणमिति न्यायोपि व्याख्यातः । २ । यदि तु स्वर्थाकांक्षितं योग्यं च यद्यत् चार्थोपस्थितिविषयो भवति तेन तेनैतान्वितः स्वार्थः पदैः प्रथममनुभाव्यते । अनन्तरं च महावाक्यार्थ बोध इति नवनैयायिकमतमाश्रित्य विशिष्टस्य वैशिष्ट्यमिति न्यायेन शाब्दबोधोंऽगीक्रियते । तदा राजपुरप्रवेशन्यायः प्रवर्तते । तत्र हि क्रमेणैव वृद्धानां पुरुषाणां प्रवेशो भवति न युगपत् । अस्मिन् मते पूर्वोक्तसमूहालंबनात्मकं स्मरणं विनापि निर्वाह इति

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

संक्षेपः । ३ । अत्र विशिष्टवैशिष्ट्य न्यायो व्याख्यातः । ४ । नाज्ञात विशेपणाविशिष्टबुद्धिर्विशेष्यं संक्रमतीत्यपि न्यायः । पूर्वैसदत्हतः विशेषणज्ञानस्य विशिष्ट ज्ञानहेतुत्वान्न तदंतरेण तत्सिद्धिः। न हि दण्डज्ञानं विना दंड इति ज्ञानं संभवति । न चाज्ञातविशेषणं तद्विशेष्यं विषयीकरोतिति तदर्थः । ५ । यच्चोभयकोटिकसंशये एकत्र बस्त्वर्थहानि । द्वितीयस्वीकारे त्वेकार्थहानिस्तव द्वितीयपक्षः स्वीकर्तव्य इति विवक्षायां त्यजेदेकं कुलस्यार्थेति न्यायः । प्रसरति तद्यथा कठवाक्यं

आत्मानं रथिनं विद्धि, शरीरं रथमेव तु ।
बुद्धिं तु सराथिं विद्धि मनः प्रग्रहमेव च ।।
इंद्रियाणि हयानाहुर्विषयांस्वेषु गोचरान् ।
आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः ।।

सोऽध्वनः परमाप्नोति तद्विष्मो परमं पदम् इत्यतेन्द्रियादेः पुंसः संसारित्वमन्यस्य च परं पदं श्रावयित्वाकिं तदित्याकाक्षायां तेभ्य एवेंद्रियादिभ्य परमात्मानं विष्णोः पदं दर्शयति। मिथ्यात्वे निश्चिते घटादिषु स्थालीपुलाकन्यायेन तन्निश्चेयं पुलाकाः सूक्ष्माधान्यविशेषाः। यथा प्रज्वालितचुल्ल्यधिरोहित स्थाल्यंतर्गतेषु एतस्मिन् पक्वे निश्चिते सर्वे पक्वा इति निश्चीयंते तद्वत् प्रकृतेऽपीत्यर्थः । ९ ।१८ । अनेकेषु पदेषु वाक्येषु चाव्याख्येयेषु प्रथमपठितमपि वाक्यं पदं वा बहु वक्तव्यं परित्यज्य मध्ये अन्ते वा पठितं स्वल्पवक्तव्यं पूर्वं व्याख्यायते। यत्तच्छूची कटाहन्यायेनेति ज्ञेयम्। यथा लोहकारं प्रति पूर्वं कश्चित्तेन कटाहोत्पादनार्थी समागतः, पश्चात् सूच्युत्पादनार्थी प्राप्तस्तत्र यथा लोहकारः प्रथमं कर्तव्यत्वेन प्राप्तमपि कटाहं बहुकालसाध्यत्वात्परित्यज्य पश्चात्कर्तकतया प्राप्तामपि स्वल्पकालसाध्यां सूचीं पूर्वमुत्पादयति तथा प्रकृतेऽपि। १० ।१९ । देश्यविधेयार्थानां संख्यासाम्ये यथाक्रमं संबंध इति विवक्षायां यथासंख्यन्यायो यथासंख्यमनुदेशः समानमिति पाणिनिसूत्रसिद्धः प्रयुज्यते तथा टादु सिंहसामिनात्स्या इत्यादिषु पाणिनीयेषु सूत्रेषु ढाङसिङस्तादीनुदिश्येनात्स्य प्रभृततयो विधीयन्ते। ते च यथाक्रमं प्रथमः प्रथमेन द्वितीयो द्वितीयेनेत्यन्वयं प्राप्नुवन्ति, तथा द्वेवा ब्रह्मणो रूपे मूर्तं चामूर्तं चेत्युद्दिश्य विधीयते। 'अथात आदेशो नेति नेति' इति तत्र हि क्रमेण मूर्त्तामूर्त्तयोर्निषेधद्वयमन्वेति, अन्यथोभयत्र निषेधद्वयान्वये मूर्त्तामूर्त्तयोरनिषेधप्रसंगे न द्वैतापत्तिः स्यात् ब्रह्मणि । अपि वा निषेधान्वये शून्यवादप्रसंगः । अयं च न्यायः उद्देश्यविधेय हीनेष्वपि समसंख्येषु क्वचित् प्रवर्तते यथाऽभाज्यान्नास्तेदोषवंतः समासमाभ्यां विषमसमेषूना न इति स्मृती नह्यत्रोदेश्यविधेय भावोऽस्ति, विद्यते च यथासंख्यमन्वयः। एवं

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

पृथिव्यंभसोर्गंधरसावित्यादावपि बोध्यम्। ११।२०। सर्वसाधारण्येन प्राप्तोऽर्थ उच्यमानो यत्र स्वेन सह प्राप्तेतर परिसंख्याया पर्यवस्यति तत्रापभक्षन्यायावतारः। यथा कक्ष्योऽयं द्विज इत्युक्तिरक्यक्षणस्यान्नादि भक्षकेष्वपि सत्त्वादस्मिंस्तदितर भक्षणनिषेधे पर्यवस्यति। १२।२१। वायुभक्षन्यायः। १३।२२। कुंभीधान्यायश्चापीदृशः। यथा कुंभीधान्याय विप्रायेयं धेनुर्देयेत्यत्र विशेषणसाफल्याय कुंभ्यामेव धान्य यस्येति विगृह्यते। तथा तं त्वौपनिषदं पुरुषं पृच्छामीत्यत्रौपनिषदमिति उपनिषन्मात्र गम्यमिति विगृह्यतां अन्यथा विपुलधान्यराशिमतामपि सर्वेषां विप्राणां कुंभ्या धान्यसंभवेन कुंभी धान्यायेति विशेषणवैयर्थ्यवज्जीव तदुपाध्यादेरप्यौपनिषदबोध विषयत्वसंभवेन विशेषमवैयर्थ्यापतात्। एवं चोदनालक्षणोऽर्थो धर्म इत्यादावपि बोध्यम्। १४।२३। यत्र सामान्यबाधकं पदं सहप्रयुक्त विशेष वाचक पदबलात्तदर्थान्यविशेष परतया नीयते तत्र ब्राह्मणपरिव्राजक न्यायः। यथा ब्राह्मणा भोज्यंतां परिव्राजकाश्चेत्यत्र परिव्राजकानामपि ब्राह्मणत्वात् ब्राह्मणपदं परिव्राजकेतर ब्राह्मणपरं तथैतस्मात् जायते प्राणो मनः सर्वेन्द्रियाणि चेति श्रुतावन्तरिंद्रियस्य मनसः समभिव्याहारत् सर्वेन्द्रियाणीति पदं; तदन्यत्सर्वेन्द्रियपरं इदमुदाहरणांगम्। इन्द्रियत्ववादि मते मतांतरे तु। तस्मात् हेतु ब्रह्म नाम रूपमन्नं च जायते इत्यादि बोध्यम्।। १५।२४। ब्राह्मणवसिष्ठन्यायोपीह बोध्यः। ब्राह्मणा आयाता, वसिष्ठोऽप्यायात इत्यत्रापि सामान्यपदस्य विशेषपदसमवधानात् तदितर विशेषपरत्वात्। १६।२५। गोवलीवर्द न्यायोऽपीदृशः। एतावांस्तु विशेषः। यद्यत्र विशेषेणोपात्तस्य प्राशस्त्यमभिप्रेतं तत्र पूर्वन्याय द्वय प्रवृत्तिः, यत्र तन्नास्ति, तत्रैवास्य प्रसिद्ध्यप्रिसिद्धिनिवंधनश्चायं-गोपदस्य हि स्त्रीव्यक्तौ प्रसिद्धिरप्रसिद्धिश्च पुंव्यक्तौ। अत एव गामनय वलीवर्दं चेति प्रयुज्यते। उदाहरणं तु देवा मनुष्याः पशवो वयांसि सिद्धांसयक्षोरगदैत्य संघाप्रेता पिशाचास्तरवः समस्ता ये चान्नमिछंति मया प्रदत्तमित्यादि। अत्र हि विद्याधराप्सरोयक्षरक्षो गंधर्वकिन्नराः पिशाचो गुह्यकः सिद्धोभूतोऽमी देवयोनयः इत्यभिधानात्, सिद्धादीनामपि देवत्वेन देवपदस्य सिद्धादीतरदेवपरत्वं विद्यते। न चेन्द्राद्यपेक्षया तेषां प्राशस्त्यमस्ति। न च देवपदस्य पिशाचादौ प्रसिद्धिरस्तीति सर्वमनवद्यम्।१७।२६। विशिष्टवाचकानामपि पदानां सति पृथग्विशेषणवाचक पदसमवधाने विशेष्यमात्रपरतायां करिबृंहितन्यायः। बृंहितं करिगर्जितमिति कोशाद्विशिष्टवाचकस्य बृंहितपदस्य तत्र सद्विरदबृंहित शंकीत्यादौ विशेषणवाचि द्विरदपदसमवधानाद्यथा गर्जित रूपविशेष्यमात्रपरत्वम्। तथा स्वप्ने स जीवः सुखदुःख भोक्तेति श्रुतौ सुखदुःख साक्षात्कार कर्तृत्वस्य भोक्तृत्वाद्विशिष्टवाचकस्यापि भोक्तृ पदस्य सुखदुःखशब्दसमभिव्याहारात् साक्षात्कर्त रूपविशेष्यमात्रपरत्वमिति।।

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

१८ ।२७। एतेन न्यायषट्कव्याख्यातं बोध्यम्। गजघटन्यायः। १९ ।२८। नीलेन्दीवरन्यायः ।२० ।२९। पर्वताधित्यकान्यायः ।२१ ।३०। पर्वतोपत्यकान्यायः। २२ ।३१। वाजिमन्दुरन्यायः ।२३ ।३२। मृगवागुरान्यायश्च करिणां घटनाघटा इंदीवरं नीलेऽस्मिन् उपत्यकान्द्रेशसन्नात्तस्यैवोर्ध्वमधित्यका। वाजिशाला तु मंदुरावागुसमृगवंधिनीति कोशाद्विशिष्टवाचकतामपि घटादि पदानां नैवान्यत्र मदांधसिंधुरघटा नीलेन्दीवरलोचनः अधित्यकायामिव धातुमय्यां लोध्रद्रुमं सानुमतः प्रफुल्लमित्यादौ विशेषणपदसममभिव्याहाराद्विशेष्य मात्रपरत्वात् इति। २४ ।३३। यत्र विशेषशास्त्रोद्देश्य विशेषधर्मावच्छिन्न वृत्तिसामान्य धर्मावच्छिन्नोदेश्यक शास्त्रस्य विशेषशास्त्रेण बाधस्तत्र येन नाप्राप्ते यो विधिरारभ्यते स तस्य बाधको भवतीति न्यायो बत इति प्रास इति भावे उक्ता येन नाप्राप्त इत्यस्य यत्कर्तृकावश्य प्राप्तावित्यर्थः। नञद्वयस्य प्रकृत्यर्थ दार्ढ्यबोधकत्वात् सामान्यशास्त्राप्राप्तियोग्येऽवारितार्थ्यं दार्ढ्यबोधकत्वात् सामान्यशास्त्राप्राप्तियोग्येऽवारितार्थ्यं हि विशेषशास्त्रस्य बाधकबीजं ब्राह्मणाभोज्यन्तां माढरकौण्डिन्यो परिवेविष्टामित्यत्र यथा भोजनकर्तृकावश्यप्राप्तौ परिवेषण विधेरारब्धत्वात्तेन सामान्यशास्त्राप्राप्तियोग्ये शूद्रादावचरितार्थेन विशेषविधिना स्वोदेश्यमाढरत्वादि विशेषधर्मावच्छिन्नवृत्ति ब्राह्मणत्व लक्षणसामान्य धर्मावच्छिन्नो देश्यकस्य ब्राह्मणाभोज्यन् ।ामिति शास्त्रस्य बाधः। तथा न हिंस्यात्सर्वाभूतानीति हिंसानिषेधकर्तृकावश्य प्राप्तांवग्नीषोमीयं पशुमालभेतेत्याद्याग्नीषोमीयादि पश्वालंभनविधेरारब्धत्वात्तेन सामान्यशास्त्राप्राप्ति योग्ये पुरोडाशादावचरितार्थेन विशेषविधिना स्वोद्देश्याग्नीषोमीयत्वादि विशेषधर्मावच्छिन्न वृत्तिभूतत्वलक्षणसामान्यधर्मावच्छिन्नोद्देश्यकस्य "न हिंस्यादिति" शास्त्रस्य बाधः। एवं वाजपेये सुराग्रहादिष्वपि द्रष्टव्यम्। न सुरां पिबेदित्यादि निषेधस्य विहितेतर विषयत्वात्। तथा वर्णिनां हि वधो यत्र साक्ष्यन्यृतं वादेदित्यत्रापि ज्ञेयम्। न च तत्पावनाय निर्वाच्यश्चरुः सारस्वतो द्विजैरिति प्रायश्चित्तविधानात्तस्य निषिद्धत्वं निर्धार्यत इति शंक्यम्। निषिद्धत्वानिर्धारणात् प्रायश्चित्तत्वनिप्रायश्चित्त विधानाच्च निषिद्धत्व निर्धारणे श्वभृत्यन्यायेनान्योन्यात्वश्चग्रहेष्टि विधातवन्नैमित्तिकत्वेताप्युपपत्तेरनृत जाद्यनोशार्थत्वकल्पनायोगात् विधित एव प्रवृत्युपगमो नात्र रागतोऽप्रवृत्तेरिति दिक्। इति येन नाप्ताप्त न्यायः। २५ ।१३४। अत्र प्रासंगिको अश्वभृत्यन्यायः कस्यायमश्वो यस्याहं भृत्यः त्वं भृत्यः कस्य? यस्यायमश्व इत्यत्र यथा न वस्तुनिर्णयस्वथा प्रकृतेऽपीत्यर्थः ।१ ।३५। यत्रान्योन्याश्रयो न दोषाय यथा देहादष्टादौ तत्र बीजवृक्षन्यायः। २ ।३६। अंडकुकुटीन्यायश्च प्रवर्तते। अपद्युत्पत्तावन्येन्याश्रयः, प्रवाहानादित्वान्न दोषावहः ३ ।३७। यत्रोद्वाह्योद्वाहक भावे स दोषस्तत्र नौनाविक न्यायः। ४ ।३८। [illegible] नहि सुशिक्षितोऽपि वटुः स्वस्कन्धमारोढुं पटुरिति

CC-0 Agamnigam Digital Preservation Foundation Chandigarh. Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

न्यायः प्रवर्तते। ५।३९। कर्त्तारं विना करणस्य कार्याक्षमत्वविवक्षायां न हि सुतीक्ष्णाप्यसिधारास्वयं छेत्तुमाहितव्यापारेति (व्यापारेति) न्यायः इति येन नाप्राप्तन्यायांतरगतस्तेन संगताश्च न्यायाः। ६।४०। तत्र कौण्डिन्यन्यायोऽपि सामान्यशास्त्रप्राप्तस्य विशेषशास्त्रेण बाध एव प्रवर्त्तते यथा ब्राह्मणेभ्यो दधि दीयतां तक्रं कौण्डिन्यायेत्यत्र कौण्डिन्यस्यापि ब्राह्मणत्वात् सामान्यशास्त्रेणास्यापि दधिदानं प्राप्तं, तच्च विशेषविहितेन तक्रदानेन नापोद्यते। एवमाहावनीये जुहोतीति सामान्यशास्त्रप्राप्तस्याहवनीयाधिकरणक होमस्य पदे जुहोतीति विशेषविहितेन पदहोमेन बाधः। तथा 'यतो वा इमानि भूतानि जायन्ते' इति श्रुत्या बोधितस्य भूतेषु साक्षात् ब्राह्मकार्यत्वस्य 'तस्माद्वा एतस्मादात्मन आकाशः संभूतः, आकाशाद्वायुरि'त्यादि विशेषश्रुत्या बाधः। न चैकविज्ञानात्सर्वविज्ञानश्रुति विरोधः, व्योमादेर्ब्रह्मानन्यतया तद्भावायन्नब्रह्म जन्मत्वेन तद्विज्ञानाद्विज्ञानसंभवात्। न चैवमेतयोर्वाक्ययोर्नौतन्यायोदाहरणत्वम्। आकाशादि भावनापन्न ब्रह्मकार्यत्वस्य सामान्यश्रुत्या बोधितस्य बाधान्न्यायसंगतेः। न चानयोर्न्याययोः सांकर्यं शंक्यम्। विरोधात्सामान्यशास्त्रस्य विशेषशास्त्रेण बाधे पूर्वन्यायस्य फलसाम्यात् तेन तस्य बाधे तूत्तरस्य प्रवृत्तेः। समकालिकभोजन परिवेषणयोर्हि सा तत्प्रतिषेधयोश्च विरोधः स्पष्टः। दधि तक्रयो स्वोदनसेकरूपस्य वा तृप्तिरूपस्य वा फलस्य साम्यात् बाध्यबाधकता दधिफलस्यं तक्रेणैव जनितत्वाद्दध्नो विवृत्तिः। अत एव ब्राह्मणेभ्यो दधि दीयतां कंबलः कौंडिन्यायेत्यत्र न बाध्यबाधकभावः। एवं होमयोरपि क्रतूपकार लक्षणस्य लक्ष्यै (फलस्यै) क्यातबाध्यवाधकतेति। २६।४१। केचिन्न्यायाव्याकरणमात्रगोचरास्ततुदाहरणस्यान्यशास्त्रेऽनुपलंभात्, व्याकरणोदा हरणत्वन्नानुपयुक्तत्वात्तत्स्वरूपं बीजं च प्रदर्शते पुरस्तादपवादा। अनन्तरान् विधीन् बाधन्ते नोत्तरानीति न्यायः, अवश्यं स्वपरस्मिन् बाध्ये प्रथमोपस्थितानंतरबाधेन चारितार्थ्ये पश्चादुपस्थितस्य ततः परस्य बाधे मानाभावः, आकांक्षानिवृत्तेर्विप्रतिषेधशास्त्रबाधे मानाभावाच्चेत्येतस्य बीजम्। २७।४२। मध्येपवादाः पूर्वान् विधीन् बाधन्ते नोत्तरानिति न्यायः पूर्वोपस्थितबाधेन नैराकांक्ष्यमस्य बीजम्। २८।४३। पूर्वं ह्यपवादा अभिनिवेशन्ते पश्चादुत्सर्गा इति न्यायः क क्षणैकचक्षुष्को ह्यपवादविषयं पर्यालोच्य तद्विषयत्वाभावनिश्चयो उत्सर्गेण तत्तल्लक्ष्यं संस्करोति। अन्यथा विकल्पापत्तिरिति अर्थः। अभिनिविशन्त इत्यस्य बुद्ध्यारूढा भवंतीत्यर्थः। २९।४४। प्रकल्प्यवायवादविषयं तत उत्सर्गोऽभिनिविशत इति न्यायः। तत इत्यस्यापवाद शास्त्रपर्यालोचनात् प्रागपीत्यर्थः। प्रकल्प्य। इत्यस्य परित्यज्येत्यर्थः। ततश्च लक्ष्यैकचक्षुष्कस्तच्छास्त्र पर्यालोचनं विना।८४। अपवादविषयं परित्यज्योत्सर्गेण संस्करोतीति न्यायार्थः। येत्वाहुर्ये नताप्ताप्तन्याये प्रदर्शित विधिनिषेधे वाक्ययोर्न सामान्य विशेषभावः न हि यथा होममात्राधिकरणतया [illegible]

CC-0 Agamnigam Digital Preservation Foundation Chandigarh Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

संकोचस्तथेह हिंसामात्रविषयतया निषेधः प्रवर्तते येन विशेषेण संकोचः स्यात् किंतु रागप्राप्तहिंसायमेव तावतापि निषेधोपपत्तौ न क्रतुप्रकरणेऽपि निषेधप्रवृत्तिः प्रमाणाभावात्। प्रत्युत पदार्थाप्रवृत्तिस्तदर्थप्रतिषेध इति न्यायेनानृतवदतादि निषेधस्येवास्यापि क्रत्वर्थत्वं स्यात्तथा चानयोर्विधिनिपेधयोर्गतं हणाग्नहणवद्विकल्पः स्यादित्यनर्थपरंपरापत्तिरिरिति तेषां तदप्यस्योदाहरणं बोध्यम् ।३ ।४५ । उपजनिष्यमाणनिमित्तोप्यपवादं संजातनिमित्तमप्युत्सर्गं बाधत इति न्यायः। अस्य तु भवति शास्त्रेप्युदाहणम् ।

तथा हि ज्योतिष्टोमे बहिष्पवमानाख्यस्तोत्रं कर्तुः क्रमेण पृष्टतो हस्तेन संस्पृश्योपसर्पतामृत्विजांमध्ये उद्गातुरपच्छेदे यद्युद्गातायच्छिंद्येतादक्षिणं यज्ञमिष्ट्वा तेन पुनर्यजेतेति श्रुतिजन्या तन्निमित्ता प्रायश्चित्त कर्तव्यताबुद्धिः पश्चात् प्रतिहर्त्रपच्छेदे यदि प्रतिहर्त्रा यच्छिंद्येत सर्ववेद संदद्यादिति श्रुतिजन्यया प्रायश्चित्तांतरकर्तव्यताधिया बाध्यते। अत्रोपजनिष्यमाणनिमित्तांतरे क्रतौ पूर्वनिमित्तक प्रायश्चित्तस्यांगत्वादि प्रागेव बाध्यते। अन्यथास्य निमित्तांतररहित क्रतुवत्तदननुष्टाने वैकल्यप्रसंगादुत्सर्गाय वादत्वं चात्र बाध्यकभावेनोपचारादिति संक्षेयेयः। ३१ ।४६ । पूर्वात्परबलीयस्त्वन्यायः। ३२ ।४७ । स्थावरजंगमविषयन्यायश्चेह बोधः। रजतादि ज्ञानतद्बाधे ज्ञानयोः सर्पवत्सनाभादिरूपजंगमस्थावरविषयोश्चोत्तरेण पूर्वबाधः प्रसिद्धो यथा तथा प्रकृतेऽपि इयांस्तु विशेषः। यत्पूर्वास्मिन् पूर्वोत्तरभावस्यापि नियतत्वाद् बाध्यबाधक भावो नियतः। अतस्तत्र तादृशयोर्जगतः सत्यत्वमिथ्यात्वज्ञानयोरुदाहरणत्वं बोध्यम्। द्वितीये तु अनियतपूर्वापरभावप्रयुक्त बाध्यबाधकभावस्यानियतत्वात्तादृशयोरुद्गातृप्रतिहर्त्रपच्छेदयोरुदाहरणत्वमति।

३३ ।४८ । अनंतरस्य विधिर्वाभवति प्रतिषेधो वेति न्यायः। अयमपि व्याकरणमात्रगोचरः। न हन्यादित्यादावव्यवधानेन नञर्थस्य धात्वर्थेतान्वयाद्यजेन्नहन्यादित्यस्योदाहरणमिति चेन्न। अव्यवधानेपि धात्वर्थस्य प्रत्ययार्थोपसर्जनत्वेनोपस्थितस्य नञर्थेनान्वयानुपपत्तेः। एवं चाव्यावधानेपि नञर्थो न धात्वर्थेन संबध्यते। किन्तु प्रत्ययार्थेन तस्य प्राधान्यादिति दिक्। ३४ ।४९ । एवमन्येप्यविकादयोतायाव्याकरणमात्रगोचराः संति दिङ्मात्रमिह दर्शितं कृदभिहितो भावो द्रव्यवत्प्रकाशत इति न्यायस्य तु प्रमाणं प्रमेयेति गौतमीयसूत्रांतर्गतमधिगम इति पदमुदाहरणं बोध्यम्। तथा च तत्त्वज्ञानान्निः श्रेयसाधिगम इत्यस्याधिगम्यमान निः श्रेयसतत्त्व ज्ञानाद्भवति इत्यर्थः। अन्यथा ज्ञानस्य मोक्षं प्रत्यहेत्वापत्तेरिति। ३५ ।५० । तक्र कौण्डिन्य न्याये प्रदर्शितायास्तस्माद्वा एतस्मादात्मन इति श्रुतेर्वीचीतरंग न्यायोदाहरणत्वमपि बोध्यम्।

तथाहि वीचितरंग शब्दौ हि पर्यायौ भंगस्तरंगदूर्मि वा स्त्रियां वीचिरिति कोशात्। एवं च यथा बाह्वादि संयुक्ताङ्कदाद्वीचिर्जायते तदभावापन्नाच्च तस्मात्तरंगं तदभावात्तथा

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

मायोपहिताद्ब्रह्मणः खमुत्पद्यत तद्भावापन्नाच्च तस्याब्दायुरित्यादि तार्किकास्तु, शब्दोत्यवेतमवतारयंति भेरीदेशे जातः शब्दोवीची तरंगन्यायेन स्वसंनिहितं शब्दांतरमारभते। स च शब्द शब्दान्तरमिति क्रमेण श्रोत्रदेशे जातोऽन्य शब्दः श्रोत्रेणां गृह्यते इति। ३६ ।५१। तदेकदेशिनस्तु कदंबमुकुलन्यायमिहावतारयंति। यथा हि कदंबमुकुलात्कालविशेषनिमित्तेन सर्वासु दिक्षु युगपद्बहूनि केसराण्युत्पद्यंते तथा भेर्यादि दंड संयोगेन वंशादि दलद्वयविभागेन वा निमित्तेन भेर्यादि देशावच्छिन्न आकाशे दशसु दिक्षु दशशब्दा जायन्ते एतावन्मात्र एष दृष्टान्तः। अग्ने तु पूर्वोक्तप्रकारेण स्वसंनिहितानन्यशब्दानारंभंते इत्यादि ज्ञेयम्।। ३७ ।५२। अन्योन्यनाश्यनाशक भावविवक्षायां सुन्दोपसुन्दोपसुन्द न्यायः। यथा हि सुन्दोपसुन्दा संज्ञौ सहोदरावसुरौ तिलोत्तमार्थं परस्परं बाध्यबाधकभावेनोभावपि नष्टाविति भारते प्रसिद्धम्। तथा वीचीतरंगन्यायेनोत्पन्नानां कार्यशब्दनाश्यानामंत्यो यांत्यशब्दौ परस्परेण नाश्यावंत्यउपांत्येनोयांत्याश्चासनेति केचित्तार्किकाः। तदयुक्तमित्यपरे उपांत्येतद्विक्षणावस्थापितांत्यस्य द्वितीयक्षणवृत्तिध्वंसप्रतियोगिना तृतीयक्षण उत्पद्यमानांत्यध्वंसजननायोगात्। तस्मादुपांत्यनाशादेवांसनाश इति तर्ह्यतन्न्यायोदाहरणमिति चेत् सत्प्रतिपक्षावित्यवेहि। तौ हि परस्परानुमिति प्रतिबन्धकत्वेनानुमितिकरणत्वरूपानुमानत्वनिरासकौ भवतः। इदमेव तयोरितरेतरनाशकत्वं नामेति।।

३८ ।५३। अयं तुल्यबलयोर्विरोधे प्रसरति प्रबलनिर्बलविरोधे सबलेन निर्वलबाधाविवक्षायां तु मात्स्यन्यायावतारः। अयं प्राय इतिहासपुराणादिषु दृश्यते। तथा हि वासिष्ठे प्रह्लादाख्याने तत् समाधिं प्रस्तुत्योक्तं एतावताथकालेन तद्रसातलमंडलं भूवाराजकं तीक्ष्णं मात्स्यन्याय कदर्थितमिति यथा प्रबला मात्स्या निर्वलतान्नाशयंति तथा राजकेमुकदेशे प्रबला जना निर्बलान्नरान्नाशयंति स्मेति न्यायार्थः। प्राग्दर्शित आगमेन प्रत्यक्षादि बाधोऽप्यस्योदाहरणं बोध्यम्। प्रबलश्रुत्यादि प्रमाणैर्निर्बललिंगादि प्रमाणबाधेऽप्ययं बोध्यः।

तथा हि विधिविशेषस्य सहकारीणि षट्प्रमाणानि श्रुतिलिंगवाक्य प्रकरणस्थानसमाख्यारूपाणि विध्यंतरस्य च श्रुत्यर्थपाठस्थानमुख्यप्रवृत्याख्यानि तेषु पूर्वपूर्वस्य प्रबलत्वेनानेन न्यायेनोत्तरोत्तरबाधकत्वमग्रे वक्ष्यामस्तावत्तदुपोद्घातत्वेन विधिभेदाः संक्षेपतो निरूप्यंते अप्राप्तं फलवन्तं चार्थं यः स्वसामर्थ्येन प्रकाशयति स विधिरुत्पत्यादिभिः धर्मयुक्तैः सन्नुत्पत्तिविधिर्विनियोगविधिः प्रयोगविधिरधिकारिविधिश्चेति चतुर्विधो भवति। तत्र कर्मस्वरूपमात्रबोधको विधिः प्रथमः। यथाग्निहोत्रं जुहोतीति अंगसंबन्धबोधको विधिर्विनियोगविधिः। यथा दध्ना जुहोतीति, सहि तृतीयाप्रतिपत्रांगभावस्य दध्नो होमसंदंधं

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

विधत्ते दध्ना होमं भावयेति दध्यादीनामंगत्वं नाम परो देश्यप्रवृत्तिकृतिव्याप्यत्वपारार्थ्यम्। तच्चानेन विधिना ज्ञाप्यते। प्रयोगप्रांशुभावबोधकोविधिः प्रयोगविधि सचांगवाक्यैकवाक्यतामापन्नः प्रधानविधिरेव। स हि सांगं प्रधानमनुष्ठापयन् विलंबे मानाभावात् अविलंबापरपर्यायं प्रयोगप्रांशुभावं विधत्तेत च विलंबवदविलंबोऽपि मानाभावः विलंबेगं प्रधानविध्यैकवाक्यतावगततत्साहित्यादुपपत्तेः। नहि विलंबेन कृतयोः पदार्थयोः सहकृतमिति साहित्यं व्यवहरन्ति। स चाविलंबो नियतेक्रमे आश्रीयमाणे भवति। अन्यथा किमेतदनंतरमेतत्कर्तव्यमेतदनंतरं वेति प्रयोगविक्षेपापत्तेः। अतः प्रयोगविधेरेव स्वविधेयप्रयोग प्राशुभावसिध्यर्थं नियतं क्रममपि पदार्थविशेषणतया विधत्ते। तत्र क्रमो नाम विततिविशेषः पौर्वापर्यरूपो वा इति फलस्वाम्यबोधको विधिरधिकारविधिः। फलस्वाम्यं च कर्मजन्य फलभोक्तृत्वं वोध्यते। तच्च स्वाम्यं तस्यैव योधिकारिविशेषणविशिष्टः। अधिकारिविशेषणं च तदेव यत्पुरुषविशेषणत्वेन श्रुतम्। अत एव राजा राजसूयेन स्वाराज्यकामो यजेत इत्यनेन स्वाराज्यमुद्दिश्य राजसूयं विदधतापि न स्वाराज्य काममात्रस्य तत् फलभोक्तृत्वं बोध्यते, किंतु राज्ञः सतस्तत्कामस्य किंचित्तु पुरुष विशेषणत्वेनाश्रुतमप्यधिकारिविशेषणं भवति यथाध्ययनविधिसिद्धा विद्या अग्निसाध्येपु च कर्मस्वधानसिद्धाग्नि प्रत्ता एवं सामर्थ्यसाप्यधिकारि विशेपणत्वम्। आखर्तर्नामर्थं ब्रूवतां शक्तिःसहकारिणीति न्यायात् असमर्थंप्रति विध्यप्रवृत्तेश्च, एवमर्थितादेरपि बोध्यामिति दिक् तत्सिद्धं फलस्वाम्य बोधकोऽधिकारि विधिरिति। तदेवं निरूपितश्च तु विधिरर्चिधो विधिः उत्तरकांडेऽप्युपलभ्यते सः।। तथा हि तस्माद् ब्राह्मणाः पांडित्यं निर्विद्येत्यादिरुत्पत्तिविधिः, मंतव्य इत्यादिर्विनियोगविधिः तद्विजिज्ञासस्वेत्यादिना तु सन्प्रत्ययवाच्याया इच्छायाः प्रकृत्यर्थभूतस्य ज्ञानस्य चानुष्टातुमशक्यतया सन् प्रत्ययेन विचारं लक्षयित्वा प्रकृत्या च फलीभूतं ज्ञानं लक्षयित्वाऽद्वितीयब्रह्मज्ञानाय तत्कर्त्तव्यता विधीयते। ब्रह्मसाक्षात्कारकामो वेदान्तविचारं कुर्यादिति। अतोऽयमधिकारविधिः। साधन चतुष्टयसंपन्नोऽधिकारी जिज्ञासुः सांगं वेदान्तश्रवणं कुर्यादिति प्रयोगविधिः। पुनः प्रकारान्तरेण त्रिविधः। स च विधिर्वा स्यादपूर्वत्वाद्वादमात्रं ह्यनर्थकं, उक्तं चापूर्वत्वात् विधिस्तु धारणे अपूर्वत्वात् नियमार्था पुनः श्रुतिरुच्यते परिसंख्येत्येवमादिषु भगवतो जैमिनेःसूत्रेषु व्यवहृतः पदपादैश्चान्योन्यर्णसंकीर्णतया सलक्षणो विस्पष्टमुपपादितः विधिरत्यंतमप्राप्तौ नियमः पाक्षिके सति तत्र चान्यत्र च प्राप्तौ परिसंख्येति गीयत इति। अस्यार्थः। यस्य यदर्थत्वं मानान्तरेणाप्राप्तं तस्य तदर्थत्वेन यो विधिः सोऽपूर्वविधिः। यथा यजेत स्वर्गकामः ब्रीहीन् प्रोक्षतीत्यादिः, नात्र यागस्य स्वर्गार्थताया व्रीहीणां प्रोक्षणस्य च संस्कारकर्मणो विधिं विना कथमपि प्राप्तिरस्ति। अतोऽयमपूर्व एव विधिः पक्षप्राप्तस्याप्राप्तांश परिपूर्णफलो विधिर्नियमविधिः। यथा

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

व्रीहीनवहंतीति। अत्र विध्यभावेऽपि पुरोडाशप्रकृतिद्रव्याणां तंडुलनिष्पत्त्या क्षेपादेवावहनन प्राप्तिरस्ति। किंतु तद्वदेव लोकावगतकारणत्वावशेषान्नखविदलनादिरपिक्षे प्राप्नुयादित्यवहननाप्राप्तांशसंभवात्तदंशपरिपूर्णफलः, उभयत्रैकस्योभयोर्वैकत्र युगपत्प्राप्तावन्यतरनिवृत्तिफलो विधिः परिसंख्या विधिः। यथा चयनेऽश्व गर्दभ रसनयोर्ग्रहणे युगपदनुष्टेये सामर्थ्याविशेषात् प्राप्तस्येमामगणन्वासानामृतस्येति मंत्रस्याश्वाभिध्यातीमादत्ते इति गर्दभरसनाग्रहण व्यावृत्तिमात्र फलकोविधिः, एवं पंच पंचनखा भक्ष्य इत्यपि परिसंख्याविधिः। इदं हि न भक्षणपरं तस्य रागतः प्राप्तत्वात् किन्त्वयं च पंचनखभक्षण निवृत्तिपरमिति नच नियमपरिसंख्ययोः फलतो न विशेषः। यतो नियमस्य विधेयावघातनिष्ठत्वात् संनिहितमप्राप्तांशपूर्णमेव फलं नखविदलनादि निवृत्तिस्त्वार्थिकीति। अथ श्रोतव्य इति को विधिरिति विचार्यते। तत्र केचिच्छ्रवणं श्रोतव्यार्थसाक्षात्कारहेतुरिति विशेष नियमस्यापीदानीं केषुचिद्वामदेवे चान्वयव्यतिरेकव्यभिचारादसिद्धेः। अलौकिके ब्रह्मसाक्षात्कारे लौकिकोपायाप्राप्तेश्च यद्युपायांतरेण सह विकल्पेन समुच्चयेन चाश्रवणं मानांतरेण प्राप्तं स्यात्तदा नियमः परिसंख्या चेति संभावना स्यात्। नतु तथास्तीत्यपूर्वं विधिरेवायमिति मन्यन्ते। अपरे तु विचारमात्रे विचार्यनिर्णयहेतुत्वस्य लोकसिद्धत्वादपरोक्षार्थ विषयमानावच्छेदेनापरोक्ष हेतुत्वस्य ग्रन्थकृद्भिः शब्दापरोक्ष वादे व्यवस्थापनाच्च। यत्साक्षदपरोक्षाद्ब्रह्मेति श्रुतेर्नित्यापरोक्षब्रह्म प्रमाणविचारित वेदान्तरूपश्रवणस्यापि ब्रह्मसाक्षात्कारहेतुत्वमर्थप्राप्तमेव परंत्वात्मत्वजिज्ञासेरेतद् विध्यभावे मनोगोचरे स्वस्मिन् श्रुतिबोधित सूक्ष्मतमविशेषावधारणाय मनस एव सप्रणिधान व्यापारेऽद्वैतशास्त्रश्रवणे वा मेधाविनो गुरुनिरपेक्ष वेदान्तविचारे मंदव्युत्पन्नस्य भाषाप्रबंधश्रवणे प्रवृत्तिप्रसक्तिरस्तीति साधनत्वभ्रांतिप्राप्तैर्मनः प्रणिधानार्दिभिः गुर्वधीनाद्वितीयात्मपरवेदांतश्रवणस्य पाक्षिकत्वप्रसक्तौ नियमविधिरयमित्याहुः। चिकित्साज्ञानार्थं चरकादि ग्रन्थश्रवणे प्रवृत्तस्येव ब्रह्मज्ञानार्थं वेदांतश्रवणे प्रवृत्तस्यापि मध्ये मध्ये प्रवृत्त्यन्तरप्रसक्तौ तन्निवृत्तिफलकः परिसंख्याविधिरुपपत्तिरन्ये। आगमाचार्यवाक्यजं ज्ञानमेव श्रवणं तस्मिंश्च विषय प्रमाणतंत्रेऽयोग्ये शिलादौ क्षुरधारेव श्रूयमाणो विधिः कुंठीभवतीति नात्र विधित्रयस्याप्यवकाश इतीतरो परे तु विचारेऽपि विचार्यनिर्णयहेतुत्वस्य लौकिकमानसिद्धत्वात् गुरूपसदनविधेर्दृष्टार्थवत्वाय गुरुपूर्वकत्वनियमसिद्धेरीशानुग्रहलभ्याद्वैतशास्त्रश्रद्धाहीनस्य श्रवणविधावपि द्वैतात्मश्रवणपरत्वसंभवादिति न कस्यापि विधेरवकाश इत्थाहुः। अलं प्रपञ्चेन तदेवं संक्षेपतो विधिभेदा निरूपिता तत्र विनियोगविधेः सहकारीणि पूर्वोक्तानि श्रुत्यादि षट्प्रमाणानि निरूप्यन्ते। तत्र निरपेक्षो रवः श्रुतिः। सा च त्रिविधा विधात्री, अभिधात्री विनियोक्त्री चेति। तत्र विधात्री लिङ्ाद्यात्मिका, अभिधात्री ब्रीह्यादि श्रुतिः। यस्य च शब्दस्य श्रवणादेव

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

संबन्धः प्रतीयते सा विनियोक्त्री। सा च त्रिविधा विभक्तिरूपा एकाभिधान रूपा, एकपदरूपा चेति। तत्र व्रीहिभिर्यजेतेति तृतीयाश्रुत्या व्रीहीणां यागांगत्वं पशुना यजेतेत्यत्रैकत्वपुंस्त्वयोः समानाभिधानश्रुत्याकारकांगत्वं यजेतेत्याख्याताभिहितसंख्याया भावनांगत्वं समानाभिधान श्रुतेरेव पदश्रुत्या च यागांगत्वं परिगणनं प्रायोऽभिप्रायंते। न शान्तोदांत उपरतस्तितिक्षुः समाहितः श्रद्धावितो भूत्वा आत्मन्येवात्मानं पश्येदित्यत्रत्का श्रुत्या शमादेरात्मदर्शनांगत्वं इति वृद्धोक्तिः संगच्छते। एवं रेवतीषु वारवंतीयमग्निष्टोमसमकृत्तेत्यादावपि बोध्यं सामर्थ्यं लिंगसामर्थ्यं सर्वभावानां लिंगमित्यभिधीयते इत्युक्तेः। तेनांगत्वं यथा बहर्देवसदनं दामित्यस्य मंत्रस्य लवनांगत्वं स हि लवनं प्रकाशयितुं समर्थः। तच्च लिंगं द्विविधं सामान्य संवन्धबोधकमांतारतरापेक्षं तदनपेक्षं च। तत्र यदन्तरेण यत्र संभवत्येव तस्य तदंगत्वं तदनपेक्षं इत्ययथार्थज्ञानस्य कर्मानुष्टानांगत्वं लवनं हि मंत्रं विनाप्युपायान्तरेण स्मृत्वा कर्त्तुं शक्यते। अतो न मंत्रौ लवनस्वरूपार्थः, संभवति किंत्वपूर्वसाधनभूतलवनकार्शनार्थः। तत्वं च न सामर्थ्यमात्रादवगम्यते लवनप्रकाशनमात्रे सामर्थ्यात्। अतोऽवश्यं प्रकरणादि सामान्यसंवन्ध बोधकमुपेयं दर्शपूर्णमास प्रकरणे मन्त्रस्य पाठादेवमवगम्यते अनेनमंत्रेण दर्शापूर्णमासा पूर्वसंवन्धि किंचित्प्रकाश्यत इति। अन्यथा प्रकरणपद वैयर्थ्यप्रसंगात् किं तदपूर्वसंवंधिप्रकाश्यमित्याकांक्षायां सामर्थ्याद्बर्हि लवनमित्यवगम्यते। समभिव्याहारो वाक्ये समभिव्याहारो नाम साध्यत्वादि वाचकाद्वितीयाद्यभावे वस्तुतः शेषशेषिणोः सहोच्चारणं यथा यस्य यस्य पर्णमयी जुहुर्भवतीति। अत्र नहि द्वितीयादि विभक्तिः श्रूयते किंतु पर्णता जुहोः, समभिव्याहारमात्रं तस्मादेव च पर्णताया जुह्वंगत्वं प्रतीयते, न चानर्थक्यं जुहूशब्देनापूर्वलक्षणात् तदयं वाक्यार्थः पर्णतयावत्तहविर्धारणाद्वारो योऽपूर्वसाधनं तद्भावयेदिति। एवं च पर्णतया यदि जुहुः क्रियते तदैव तत्साध्यमपूर्वं भवति नान्यथेति गम्यते इति न पर्णताया वैयर्थ्यं उभयाकांक्षा प्रकरणं यथा प्रयाजादिषु समिधो यजतीत्यत्र हीष्टविशेषस्यानिर्देशात् समिद्यागेन भावयेत् किमित्यस्त्युपकार्याकांक्षा दर्शपूर्णमासवाक्येपि दर्शपूर्ण मासाभ्यां स्वर्गं भावयेत्कथमित्यस्त्युपकारकाकांक्षा। अत उभयाकांक्षायां प्रयाजादीनां दर्शपूर्णमासांगत्वं सिद्ध्यति महाप्रकरणार्चेतरप्रकरणभेदादिदं द्विविधम् तंत्र फलभावनायाः प्रकरणं महाप्रकरणम्। तच्च प्रयाजादेर्ग्राहकं तत्पुनः प्रकृतावेव यत्र समग्रांतो पदोपदेशः सा प्रकृतिः। यथा दर्शपूर्णमासादि। तत्रैवोभयाकांक्षारूपं प्रकरणं संभवति; आकांक्षानुपरमात् विकृतौ तु न प्रकरणं यत्र समग्रांगोपदेशो नास्ति सा विकृतिः। फलभावनाया अंतराले यदयं भावनायाः प्रकरणं तदवान्तरप्रकरणम्। तच्चाभिक्रमणादीनां प्रयाजादिषु विनियोजकं उभयविधं प्रकरणं क्रियाया एव विनियोजकं न द्रव्यगुणयोरिति स्थितं देशसामान्यं स्थानं, तच्च द्विविधम्। पाठसादेश्यमनुष्ठानसादेश्यं चेति। पाठसादेश्यमपि द्विविधम्।

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

यथासंख्यपाठः सन्निधिपाठश्चेति। तत्रेन्द्राग्नमेकादशकपालं निवर्तयेद्वैश्वानरं द्वादशकपालं निवर्तयेदित्येवं क्रमेण विहितास्विष्टिषु इन्द्राग्नीरोचनादिव इत्यादिनां याज्यानुवाकमन्त्राणां यथासंख्यं प्रथमस्य प्रथमं द्वितीयस्य द्वितीयमित्येवं यो विनियोगः स यथासंख्यपाठात् प्रथमपठितस्य मंत्रस्य हि कैमर्थ्याकांक्षायां प्रथमतो विहितं कर्मैव प्रथममुपतिष्ठते समानदेशत्वात्। यानि तु-वैकृतान्यंगानि प्राकृतान्यंगानि प्राकृतांगाननुवादेन विहितानि प्राकृतांगानुवादेन विहितांगविध्योस्तादृशांग प्रधानविध्योर्वा मध्येन पठितानि तेषां विकृत्यर्थत्वं संनिधिपाठात्। पशुधर्माणामग्नीषोमीयार्थत्वमनुष्टानसादेश्यात्। औपवसथ्यैहनि अग्नीषोमीयः पशुरनुष्ठीयते तस्मिन्नेवदिने ते धर्माः पठन्ते। अतस्तेषां कैमर्थ्याकांक्षायामनुष्ठेयत्वेनोपस्थितपश्वपूर्वमवभाव्यत्वेन संबध्यते अतो युक्तमनुष्ठानसादेश्यात्तदर्थत्वं तेषामिति संक्षेपः समाख्यायौगिकः शब्दः सा द्विविधा वैदिकी लौकिकी च। तत्र होतुश्चमसभक्षणांगत्वं 'होतृचमस' इति वैदिक्या समाख्यया अध्वर्योस्तत्पदार्थत्वं लौकिक्याध्वर्यवमिति समाख्ययेति। तदेवं निरूपितानां श्रुत्यादीनामुत्तरोत्तरं प्रति पूर्वपूर्वस्य प्राबल्यम्। तदुक्तं 'श्रुतिलिंगवाक्यप्रकरणस्थानं समाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षात् समवाये समानविषयत्वेन द्वयोर्विरोधे परस्य दौर्वल्यं कुतः अर्थविप्रकर्षात् परस्य पूर्व व्यवधानेन प्रवृत्तेरित्यर्थः। अयंभावः। एकत्र विनियुक्तस्य निराकांक्षत्वात् अन्यत्र विनियोगो विरुद्ध एव। परंतु विनियोजकप्रमाणयोः समबलत्वेऽन्यतर विनियोगत्यागायोगात्। अगत्याकांक्षोत्पादनेन विनियोगः स्वीक्रियते। यथा "खादिरो पूयो भवति" "खादिरं वीर्यकामस्य पूयं कुर्यादि"ति वाक्याभ्यां क्रतौ विनियुक्तस्य खादिरत्वस्य फले विनियोगः। यत्र तु प्रमाणयोरतुल्यत्वं तत्र न स्वीक्रियते प्रबलेन दुर्बलविनियोगबाधात्। यथा कदाचतस्तणसि नेंद्र सश्चसीत्यस्या ऋचरोंङ्या गार्हपत्यमुपतिष्ठत इति तृतीयाश्रुत्या अन्यनिरपेक्षया गार्हपत्योपस्थानशेषत्वबोधिकयेंन्द्रप्रकाश सामर्थ्यरूपलिंगप्राप्तमिंद्रशेषत्वं बाध्यते। लिंगं हि न साक्षाच्छेषत्वं बोधयति किंतिं कल्प्या तया शेषत्वबोध इति श्रुतिव्यवधानेन शेषत्व बोधकं लिंगं झटिति स्वार्थबोधक श्रुत्या बाध्यं तथा लिंगेन वाक्यं बाध्यं यथास्योनंते सदनं करोमि घ्रुतस्य धारया सुशेवं कल्पयामि 'तस्मिन् सीदामृते प्रतितिष्ठ', "व्रीहीणां मेधसुमतस्यमान" इति मंत्रभागयोः प्रत्येक सदनकरणे पुरोडाशासादने च तत्प्रकाशनसामर्थ्यं लिंगेन श्रुतिद्वारा विनियोगे सति प्रतीतमेकवाक्यत्वं बाध्यते। तस्य कृत्स्नेऽपि मंत्रे सदनकरण प्रकाशनसामर्थ्यं पुरोडाशासादन प्रकाशन सामर्थ्यं च लिंगं कल्पयेत्वा श्रुतिकल्पनयोभयत्र कृत्स्न मंत्रविनियोगबोधने द्वाभ्यां लिंगश्रुतिभ्यां व्यवधानेन श्रुत्यैकव्यवहित क्लृप्तलिंगादुर्बल तथा वाक्येन प्रकरणं बाध्यं यथा सह प्रकरणाम्नातद्वादशो य सदां द्वादशाहीनस्येति वाक्येनाहीनांगत्वबोधकेन प्रकरणप्राप्तसहांगत्वबाधादुत्कर्षः प्रधानस्यांगाकांक्षा सत्यां प्रकरणान्तरस्यांगप्रधानवाक्यैकवाक्यतासामर्थ्यश्रुतिभिः कल्प्यमानाभिः

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

स्वार्थविनियोगप्रमितौ व्यवधानेनांगसामर्थ्य श्रुत्योर्द्वयोः कल्पकवाक्यादुर्बलत्वात् । तथा प्रकरणेन संनिधिर्बाध्यः । यथा राजसूयप्रकरणे तदन्तर्गताभिषेचनीयाख्यसोमयाग विशेषसंनिधिपाठप्राप्तं शुनःशेफोपाख्यानादेरभिषेचनीयशेषत्वं बाधित्वा कृत्स्नराजसूयशेषत्वमापादितं संनिधेः प्रकरणादि कल्पकत्वेन कृतप्रकरण दुर्बलत्वात् तथा संनिधिना समाख्या बाध्यते । तथा हि पौरोडाशिक समाख्यामेकां आग्नेयपुरोडाशादि कर्माणां क्रमेण मंत्रा आम्नातासू तत्र दधिपयोरूपसांनाय्य संनिधी सुंधध्यं दैव्यायकर्मण इति मंत्र आम्नातस्तत्र समाख्यावलेनास्य मंत्रस्य पुरोडाशपात्र सुंधनशेषत्वं प्राप्तं, संनिधिना बाधित्वा सांनाय पात्रद्यधनशेषत्वमापद्यते पुरोडाशसंबंधि कांडं पौरोडाशिकमिति समाख्यायाः कांडान्तर्गत मंत्रस्य पुरोडाशसंबंध सामान्यबोधकत्वे विशेषशेषिभावरूपविनियोगबोधकत्वं सांनिध्याद्यपेक्षतया दुर्बलत्वात् । एवं च विरोधे सति श्रुतिर्बाधिकैव समाख्य बाध्यैव मध्यानां तु पूर्वबाध्यत्वं परबाधकत्वं चेति श्रुतिलिंग सूत्रार्थः। तदेवं निरूपितानि विनियोग विधिसहकारीणि प्रमाणानि तद्‌बाध्यबाधकभावश्चोपपादितः।

१. अथ प्रयोगविधिसहकारीणि श्रुत्यादीनि षट् प्रमाणानि निरूप्यन्ते, तत्तद्‌बाध्यबाधकभावश्चोपपद्यते । तत्र क्रमपरं वचनं श्रुतिः । तच्च द्विविधं-केवलक्रमपरं, तद्विशिष्ट पदार्थपरं चेति । तत्र वेदं कृत्वा वेदिं करोतीति केवलक्रमपरं वेदिकरणादेर्वचनान्तरेण विहितत्वात् वषट्कर्तुः प्रथमभक्ष इति तु क्रमविशिष्टपदार्थपरम् । एकप्रसरता भंगभयेन भक्षानुवादेन क्रममात्रस्य विधातुमशक्यत्वात् सेयं श्रुतिस्थिर प्रमाणापेक्षया बलवती तेषां वचन कल्पनद्वारा क्रमप्रमाणत्वात् । अत एवाश्विनस्य पाठक्रमात्तु तृतीयस्थाने ग्रहणप्रसक्तौ 'अश्विनो दशमे गृह्यते' इति वचनात् दशमस्थाने ग्रहणमित्युक्तम् । यत्र प्रयोजनवशेन निर्णयः स आर्थक्रमः । यथा अग्निहोत्रहोम यवागूपाकयोः । अत्र हि यवाग्वा होमार्थत्वात्तत्पाकः प्रयोजनवशात् पूर्वमनुष्ठीयते । स चायं पाठक्रमाद् बलवान् यथापाठे ह्यनुष्ठाने क्लृप्त प्रयोजनबाधः, अदृष्टार्थत्वं च स्यात् । न हि होमानंतरं क्रियमाणस्य किंचिद्दृष्टं प्रयोजनमस्ति।

२. पदार्थबोधकवाक्यानां यः क्रमः स पाठक्रमः । ततः पदार्थानां क्रम आश्रीयते स च पाठो द्विविधः । मंत्रपाठो ब्राह्मणपाठश्च । तत्राऽग्नेयाग्नीषोमीययागयो तत्तद्याज्यानुवाक्या क्रमाद्यः क्रम आश्रीयते स मंत्रपाठात् । सोऽयं ब्राह्मण पाठाद् बलवान् । अनुष्ठाने ब्राह्मणवाक्यापेक्षया मंत्रवाक्यस्यांतरंगत्वात् ब्राह्मणवाक्यं प्रयोगाद्‌बहिरेवेदमेवं कर्तव्यमित्येवमेव बोध्य कृतार्थमिति । न पुनः प्रयोगकाले व्याप्रियते मंत्राः पुनरन्यप्रयोजनाप्रयोगसमवेतार्थस्मारकाः।

३. प्रकृतौ नानादेशानां पदार्थानां विकृतौ वचनादेकस्मिन् देशे अनुष्ठाने

CC-0 Agamnigam Digital Preservation Foundation Chandigarh Funding by IKS-MoE-2025-Grant

कर्तव्येऽपदेशेऽनुष्ठीयते तस्य प्रागनुष्ठानमितरयोस्तु पश्चादिति क्रमः स्थानक्रमः । [illegible]

Gandhi Memorial College Of Education Bantalab Jammu

नामोपस्थितिः। यस्य हि देशेऽनुष्ठीयंते तत्पूर्वतने पदार्थे कृते स एव प्रागुपस्थितो भवतीति युक्तम्। तस्य प्रागनुष्ठानं प्रधानक्रमेण अंगक्रमः ये तत् क्रमेण प्रधानानि क्रियंते तेनैव चेत्क्रमेण तेषामंगान्यनुष्ठीयन्ते तदा सर्वेषामंगानां स्वैः स्वप्रधानैस्तुल्यं व्यवधानं भवति। व्युत्क्रमेण त्वनुष्ठाने केषांचिदंगानां प्रधानैरत्यंतमव्यवधानम्, अन्येषामत्यन्तं व्यवधानं च स्यात्। तच्चायुक्त प्रयोगविध्यवगत साहित्यबाधापतेः। अतः प्रधानक्रमोऽप्यंगक्रमे हेतुः। स चायं मुख्यक्रमः पाठक्रमाद्दुर्बलः। मुख्यक्रमो हि प्रमाणांतरसापेक्षप्रधनतया विलंबितप्रतिपत्तिः, पाठक्रमस्तु निरपेक्षस्वाध्यायपाठक्रममात्रसापेक्षतया न तथेति बलवान्। प्रवृत्तिक्रमात्तु बलवानयं, प्रवृत्तिक्रमे ह्याश्रीयमाणे बहूनामंगानां प्रधानविप्रकर्षो भवति। मुख्यक्रमे तु आश्रीयमाणे सन्निकर्षः।

५. सहप्रयुज्यमानेषु प्रधानेषु सन्निपातिनामंगानामावृत्त्यानुष्ठाने कर्तव्ये द्वितीयादि पदार्थानां प्रथमानुष्ठित पदार्थक्रमाद्यः क्रमः स प्रवृत्तिक्रमः।

६. तदेवमेतेषु बाध्यबाधकभावस्य संप्रतिपादनात् मात्स्यान्यायोदाहरणत्वसामंजस्यं यथा तिमिंगिलगिलोप्यस्ति तर्हि लोप्यस्ति राघव इत्युक्तेस्तिमिंगिल बाधकस्य राधवस्य सुतरां तद्बाध्य तिमिंगलादि बाधकत्वं तथा लिंगादि बाधकस्य श्रुत्यादेः सुतरां तद्बाध्यवाक्यादि बाधकत्वमिति सर्वमनवद्यम्।

ननु श्रुत्यादिभिर्नहि बाध्यमित्येव लिंगादि बाध्यते किंतु सति विरोधे मत्स्यैस्तु दुर्बलमात्रं बाध्यते। तथा च कथमुदाहरणसंगतिरिति चेन्न। तद्बाध्यबाधकभावस्यापि विरोधपुरःसरत्वात् नाहितैः पुत्रपौत्रादयोपि बाध्यंते किन्तु प्रत्युत लाल्यंत इति वैस्यवेसौभरेराल्पाने प्रसिद्धमिति सर्वं सुस्थमिति मात्स्यन्यायः। १९।५४। आख्यातानामर्थं ब्रुवतां शक्तिः सहकारिणीति न्यायोत्र प्रासंगिकः। शक्तिः पुरुषसामर्थ्यं स्पष्टमन्यत्तत्रैव। १।५५। यत्र निर्बलेनापि प्रबलसहायेन प्रवलो बाध्यते तत्रांत्यंत बलवन्तोऽपि यैरजातयदा जनाः दुर्बलैरपि बाध्यंते पुरुषैः पार्थिवाश्रितैरिति न्यायोऽवतरति, स्पष्टार्थोऽयं उदाहरणं तु श्रुत्यपेक्षया दुर्बलाया अपि स्मृतेराचमनरूपप्रबलपदार्थाश्रितत्वेन प्राबल्यम्। अतः श्रौतक्रमत्यागेन वेदकरणानंतरं क्षुते आचमनमेव कार्यमिति दिक्। ४।५६। यत्रान्यत्रातिप्रसक्तदवयवार्थालोचन सव्यपेक्षाच्च योगात् समुदायशक्तिः प्राबल्यं विवक्ष्यते तत्र रूढिर्योगमपहरति इति न्यायः। यथा गौरित्यादावन्यत्रातिप्रसक्तप्रकृतिप्रत्ययार्थालोचन सव्यपेक्षगमनकर्तृत्वादिरूप योगार्थत्यागेन रूढ्या सास्नादिमती व्यक्तिर्गृह्यते तथानर्षासुरव्यक्तारोऽग्नीनादधीतेस्पत्ररथकार शब्देन [illegible]

CC-0 Agamnigam Digital Preservation Foundation, Chandigarh. Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

४१ ।५७। श्रुतयौगिकार्थलाभे सत्यनन्वितरूढ्यर्थस्त्याज्य इति न्यायो विशेषविषयतया अस्य बाधकः, दृश्यते हि मंडपं भोजयेत्यत्र मंडपिवतीति यौगिकार्थ लाभेनान्वितग्रह रूपस्य रूढार्थस्य त्यागः। ४२ ।५८। एव प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थस्य प्राधान्यमिति न्यायः। सामान्यविषयः औपगवो वापक इत्यादौ हि प्रत्ययार्थस्यापत्यकर्त्रादि रूपस्य प्राधान्यं यातीत्यादि क्रियान्वयात्। एवमन्यत्रापि बोध्यम्। ४३ ।५९। भावप्रधानमाख्यातमिति न्यायः। ४४ ।६०। सच्छेष्यमाणसमभिव्यावहार दृश्यमाणस्यैव प्राधान्यं नत्विचर्छ्यादति न्यायश्च तद्बाधकः। अश्वेन जिगमिषति असिना जिघांसतीत्यादौ यच्छेष्यमाणस्य गमनहननादेः प्राधान्यात्तत्रैवाश्वास्यादेः करणत्वेनान्वयस्तथा तमेतं वेदानुवचनेन "ब्राह्मणा विविदिषंति यज्ञेन दानेन तपसानाशकेन" इत्यत्रेष्यमाणस्य वेदनस्य प्राधान्यात् तत्रैव वेदानुवचनादेर्विनियोगादिति दिक् ।४५ ।६१। एतेन कामनगोचरत्वेन शब्दबोध्य एव शाब्दसाधनतान्वय इति न्यायोऽपि व्याख्यातः ।४६ ।६२। नन्विच्छागोचरत्वस्य मोक्षसाधारणत्वात् तत्रैव यज्ञादिविनियोगः कुतो न स्यादिति शंकानिरासाय शाब्दीत्याकांक्षाशकेनैव पूर्यत इति न्यायः ।४७ ।६३। नहि शाब्दमशाब्देनान्वेति इति न्यायश्च प्रवर्तते स्पष्टावुभौ ।४८ ।६४। यत्रैकपदशक्यार्थस्य सारासारभूतमंशद्वयमस्ति त्याज्यासाराविनाभूताभीष्टसारजिघृक्षया च तदविनाभूतमसारमप्यादौ गृह्यते त्यज्यते च गृहीते सारे तत्र मत्स्यकंटक न्यायः। यथा मत्स्यमांसार्था तत्संबन्धान् कंटकादीनपि तावत् गृह्णाति त्यजति च तस्मिनाहीते तथा तत्त्वं पदलक्ष्यार्थ जिघृक्षया तदुपाधी अपि गृह्येते त्यज्यते च भागत्याग लक्षणया सति लक्ष्यार्थग्रहे उपपादितोऽयमर्थः प्राक् ।४९ ।६५। धान्यपलालन्यायोऽपीदृशः। ५० ।६६। अर्थं त्यजति पंडितमतिन्यायोऽपि भागत्यागलक्षणास्थलेव प्रसरति ।५१ ।६७। तत्त्वंपदलक्ष्यार्थाभेदेऽन्यतरपदवैयर्थ्यमिति शंकोच्छेदाय पदमव्यधिकाभावात्स्मारकान्न विशिष्यते इति न्यायोऽवतरति। तथा च लक्ष्यार्थ बोधे प्रमात्व संपादकतया पदांतर साफल्यमिति बोध्यम् ।५२ ।६८। कुत उपाधेरेव त्यागनियमः नेति नेतीयादि निषेधान्यथानुपपत्या सर्वतो बलवती ह्यन्यथानुपपत्तिरिति न्यायेन तन्मिथ्यात्वावधारणात् सर्वं ज्ञानं धर्मिण्यभ्रांतं प्रकारे तु विपर्यय इति न्यायाच्च ।५३ ।६९। सर्वत इति प्रासंगिकः ।५४ ।७०। प्रमा तादात्म्या यत्र स्यानात्मनो नेतिनेतीनेतित्यादि निषेधवाक्यैर्बाधे कथं तत्तादात्म्यापन्नस्यात्मनोनबाधः स्यादिति शंकाया करणायनंगोष्ठन्यायावतारः। यथा कश्चिदुष्ट्रपतिरजगरेण वेधितमुष्ट्रं रक्षन्वार्णैरजगरं जघानेति लौकिकी गथा तथा निषेधवाक्यानि बाधाबाधित्वेनात्मानं रक्षन्त्यनात्मानं बाध्यन्ते इति ।५४ ।७१। स्वमते परेणोद्भाव्यमानानां दूषणानां तन्मते पातने उष्ट्रेलगुडन्यायावतारः। यथा उष्ट्रणेह्यमानेनैव लगुडेन तत्प्रहारः क्रियते तथा तार्किकोत्थापितदूषणैस्तन्मतमेव वेदान्तिभिर्निराक्रियते।

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

तथा हि अद्वैतवादे यद्भोगसांकर्यादिरूपं दूषणं तैरुच्यते तदौपनिषदैर्विचनेकात्मवादिनां तेषामेव मते यात्यंते इति संक्षेपः।

५५ ।७२। एकतांत्रिकमतनिरासाय प्रयुक्तया युक्त्या तत्सदृशमतांतरनिराकरणं यदा विवक्ष्यते तदा पुष्टलगुड न्यायप्रवृत्तिः यथावद्वानांशुनां मध्ये एकस्य शुनः प्रहारार्थं प्रक्षिप्तः पुष्टलगुडस्तं प्ररुत्यान्यानपि प्रहरति तथा (थ्य) ब्रह्मकारणवादिभिः सांख्याभिमतप्रधानकारणवादनिरासाय प्रयुक्ता 'ईक्षतेर्नाशब्दं रचनानुपपत्तेश्च नानुमानमित्यादि समन्वयाविरोधाध्यायगतसूत्रस्थायुक्तयस्तं निरस्य योगाभिमतप्रधानकारणतावादमपि साम्यान्निराकुर्वन्तीति दिक् ।५६ ।७३। जामात्रर्थं श्रप्तस्य सूयादेरतिथ्युपकारकत्वमिति न्यायः ।५७ ।७४। ग्रहार्थमारोपितस्य दीपस्य रथ्योपकारकत्वमिति न्यायश्चेह प्रवर्तते ।५८ ।७५। एवं तुलोन्नयनन्यायोऽपि बोध्यः। यथा हि तुलायः पश्चिमभागस्याधस्तात्कनिष्ठिकाद्याघातेनोन्नमने कृते सति पूर्व भागस्य नमनं पलांतरमंतरेणैव भवति तथा एकस्मिन् ....
जिता भवंतीति ।।५९ ।७६। एकस्मिन् प्रधाने प्रतिवादिनिर्जिते अन्ये सुखेन जेतुं शक्यन्त इतीह विषये प्रधानमल्लनिवर्हणन्यायोऽस्ति मल्ला बाहुयुद्धविशारदास्तेषु प्रधानस्य निवर्हणं भूमौ प्रतिष्ठापन" तत्पृष्ठभागस्य तया भूम्यां संयोजनमिति यावत् जयकामेन प्रथमं क्रियते तस्मिन्निगृहीतेतरापेक्षया दुर्बलानामन्येषां जयो वै सुकर इति न्यायार्थः।६० ।७७। याभिर्युक्तिभिरतिप्रबलशुष्कतर्ककर्कशत्वेन प्रसिद्धोऽपि द्वैतसत्यत्ववादी वैशेषिकादिर्जप्यस्ताभिरितरे क्षुद्राश्चार्वाकादयस्तु दूरतो निरस्ता भवंतीति विवक्षायामाषाढवाते चलति द्विपेंद्रे चक्रीवतो वारिधिरेव काष्ठेति न्याय प्रवृत्तिः। चलतीति सप्तम्यंतं देहलीदीपन्यायेनोभयत्र संबध्यते चक्रीवान् गर्दभः चक्रीवंतस्तु वालेया रासभा गर्दभाखराः इत्यभिधानात् स्पष्टमन्यत् ।६१ ।८०। यथा हेहल्यां धृतो दीपो बाह्यमाभ्यन्तरं च देशं प्रकाशयति तथा मध्ये निक्षिप्तं पदमुभाभ्यां साकांक्षपदाभ्यां संबध्यत इत्यर्थः ।९९। काकाक्षन्यायोऽपीह बोध्यः। काकस्यैकमेव चक्षुरिंद्रियं गोलकद्वयेपि क्रमेण यथा संबध्यते तथा प्रकृतेऽपीत्यर्थः। ६२ ।८०। आषाढवातन्यायः विषये कैमुतिकन्यायोऽपि प्रवर्तते। इयांस्तु विशेषो यत्पूर्वो दृष्टांतदार्ष्टान्तिकयोर्निन्दायां पर्यवस्यति अयं तु स्तुतिनिंदोभय साधारणः। तत्र निन्दायां पूर्वमेवोदाहरणं बोध्यम्। स्तुतौ तु मां हि पार्थेत्यादि भगवद्गीतायाः सार्धश्लोक उदाहरण अपि चेत्सुदुराचार इत्यादावपि शब्देन द्योतितोऽयं न्यायः सर्वैर्ग्रहैर्गृहीतान्वै सर्वपापसमन्वितान् स मोचयति सुप्रीतिः शरण्यः शरणागता नित्यादावर्थलभ्यः। यदि सदाशिवः सर्व पापयुतानपि शरणागतान्मोचयति तदाल्पपापान्वितान् साधून्वा शरणागतान् मोचयतीति किमु वक्तव्यमिति ।६२ ।८१। 'मांहि

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

पार्थ' इत्यादि कैमुतिकन्यायोदाहरणेषु पुण्योनयो ब्राह्मणा क्षत्रियाश्च ईशव्यापाश्रयाः संतः सुतरां मोक्षं पांतीत्याद्यर्थ सिद्धिर्दंडो यूपिकन्यायेन दंडाकर्षणेन तदवलंबिनामयूपानामाकर्षणं यथार्थसिद्धं तद्वदित्यर्थः ।६३ ।८२ । पुष्टलगुडन्यायादेरभ्येतत्पर्यन्तानां न्यायानां साम्येषित्किंचिद्विशेषमादायाणुरपि विशेषो वोऽध्यवसायकर इति न्यायेन भेदसिद्धिर्भिन्नोदाहरणत्वसिद्धिश्च केषांचिदिति वोध्यम् ।६४ ।८३ । यत्रायासं विना साक्षात्सिद्ध्यंतमर्थमुपेक्ष्यायासेन परंपरया स एवार्थः साध्यते तत्र दंड सर्परणन्यायावतरणं, कश्चित्सर्पं दृष्ट्वा तन्मारणाय दंडमिच्छंस्तमलभमानश्च कुठारं गृहीत्वा तच्छेदाय प्रवर्तते तस्य यथायासो वृथा कुठारेणैव सर्पस्य शक्यवधत्वात् । तथा यया युक्त्या या रज्जुसर्पादि संसर्गस्यानिर्वचनीयत्वं प्रसाध्य तद् दृष्टान्तेन सर्पाद्यनिर्वचनीयत्वं साध्यते तयैव सर्पाद्यनिर्वचनीयत्वस्य सुसाध्यत्वात् संसर्गानिर्वचनीयत्वसाधनायासो वृथेत्यादि ।।६५ ।८४ ।-बकबंधनन्यायोपीह प्रवर्तते । बकं जिघृक्षुः कश्चित्सूर्यरशिम संतप्ते तच्छिरसि नवनीतं निधाय विलीनेन तन्नेत्रयोः पूर्णयोरन्धीभूतं गृह्णाति तस्य यथा नवनीतप्रक्षेपायासो वृथातं विनापि तदैव गृहीतुं शक्यत्वात् तथा प्रकृतेऽपीत्यर्थः ।६६ ।८५ । अन्येरंडा विवाहश्चेदादावेव कुतो न स इति न्यायः ।६७ ।८६ ।-ऋजुमार्गणसिध्यतोर्थस्य चक्रेण साधनायोग इति न्यायः । शिरो वेष्टनेन नासिकास्पर्श न्यायश्चापीदृशः । अत्र भुंजयेत्यादिः स्पष्टमन्यत् । अयमेव कैश्चिदद्रविडप्राणायामन्यायोभिधायते ।६९ ।८८ । यत्र न्यायात् सर्वस्य त्यागे ग्रहणे वा प्रसक्ते निर्युक्तिकमेकांशोपादानमंशान्तरत्यागश्च क्रियते तत्रार्धजरतीय न्यायप्रयोगः । जरत्या वृद्धायाः स्त्रियाः पतिस्तदर्धमुखमात्रं गृह्णाति अवयवान्तरं त्यजतीति यथा युक्तिशून्यं तथा य ईश वचनत्वेनागम प्रामाण्यमुपगच्छन्ति, तेषां बुद्धवचसामपि प्रामाण्यप्रसंगो वेदस्यापि वाऽप्रामाण्यापत्तिः । यदि चेशवचनसाम्येऽपि वेदस्य प्रामाण्यमप्रामाण्यं च बुद्धवचनस्यांगीक्रियते तदेदमपि युक्तिशून्यम् ।७० ।८९ । तदसंभवविवक्षायामर्धवैशसन्यायः । यथा (म) संभोजनकामस्तत्संततिकामश्च कश्चिद्यवनस्तद्ग्रीवादिकं छित्वा भुंक्ते उदरं च तत्संतानार्थं स्थापयतीति यथा न संभवति तथा प्रकृतेऽपीत्यर्थः ।७१ ।९० । एकत्र विरुद्धानेक धर्मसमावेशासंभवविवक्षायां सुभगाभिक्षुकन्यायः । यथा सुभगत्वं भिक्षुकत्वं स्त्रीत्वं पुंस्त्वं च तथाविधपदद्वयसामानाधिकरण्यात्प्रतीयमानमपि विरुद्धत्वादेकस्मिन् युगपन्न संभवति तथैकस्मिन्नीशरूपाप्रवचने प्रामाण्याप्रामाण्यलक्षणं विरुद्धं धर्मद्वयं संभवति इति केचित् । अन्ये तु यथा सुभगाभिक्षुकौ प्रवलघातकभयात् कंचिच्छरणं प्रपन्नो स च शरणागतत्यागदोषश्रवणात् सर्वप्रपन्नेन उभयो रक्षणे प्रबलारिकृतस्वद्यातभयतत्त्यागे वा प्राप्तेपि सुभगां रक्षति भिक्षुकं त्यजतीति [illegible]

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh. Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

प्रामाण्ये पौरुषेयत्वान्मूलप्रमाणसापेक्षतया धर्मादौ तदभावादप्रामाण्ये वा प्राप्तेप्युक्तविभागे तार्किकेच्छैव नियामकेत्यर्थमाहुः ।।७२ ।९१ । एवं स्मृत्यादिषु आगममूलकतया प्रामाण्यं न तु ऋषिवचनत्वादिना बृहस्पतिप्रणीत नास्तिकशास्त्राणामपि प्रामाण्यापत्तेरित्यादि स्वयमूह्यम् । एकत्र निर्णीतः शास्त्रार्थोऽन्यत्रापि तथेति न्यायात् ।७३ ।९२ । यत्र स्वमतविरुद्धेषु बहुषु मतेष्वेकेन प्रबलादिमतेन मतान्तरं निरस्य तत्स्वयं निरस्यते तैर्द्धषितं च स्वमतं सद्युक्तिभिः सम्यक् स्थाप्यते तत्र कंटकन्यायप्रवृत्तिः । कंटकाः प्रसिद्धाः शत्रवश्च । तत्र प्रथमपक्षे पादप्रविष्टं कंटकं यथा दृढेन कंटकान्तरेण निष्कास्यते नापि कालांतरे पीडामाभवत्विति तमप्यग्न्यादौ प्रक्षिपन्ति, प्रथमं पादलनिनतदुद्वारायानुप्रविष्टेन च कृतं व्रणादिकं यथायोग्योपायैरुपशमं नयन्ति । द्वितीयकल्पे यथा ये शत्रवः स्वदेशोपद्रवं कृतवंतस्तदपेक्षया प्रवलमित्रांतरं सामदानरूपोपायेन वशीकृत्य तत् द्वारा तान्पराजित्य भेददण्डरूपोपायेन तमपि परराज्यं ते तैः कृतं स्वस्रजोत्सादनाद्युपद्रवं च स्वस्वस्थाने स्थापनादिना दूरीकुर्वन्ति नीतिनिपुणा नृपाः तथौपनिषदा अप्याख्यात्यात्मख्यात्यसत्ख्यातिवादानन्यथाख्यातिवादेन निरस्य तमपि निरस्यन्ति । अनिर्वचनीयख्यातौ तैस्तर्कितं च दूषणगणमुद्धारंतीति न्यायोदाहरणं संगतिः । तत्प्रकारस्तु ग्रन्थविस्तरभयान्नेह तन्यते ।७४ ।९३ । बाध्यं प्रबाध्य स्वयमेव बाधकनिवृत्तौ विवक्षितायां तु जलकतकरेणु न्यायः । यथा हि सपंकमलेनेक्षिप्ताः कतकस्यौषधि विशेषस्य रेणवो रजांसि तस्माज्जलात्पंकं विलाप्य स्वयमेव विलीयन्ते तथा तत्त्वज्ञानं सविलासाज्ञानं निवर्त्य स्वयमेव निवर्त्तते ।७५ ।९४ । दग्धेंधनवह्निन्यायोपीह बोध्यः । दग्धानीन्धनानि येन सोऽग्निर्यथा स्वयं शाम्यति तथेति पूर्ववत् ।७६ ।९५ । नन्वज्ञानबाधके ज्ञाने विनष्टे पुनरज्ञानोदयेन बन्ध प्रसंग इति शंकायां देवदत्तहन्तृहन्तन्यायावतारः । यथा देवदत्तहन्तरि हतेऽपि न देवदत्तस्य जीवनं तथा प्रकृतेऽपि ।७७ ।९६ । इदं तु तुष्यतु दुर्जन इति न्यायेनोपगम्योक्तं वस्तुतत्त्वज्ञानस्यानादित्वात्तदुदयशंकैव नोचिता ।७८ ।९७ । ननु यन्निवृत्तिमद्वस्तु तदुत्पत्तिमदपीति न्यायाद्विनाशिनोऽज्ञानस्योत्पत्तिरपि संभाव्यते इति चेत्तर्हि सर्वं कार्यं सकारणकमिति न्यायात् भावकार्यस्य तत्पूर्वकत्व नियमातस्य किंचित्कारणं वाच्यम् । तच्च किमज्ञानं ब्रह्म वा । आद्ये किमिदमेवाज्ञानमन्यद्वा । आद्ये आत्माश्रयः द्वितीयेऽनवस्थादीत्युभयतः पाशारज्जुरिति न्यायापातः । आद्य द्वितीये शुद्धं ब्रह्म तत्कारणं विशिष्टं वा । नाद्यः मुक्तस्यापि पुनर्बंधापत्तेः । द्वितीयेऽप्यज्ञानं विशेषणमन्यद्वा । आद्ये अज्ञानेऽप्यज्ञानकारणत्वापत्तिः । विशिष्टवृत्ते धर्मस्य विशेषणवृत्तित्व नियम इति न्यायात् । अन्यथा व्यापकव्यावृत्त्या व्याप्यव्यावृत्तिरिति न्यायेन कारणत्वधर्मस्याज्ञानकार्यत्वेन ततः प्रागसत्त्वात् व्यभिचारी चायं यन्निवृत्तिमदिति न्यायः ।१ ।९९ । उभयतः पाशा रज्जुरिति न्यायः यथा मृगादि [illegible] रज्जौ प्रविष्ट

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

मृगादि कुतश्चिदपि माध गन्तुं न शक्नोति तथा प्रकृतेऽपि ।२ ।१०० । विशिष्ट वृत्तेरिति न्यायः दृश्यते हि कुंडली यातीत्यादौ विशिष्टवृत्तेर्धर्मस्य गत्यादेः कुंडलादिरूपविशेषण वृत्तित्वं, कुंडलि भुङ्क्ते इत्यादौ तु कुंडलादेरुपलक्षणत्वाद्विशेषस्यैव भोजनान्वयः नन्वपदार्थः पदार्थेनान्वेति न पदार्थैकदेशेनेति न्यायात्तदनुपपत्तिः । तदपवादभूतेन व्यक्तिन्यायेन तदुपपत्तेः । स्वीक्रियते हि जातिविशिष्टव्यक्तौ शब्दशक्तिमुपगच्छद्भिरपि तार्किकैर्गौरनित्येत्यादौ पदार्थैकदेशस्यापि व्याक्तेरनित्यत्वाद्यन्वयः । पुरोडाशकपालेनेत्यादौ मीमांसकैरपि । तथा च परोपगतं पदार्थैकदेशान्वयं निराकृत्य स्वयं तदुपगच्छन्तः, श्वस्तुनिर्गच्छोक्तिन्यायविषयतां नातिवर्तन्ते यथा भिक्षामटते भिक्षां प्रत्याचक्षाणां स्वस्नुषां भर्त्सयित्वा श्वस्नूः पुनस्तमाहूय समागते तस्मि"न्नास्ति भिक्षा निर्गच्छेति"। तथैव प्रत्याचष्टे तथैवतेऽपीत्यर्थः ।३ ।१०२ । अत्राप्यनुप्रसक्तुं न्यायत्रयं व्याख्यातम् ।४ ।१०२ ।,५ ।१०३ ।,६ ।१०४ । व्यापकेति स्पष्टः ।७ ।१०५ । प्रकृतमनुसरामः । इदं सविलासाज्ञानं नानेन वाधितं सद्गजभुक्तकपित्थन्यायेन न ज्ञायते कुत्र गतमिति गजभुक्तं हि कपित्थफलं तदुदरादातमेव निःसरति । तच्च भग्नसन्मज्ज्यादि शून्यं प्रक्षालितमिवाभातीति प्रसिद्धम् । तथा च यथा निशि छिद्रादतिकठिना तस्मादतिसांद्रं तन्मजादि कथं निसृतमिति न तर्कगोचरतामेति तथा तत्त्वबोधबाधितं तत्कुत्र गतमिति न तर्कितुं शक्यमित्यर्थः ।७९ ।१६ । सति तत्त्वज्ञाने सविलासाज्ञानं बाध्यमिति किं वाच्यं तत्त्वज्ञानात् प्रागप्यवाङ्मनसगम्ये निर्विकल्पे शुद्धाद्वितीये सच्चिदानंदघने परे ब्रह्मणीदं दृश्यं सावयवमशुद्धमसज्जददुःखात्मकं कथमासीदित्यपि नारिकेलफलांबुन्यायेन न तर्कगोचरत्वं याति यथातिदृढावयवसंयोगवति नारिकेलफले जलं कथमागतमिति न तर्कगोचरतामेति । तथा पूर्वोक्ते ब्रह्मणि तद्विपरीतं द्वैतं कथमासीदित्यपि न तर्कितुं पार्यत इति न्यायसङ्गतिः ।६० ।१७ । किं चेदमप्यन्यत्रमुक्तमन्यद्बद्धमिति न्यायान्मुमुक्षूत्साह वर्धनार्थमेव किंचिदुच्यते तैर्वस्तुतस्तु तदनुभूतं वस्तुन शब्दशक्यं कथं तर्हि तद्बोधः लक्षणयेत्यवेहि उपपादितमिदं प्राक् न्यायस्तु निगदव्याख्यातम् ।७० ।१०८ । द्वैतबाधक बोधस्यापि बाधो निरूपितेति न तेनापि द्वैतशंका ये त्वाचार्या बाधज्ञानस्य बाध्यबाधकभेदेन द्वे रूपे तत्र बाध्यरूपेणाज्ञानादिवत्तदपि बाध्यम् रूपान्तरेण च बाधकम् । तथा च न कर्मकर्तृभाव विशेष्येऽपि न चावशिष्टेन बाधकरूपेण द्वैतापत्तिः बाध्यरूपाद्भेदाभावेनास्य तद्बाधेऽवस्थानायोगादिति मन्यन्ते । तेषां स्वप्नव्याघ्रन्यायोऽवतरति । स्वप्ने दृष्टे व्याघ्रो हि स्वप्नं विलाप्य तत्र वर्तमानेन बाध्यरूपेण स्वयमपि विलीयते बाधरूपस्यापि च बाध्यरूपाद्भेदाभावोनानवशेषः ।७९ ।१०९ । ननु सविलासाज्ञानबाधक स्वभावत्व चेद्बोधस्य तदा स्वभावो दुरतिक्रम इति प्रसिद्धम् ।८३ ।११० । अत्र स्वभाव इति प्रासंगिकः ।१११ । चक्रभ्रमणन्यायोपीह बोध्यः । चक्रभ्रांतिहेतौ कुलालव्यापारे

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

निवृत्तेऽपि हि भ्रांतिक्षयो वेगक्षयादेव भवति ।८४ ।११२ । ननु कर्मोपादानकारणयोरिपु चक्रयोर्नाशाभावाद्युक्तं तस्य वेगक्षयपर्यन्तमवस्थानंधतुः कुलालव्यावृत्त्योन्निमित्तापाये कार्यापायदर्शनादज्ञानस्य च देहाद्युपादानत्वात्तदपाये कारणनाशे कार्यनाश इति न्यायेन देहाद्यवस्थानायोगादिति शंकानिरासायोपादाननाशेप्युपादेयं क्षणं तिष्ठतीति समाधानविवक्षायां तन्तुपटन्यायावतारः स्वीक्रियते तार्किकैरपि समवायिकारणतन्त्वादि नाशेऽपि पटादि क्षणं तिष्ठन्तीति ।८५ ।११३ । अत्र प्रासंगिकः कारणनाशे कार्यनाश इति न्यायः ।८६ ।११४ । तन्तुनाशे पटस्य क्षणमात्रवस्था भवति तत्त्वविदां लोमश मार्कडेयादीनां बहुकल्पपर्यन्तमवस्थानं स्मर्यते तथा च कथमेतत्तन्तूपसंगतिरिति शंकानिरासायाद्य तस्य कतिपयदिवसैरुत्पद्य विनष्टानां तन्तूनां यादृशः क्षणस्तद्योग्यः स्वीकृतस्तार्किकैरस्माभिरप्यनादेरसंख्यमहाकल्पावस्थितेरज्ञानस्य योग्यस्तादृश एव क्षणादुचित उपेतुमिति समाधानराजस्य योग्यो योग्येन संवध्यते इति न्यायः सचिवतामेति । दृश्यते हि लोकेऽन्योन्ययोग्यानामेव नृपशुपक्ष्यादीनां मिथुनत्वादि संबन्धः सांप्रदायिकैश्चोक्तं तन्तूनां दिनसंख्यानां तैस्तादृक्क्षण ईरितः । भ्रमस्यासंख्य कल्पस्य योग्यः क्षण इहेष्यतामिति ।८७ ।११५ । यावच्छिरस्तावती शिरोव्यथेति न्यायोपीह बोध्यः । सांप्रदायिक श्लोके भ्रमस्यासंख्य कल्पत्वोक्तिः पूर्वोक्तबीजांकुर प्रवाहन्यायेन ।८८ ।११६ । जीवन्मुक्तिदशायां च विद्वान् ब्रह्मात्मानं हस्तामलक न्यायेनासंदिग्धाविपर्यस्तं साक्षात्पश्यति, करे स्थितमामलकीफलं निर्मलं जलं वा यथा दृश्यते तथेत्यर्थः ।८९ ।११७। एतेन करस्थविल्वन्यायोऽपि व्याख्यातः ।९० ।११८ । देहं च बोधात्प्रागात्मत्वेनाभिमतमपि सति बोधेऽहि निर्ल्वपनी न्यायान्न कदाप्यात्मतया पश्यति यथा सर्पः स्वत्वचं पुरात्मयोपमत्तामपि त्यागानन्तरं स्वसमीपे वर्तमानमपि न कदाचिदात्मत्वेन जानाति तथेत्यर्थः ।९१ ।११९ । प्रपञ्चं दग्धरशनान्यायेन निःसारतया वेति यथा दग्धा रज्जुः पूर्वं त्रिगुणत्वादिरूपेण प्रतीयमानापि निस्सारा बुध्यते बुधैस्तथेत्यर्थः ।९२ ।१२० । दग्धपटन्यायोऽप्येतादृशः ।९३ ।१२१ । कथञ्चिदपि नानात्वानुभवे कथमद्वैतबोध इत्याकांक्षायां चित्रपटन्यायावतारः । यथा पटे स्थितानां चित्राणां पटातिरेकेण सत्तास्ते तथा न ब्रह्मातिरेकेण द्वैतसत्तास्ति तया च चित्रनानात्व ज्ञानेन पटैकत्वानुभवाप्रतिबन्धवत्तत्त्वविदो न प्रपञ्चनानात्व धिया ब्रह्माद्वैतधीप्रतिबन्धः ।९४ ।१२२ । यत्कारणं विना कार्यावस्थानासंभवं मन्यमाना चंपकपटवासन्यायेन संस्काराख्याज्ञानलेशावशेषं विक्षेपाख्य शक्त्यवशेषं वोपगच्छन्ति तेषां मते तेन पुनः संसृत्याशंकोत्वातदंष्ट्रोरगन्यायेन वारणीया यथेत्यादि तंदतपंक्तिर्नागो नायकारक्षमस्तथात्रापि ज्ञेयम् ।९५ ।१२३ । चंपकेति प्रासंगिकः । यथा दूरीकृतेष्वपि पटनिष्टचंपकपुष्पेषु पट उपलभ्यमानो गंधो निराश्रय[illegible] स्वाश्रयं द्रव्यं कल्पयति तथात्रापीत्यर्थः ।९६ ।१२४ ।

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

अपसारिताग्निभूतलन्यायोपीदृशः ।२ ।१२५ । ननु विहितनिषिद्धादि कर्म कुर्वंस्तत्त्वविकर्थन तत्फलेन युज्येतेति चेन्न । यतो निरहंकारतया कृतत्वात् तत्कर्माणि चित्रांगनान्यायेनाकर्माण्येव न देहान्तरमारब्धुं क्षमन्ते, यथा चित्रांगना स्त्रीवद्दृश्यमानापि न चुंबनालिंगनादि फलं जनयितुं शक्नोति तथा प्रकृतेऽपीत्यर्थः ।९६ ।१२६ । अत्र चित्रामृतन्यायः ।९७ ।१२७ । चित्रानलन्यायश्च बोध्यः ।९८ ।१२८ । नन्वादावन्ते च यन्नास्ति वर्तमानेपि तत्तथेति न्यायाद्ये तुच्छमेव द्वैतं मन्यन्ते तेषां ब्रह्मबोधे न सविकृत्यविद्याबाध्यो न स्यात् तस्य ब्रह्मस्वरूपनित्यबोधमहिम्नासदैव बाधितत्वात् अदग्धदहनन्यायेनाबाधितस्यैव बाध्यसंभवात् । न हि वह्निर्दग्धं दहति किं त्वदग्धं तथात्मनः स्वतः सिद्धे द्वैतादर्शने नित्यमुक्तस्यासंसारिणः शास्त्रसाध्यप्रयोजन शून्यतया शास्त्रस्योषरवृष्टिन्याये नानर्थक्यप्रसङ्ग इति चेन्न । नित्यमुक्तस्यैवासंसारिणो अत्यंतासत्संसारनिवर्तकतया शास्त्रप्रामाण्योपपत्तेः नित्यबोधमहिम्ना बाधितेऽपि द्वैते वाक्यजबोधस्य धनञ्जयन्यायेन बाधकत्वोपपत्तेः । यथाहुः नित्यबोधपरिपीडितं जगद्विभ्रमं तुदति वाक्यजामतिः वासुदेव निहतं धनञ्जयो हंति कौरवकुलं यथा पुनरिति ।।९९ ।१२९ । अथाप्रासंगिकाः । आदावन्ते चेति न्यायः ।१ ।१३० । अदग्धदहनन्यायो प्रविवृतः ।२ ।१३१ । ऊषर वृष्टिन्यायस्तु निगदव्याख्यातः ।३ ।१३२ । शवोद्वर्तनन्यायः ।४ ।१३३ । अंधदर्पणन्यायः ।५ ।१३४ । श्वपुच्छौ भासन न्यायः ।।६ ।१३५ । अरण्यरोदनन्यायः ।७ ।१३६ । मूर्खसेवनन्यायश्चापीदृशः । सर्वेऽप्येते वैयर्थ्यबोधकास्पष्टाश्च ।८ ।१३७ । समुद्रवृष्टिन्यायमपि केचिदुदाहरन्ति ।९ ।१३८ । ननु जीवत्वस्याज्ञानतन्त्र तद्बाधे बाधात्तद्विशिष्टस्य जीवस्य बाधः स्यात् तथा च द्वैततत्त्वारोहणं जीवस्य तालसर्पन्यायात् स्वनाशाय स्यात् अवरोहणसमये ऊर्ध्वमुखैस्तालग्रन्थिभिः सर्पोदर विदारणात्तालारोहणं सर्पस्य स्वनाशायेति प्रसिद्धम् । एवं च प्रज्ञावतां तत्त्वावबोधकहेतुश्रवणादौ प्रवृत्तिर्न स्यादिति चेन्न । रोगीन्यायेन प्रवृत्युपपत्तेः । यथा रोगनाशात् विशेषणाभावे विशिष्टाभावाद्वेति न्यायेन रोगविशिष्टस्य नाशेऽपि शुद्धस्य तत्स्वरूपस्यानाशात् रोगिस्तन्नाशके भेषजादौ प्रवृत्तिस्तथेत्यर्थः ।।१० ।१३९ । प्रासंगिकोऽत्र तालसर्पन्यायो व्याख्यातः ।।१०१ ।१४० । विशेषणाभावप्रतिपत्तिः स्पष्टः ।१०२ ।१४१ । तत्त्वज्ञानकार्यान्तःकरणवृत्यात्मकं ज्ञानं कथं स्वकरणीभूताज्ञाननाशाय स्यादुपजीव्यविरोधादिति चेदश्वतरीगर्भन्यायादित्यवेहि । बडवायां गर्दभादुत्पन्नाश्वतरी तस्या गर्भो यथा तन्नाशाय भवति तथा भवतु ज्ञानमपि स्वहेत्वज्ञाननाशायेत्यनवद्यम् ।।१०३ ।१४२ । वृश्चिकी गर्भन्यायोऽपीदृशः ।१०४ ।१४३ । कदलीफलन्यायोऽपि च ।१०५ ।१४४ । कार्यकारणाभेदपक्षेऽपि नानुपपत्तिः च । किमज्ञानस्य दुष्करमिति न्यायात् ।१०६ ।१४५ । अस्मिन् बोधे शमादि साधनसंपन्नस्यैवाधिकारः शान्तो दान्त इत्यादि शास्त्रात् शोपदेशो हि

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

व्याघ्रीक्षीरन्यायेन तत्रैव सत्पात्रे प्रतिष्ठां लभते। यथा तत्सुवर्णपात्र एव तिष्ठति फलाय च भवति तथेत्यर्थः ।।१०७।१४६। शमादिमानप्यमेधावी न श्रवणादावधिकारी। तत्रापि कृत उपदेशो बधिरकर्णजपन्यायेन पूर्वोक्तान्धदर्पणादि न्यायैश्च व्यर्थतामेति। तदुक्तं वासिष्ठे 'यस्य नास्ति स्वयं प्रज्ञाशास्त्रं तस्य करोति किं लोचनाभ्यां विहीनस्य दर्पणः किं करिष्यति' इति।१०८।१४७। शिष्यवैराग्यादि परीक्षा चादावेव कर्तव्य 'नहि विवाहानन्तरं वरपरीक्षा क्रियत' इति न्यायात्।१०९।१४८। पश्चात्कृतायास्तु परीक्षायाः कृतेकार्ये किमु हुते प्रस्येनेति न्यायेन व्यर्थता।११०।१४९। किं च यः सूर्यन्यायेन सतां गुणानेव गृह्णाति स एव शिष्यत्वेन स्वीकार्यः। सूर्यो हि वुसादित्यत्काशुद्धमन्नमवरोषयतीति प्रसिद्धम्।१११।१५०।;११२।१५१। भ्रमरन्यायोऽप्येतादृशः सोपि कंटकादीन्यदि त्यज्य पुष्पादिभ्यो गन्धगुणमात्रमादत्ते यस्तु चालिनी न्यायेन असारमात्रग्रही सनादर्त्रव्यः।११३।१५२। अत्र मक्षिका न्यायः।११४।१५४। जलौकान्यायश्च बोध्यः। मक्षिका संर्व देहं परित्यज्य व्रणमेवावलंबते जलूकापि स्त्रीस्तनाग्रे लग्ना क्षीरं त्यक्त्वा रुधिरं पिबतीति प्रसिद्धम्।११५।१५३। चिरं परीक्ष्यश्च शिष्यः यतः केषुचिदव्यवसायात्मकबुद्धिषु विशेषेण दृश्यमानान्यपि साधनानिरासमरटित न्यायेन क्रमेण क्षीयन्ते यथा गर्दभ शब्द आदावत्युच्चैरुपलभ्यते पश्चात् मन्दतामाप्नुवन् क्रमेण क्षीयते तथेत्यर्थः।११६।१५५। अत्र पूर्वाह्नछाया न्यायः।११७।१५६। खल मैत्री न्यायश्च बोध्यते। अप्यादौ वृद्धिं प्राप्य पश्चात् क्रमेण क्षीयेते।११८।१५७। धीरेषु तु सज्जनेषु तु सज्जशब्दादौ स्वल्पानि साधनान्यपि कुक्कुटध्वनि न्यायेन क्रमेण वर्धन्ते।११९।१५८। इह पराह्नछायान्यायः।१२०।१५९। साधुमैत्री न्यायश्च।१२१।१६०। अवश्यं परीक्ष्यश्च शिष्यः यतो गोक्षीरं श्वहर्तेघृतमिति न्यायेन असत्पात्रे सदुपदेशोप्यपवित्रतां याति।१२२।१६१। अपि च विधेयं हि स्तूयते वस्त्विति न्यायेन विंध्यौपायन अतिप्रशस्त बहुफलकथनेन संस्तुत्य तेषु श्रद्धातिशयमुत्पाद्य शिष्यं प्रवर्तयेत्। दृश्यते हि लोकेऽप्येतां गां क्रीणातु भवानिति विधिशेषस्य बहुक्षीरेत्याद्यर्थवादस्य तत्क्रयणप्रवृत्तिहेतुत्वम्।१२३।१६२। किं च कृतकृत्यस्य विदोऽतत्वविदुद्धारातिरिक्त कर्तव्याभावाद्यथा तदुद्धारः स्यात्तथैव कर्तव्य सुरेन्द्रादि पूज्येनापि विदुषा पित्रानुसृतस्तनंधयन्यायेनाज्ञोऽनुसर्त्तव्यः तैर्निन्द्यमपि देहस्य निन्द्यत्वमात्मनो वाङ्मनसगम्यत्वज्ञानन्नोद्विजेत किन्तु प्रत्युत तर्द्यष्टानुसारेण स्वयमप्याचरेत।१२४।१६४। इह राज्ञानुगत विवाह प्रवृत्तभृत्यन्यायोऽपि प्रवर्तते विवाहन्नवृत्तो भृत्यो राज्ञाप्यनुगम्यते इति प्रसिद्धम्।१२५।१६४। कांस्यभोजिन्यायोप्येतादृशः। तस्यायमर्थः। मया नित्यं गुरूच्छिष्टं भोक्तव्यं कांस्यपात्रे च भोक्तव्यमिति नियमवतो विनेयस्य नियमाभंगाय गुरुर्नित्यं कांस्यपात्रे भुक्त इति यद्यप्ययं शास्त्रीयस्तथाप्येतद्व्यवहारस्य लौकिकत्वात् सुन्दोपसुन्दादि न्यायवल्लौकिकेषु

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

परिगणितः सुन्दोपसुन्दवधवृद्धकुमारीवरादि निरूपक शास्त्रमपि तदानींतन जनप्रसिद्ध तदनुवाद इति बोध्यम् ।१२६ ।१६५। एवं विशेष्यात्तु तद्धार इति न्यायोऽपि मल्लग्रामादिरूपलौकिक व्यवहारमूलकत्वात् लौकिकेषु गणनीयम् ।१२७ ।१६६। एवं शिष्येणापि यथा शास्त्रं परीक्ष्यैव परमशीलसंपन्नोऽनृशंसः श्रोत्रियोऽ द्वैतनिष्ठो गुरुराश्रयणीयः। यदि वाऽपरीक्ष्यैवातिश्रद्धालुतया विप्रलंभकमेव कंचिदाचार्यत्वेनाश्रयेत मुमुक्षुः स चाज्ञस्य मुमुक्षोरहंकारादिरूपमचेतनमात्मानमात्मेत्युपदिशेत्। स च शिष्यश्रद्दधानत्वेनान्धगोलांगूलन्यायेन तदात्मदृष्टिनं परित्यजेत्। तद्व्यतिरिक्तं चात्मानं न प्रतिपद्येत। तथा सति पुरुषार्थाद्विहन्येतानर्थं च प्राप्नुयात् न्यायार्थस्त्वेवं कश्चित् किल दुष्टात्मा महारण्यमार्गे पतितमन्धं स्वबन्धुपुरं निगमिषुमुवाच। किमत्र त्वया दुःखितेन स्थीयते इति। स चान्धः करुणामृतं वचनमाकर्ण्य तमाप्तं मत्वा बभाषे। 'अहो मद्भागधेयं यद्यत्र भवान्मां दीनं स्वाभीष्टं पुरं प्राप्तुमसमर्थं ब्रूष इति। स च विप्रलिप्सुर्दुष्टं गोयुवानमानीय तदीयं लांगूलमन्धं ग्राहयामास। उपदिदेश च एष गोयुवान् त्वां स्वपुरं नेष्यति, मा त्यजैतस्य लांगूलमिति। स चान्धस्तद्वचनश्रद्धया तदत्यजन् स्वाभीष्टं पुरमप्राप्यानर्थपरंपरां प्राप्तवानिति ।१२७ ।१६७। यो भूलिंगन्यायेन परोपदेशमात्रकुशलः स्वयं च यथेच्छाचरणशीलः सोपि दांभि कृत्वा सक्तव्यः भूलिंगाख्यः पक्षीमासा हतं कुर्विति पुनः पुनरुच्चैर्वदन् सिंहदंष्ट्रान्तर्लग्नं मांसलवं जिघ्रन् दातीति प्रसिद्धम् ।१२८ ।१६८। यदि चमप्रवारको न भवति किंतु मूर्खस्तथापि न स आश्रयणीयः तदाश्रयणेऽपि नाभीष्टसिद्धिः। अपि त्वनर्थ प्राप्तिरेव भवति। अन्धसेवांधलग्नस्य विनिपातः पदे पद इति न्यायात् ।१२९ ।१६९। किमादावेव गुरु परीक्षणेन चिरसहवासादिना वञ्चकत्वेन मूर्खत्वेन वाशातश्चैसक्तव्यः। मैवं प्रक्षालनाद्धि पंकस्य दूरादस्पर्शनं वरमिति न्यायात् परीक्षाया पूर्वमेव त्यागस्योचितत्वात् ।१३० ।१७०। अत्र श्वः कार्यमद्य कुर्विति न्यायोप्यवतरति ।१३१ ।१७१। ननु किमाचार्यमारतं पारतन्त्र्यादि क्लेशेन आदिकेशेन स्वयमेव मेधाविर्न वेदान्तविचारेण तत्त्वज्ञानं संपादनीयमिति शंकानिरासाय स्वकरकुचन्यायप्रवृत्तिः। यथा स्वकरेण स्वकुचयोर्मर्दनं कुर्वती युवती न सुखं लभते तथा जिज्ञासुरपि स्वतन्त्रविचारेण न ज्ञानमाप्नोति। तथा च श्रुतिः, "आचार्यवान् पुरुषो वेद प्रोक्तान्येनैव सुज्ञानाय प्रेष्ट" इत्यादि ।१३२ ।१७२। ननु स्वतंत्रविचारेण तत्त्वज्ञानासंभवादुपदेष्टृणां च प्रतारकत्वशंकास्पदत्वात् प्रत्युत तेभ्यो महानर्थप्राप्तिशंकासंभवेन तत्क्रिया तत्याज्य एव। गुर्वधीनो ब्रह्मविचार इति चेन्न। शास्त्रोक्तप्रकारेण सम्यक्परीक्षया साधुत्वासाधुत्वनिर्धारणादसाधु त्यागसाध्वाश्रयणयोः संभवेन भिक्षुभिप्क्ष्युभियास्थाल्यानधिश्रयणन्यायेनासाधुकृत प्रतारणभिया ब्रह्मविचारत्यागायोगात् ।१३३ ।१७३। द्वाभ्याभियामस्यानाश्रयणन्यायः ।१३४ ।१७४। एकाभियाकंथात्यागन्यायश्च प्रवर्तते ।१३५ ।१७५। ननु [illegible] पूर्वोक्तप्रकारेण

CC-0 Agamnigam Digital Preservation Foundation, Chandigarh. Funding by IKS-MoE 2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

कार्यकारणोपाधिबाधेऽप्येकदेश विकृतमनन्यवदिति न्यायेन जीवत्वानपायान्नाभीष्टब्रह्मत्वसिद्धिरिति चेन्न। स्फटिकलौहित्यन्यायेन तन्निवृत्त्युपपत्या ब्रह्मभावसिद्धांतस्तद् बाधिजीवयोः पुच्छश्वादिवदवयवावयविभावोऽस्ति येन छिन्नपुच्छादि श्वादेः श्वभावाद्यनिवृत्तिवन्निवृत्तोपाधिरपि जीवस्य जीवत्वानिवृत्तिः स्यात्। किं तु स्फटिके जपाकुसुमादि संनिधिकृतलौहित्यस्य यथा तन्निवृत्तौ निवृतिः यथा वा धटाद्यवच्छेदकृतस्याकाशो परिच्छिन्नत्वस्य घटाद्यभावेऽभावः, यथा वा जलाद्युपाधिकृतस्य स्वदेहेऽ धोमुखत्वादेस्तदपगमेऽपगमस्तथात्मन्युपाधितन्त्रस्य जीवत्वस्य तद्बाधाद्बाधः ।१३६ ।१७६। अत्रैकदेशेति न्यायः प्रसंगाद्व्याख्यातः ।१३७ ।१७७। आकाश परिच्छिन्नत्वन्यायः ।१३८ ।१७८। देहाधोमुखत्वन्यायश्च प्रकृतन्यायविषयार्थतः पवितौ ।७९ ।१७८ ।२। कौन्तेयराधेय न्यायस्याप्यत्र संचारः, यथा कर्णः कौन्तेय एव सन् कौन्तेयत्वाज्ञानात् राधेयमात्मानं मेने पश्चादाप्तोपदेशेन कौन्तेयमात्मानं मन्यते स्म तथा ब्रह्मैव स्वस्वरूपाज्ञानाज्जीवमात्मानं मन्यते गुरूपदिष्ट महावाक्यज बोधादबोधबाधे ब्रह्मैवाहमिति मन्यते ।१३९ ।१७९। राजपुत्रव्याधन्याय सिंहमेष न्यायावपीह बोध्यै। राजपुत्रः कश्चित्कदाचित् स्वमातृसपत्न्या क्वचिन्निक्षिप्तो व्याधवशं प्राप्तस्तेन पुत्रत्वेन पालितश्च व्याधमेवात्मानं जानाति स्म। पश्चात्कथञ्चिद्राजपुत्रत्वन्निश्चितवतां मन्त्रिणामुपदेशात् राजानमात्मानं मत्वा पैत्र्यसिंहासने प्रतिष्ठां प्राप। सिंहशाबकोपि कथञ्चिद् ग्रामीणवशं प्राप्तो मेषैः सहचरन् युवापि संस्तेषु विविधरूपकृतं त्ववकर्णत्वालंबकर्णत्व सश्रृंगत्वाशृगत्वादिकृतं च विशेषं पश्यन्नात्मानमपि मेषं विशेषमेव मेने। दूर्वादिकं च बुभुजे पश्चादन्यसिंहोपदेशेन मृगराजमात्मानमपश्यदिति गाथेः लोक प्रसिद्धे ।१४० ।१८०। ननु पूर्वं जीवन्मुक्तिः प्रतिपादिता इदानीमपि बोधेनाबोधबाधे ब्रह्मैवाहमिति मन्यत इत्युक्त्वा सूचिता न तुरोपगन्तुं युक्ता निष्प्रयोजनत्वात्। प्रयोजनमनुद्दिश्य न मन्दोपि प्रवर्तत इति न्यायेन तदुपगयायोगात् विदेहमुक्तेरेव सविलासाज्ञानबाधेन सर्वसत्तास्फूर्तिप्रदस्वमात्रातर्पित ब्रह्मादि ब्रह्मानंदात्मनावस्थानलक्षणायाः परमपुरुषार्थत्वात्। अतः पिंडं हित्वा करं लेढीति न्यायात् ब्रह्मानन्द लेशभूतविषयानंद विद्यानन्दाद्यनुभवहेतुभूताया घटप्रदीप न्यायेन स्वोपाधितत्संबद्धार्थमात्रस्फार्ति हेतुभूतायाश्चांगीकृतिर्व्यर्थैव ब्रह्मविद्यासंप्रदाय स्थित्यर्थं तदुपगम इति चेन्न। स्वांज्ञानकल्पिताचार्येणापि स्वप्नमन्त्रंलाभन्यायेन तल्लाभसंभवादिति चेन्मैवम्। श्रुत्यादि मानसिद्धा यः बहुभिरंगीकृतायाश्च प्रयोजनाभावापराधेन निरसितुमशक्यत्वात्। वस्तूनिमानान्यपेक्ष्यंते न प्रयोजनानीति न्यायात् बहूनामनुग्रहे न्याय्य इति न्यायाच्चेत्यलम्। अस्मिन् ग्रन्थसन्दर्भे न्यायषट्कं लिखितं तदनूद्य ते साक्षात्परंपरया च तत्रत्य घट प्रदीप न्यायसंगता अन्येऽपि न्याया लिख्यंते प्रयोजनमनुद्दियेति न्यायः ।१८२। पिंडमिंति न्यायः। १२ ।१८४। घटप्रदीपन्यायः यथा घटनिष्टो दीपो घटस्योदरमात्रं भासयति तथात्रापीत्यर्थः।

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

चक्षुरादिद्वारा बहिर्निर्गत्यैव जीवोपाधिभूता धीर्बाह्यविषयान् व्याप्नोति तद्योगाच्चिदाभासोऽपि निःसृत इव प्रतीयत इति विवक्षायां वहुच्छिद्रघटप्रदीप न्यायोऽवतरति। अयं भगवत्पादैः संक्षेपेण भाष्यतात्पर्यप्रकाशके श्रीदक्षिणामूर्तिस्तोत्रे सोदाहरणमुक्तः। नाना छिद्राद्यदोदरस्थितमहादीप प्रभाभास्वरं ज्ञानं यस्य तु चक्षुरादि करणद्वारा बहिः स्पंदते जानामीति तमेवभान्तं तमनुभात्येतत्समस्तं जगत्तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये इति।४।१८५। चक्षुरादिद्वारा बहिर्निःसृतस्यान्तःकरणस्य मूषासिक्तं ताम्रन्यायेन विषयाकारता भवति। तदुक्तं भगवत्पादैः मूषासिक्तं यथा ताम्रं तन्निभं जायते तथा रूपादीभ्यामुवच्चित्तं तन्निभं दृश्यते ध्रुवमिति।५।१८६। ननु ताम्रादेस्तेजः संयोगादुतस्य शीतलकठिनमूषाभिघातेन शैत्यापतौत्यापि मूषाकारतापत्तावप्यमूर्तस्यान्तःकरणस्य ताम्रादि विलक्षणतया विषयव्याप्तावपि कथं तदाकारतापत्तिरिति शंकानिरासाय व्यञ्जकव्यंग्य न्यायोऽवतरति। यथा व्यञ्जक आतपादिर्व्यंग्यस्य घटादेराकारतामेति तर्थत्यर्थः।६।१८७। दाहकदग्धन्यायोपीदृशः। दृश्यते हि विगतज्वालस्य दाहकस्याग्नेर्दारुकाष्टाद्याकारता एते न्याया आत्मन्यपि प्रवर्त्तन्ते। भवति हि तस्यापि न तदुपाधिसंसर्गात् तत्तदाकारतया भानं रूपम् रूपं प्रतिरूपो बभूवेत्यादि श्रुतेः।७।१८८। क्रमेण स्वेच्छया बुद्धेर्विविधरूप प्रग्राहकत्वविवक्षायां शैलूषीन्यायः। शैलूषी नटी सा यथा क्रमेण विविधरूपाणि धत्ते तथेत्यर्थः।८।१८९। एकं विषस्तामभीष्टतया गृह्णाति ततोऽभीष्टतरविषयान्तरलाभे पूर्वं त्यक्त्वा तं तथात्वेनादृते एवमग्रेपि इति धियः स्वभावः एतस्मिन् विषये बुद्धेः क्रमेण सर्वेन्द्रियविषयसंबन्धे च नटांगन्यायोऽवतार्यते रंगभूमावागतां नटभार्या यो यो नटः पृच्छति "कस्य भार्यासि सुश्रोणि" इति, सा तं तं प्रति तवैवेति तं प्रसिद्धम्। अन्या साधारणधर्मस्यान्यत्रारोप विवक्षायां जलौस्य न्यायः।१०।१९१। वायुशैत्योस्य न्यायः।११।१९२। भूशैत्यौस्थ न्यायश्चावतार्यते। जले स्वाभाविकं शैत्यम्। उष्मत्वं तु तेजः संयोगात्तद्धर्माध्यासोऽत्र भुवो वायोश्चानुष्णाशीतत्वं स्वभावः। जलाग्न्यादि संपर्कादुष्मत्वादि तद्धर्मारोपः। एवं प्रकृतेऽपि बोध्यम्।१२।१९३। लौहाग्निन्यायस्तु परस्परधर्माध्यास तादात्म्याध्यासयोर्विवक्षायां प्रवर्तते; लोहो दहति त्रिकोणोग्निरित्याद्यनुभवात्।१३।१९४। अहिभुक्वैवर्तन्यायस्तु तादात्म्याध्यास एव ज्ञेयः। श्रूयते हि लोके कश्चिदहिभुग्नावमाहरो हस च तत्र बहुजनसमुदायं दृष्टवा केनचिन्मे विनिमयो न स्यादिति धिगाह्वयदिरजं वद्धातंद्रां प्रापकैवर्तश्चोपहासार्थं तस्यादातां मोचयित्वा स्वपादेव बंधनाविपारंगतायामवरोहणसमयेऽहिभुक् स्वपादे रज्जुमदृष्टा कैवर्तपादे च तां दृष्ट्रवाहमयमयमहमिति स्वहृदि निश्चित्य रे कैवर्त त्वमहमहं च त्वमिति तेन विवादं कृतवानिति। अहिन्मादकर औषधिविशेषस्तद्भोक्ता योऽस्तीति पाश्चात्यभाषायाम्। एवमन्येऽपीदृशा बहवो न्यायाः सन्ति। ग्रन्थ विस्तरभयात्साम्याच्च नेह

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

लिख्यन्ते। प्रागपि यश्चैक विषये बहून्या प्रदर्शनं तत्रैवमेव बोध्यम् ।१४ ।१९५। अस्मिंश्चाध्यासेऽज्ञानं कारणं तत्वज्ञानेन वा तदीय न्यायेन तन्निवृत्तावस्नेहदीपन्यायेन तदध्यासोऽपि निवर्तते न च ज्ञानेनैवोभयनिवृत्तिः कुतो न स्यात्। ज्ञानमज्ञानस्यैव निवर्तकमिति न्यायविरोधात्। द्विविधा हि निवृत्तिः, विरोधिना सामग्रीनिवृत्या च यथा वातादिना दीपनाशः, यथा च तैलवर्त्त्यादि निवृत्या दीपनिवृत्तिः। तत्राद्या निवृत्तिरज्ञानस्य द्वितीया कार्यवर्गस्येति बोध्यम्। अत्र न्यायत्रयं व्याख्यातम् ।१५ ।१९६, ।१६ ।१९७, ।१७ ।१९८। जाग्रदादौ बुध्यां सत्यां दुःखादयो दृश्यन्ते, सुषुप्त्यादौ तन्निवृत्तौ नोपलभ्यन्ते इति तद्धर्मा एव, नात्मधर्माः। सुषुप्तावप्युपलब्धिप्रसंगात् इत्यत्र तदागमे हि दृश्यन्ते इति न्यायोऽवतरति। दृश्यते हि तैलादावनुद्भूतस्पर्श तेजोऽवयवागमे सन्तापोपलब्धिरिति तद्धर्म एव न तैलादि धर्म इति ।१८ ।१९९। अज्ञाननिवृत्तौ चाप्रतिबद्धसाक्षात्कारो हेतुः। अज्ञानोपलब्धौ च वध्य घातकन्यायेन तदभावोऽवबुध्यते यथा हि भुजंगादि भूषितां वनभूमिं दृष्ट्वा भुजंगभुगादेरभावोऽवगम्यते ।१९ ।२००। खादकघातकन्यायस्तु तत्र प्रवर्तते यत्र कथञ्चित् परम्परया हेतोरप्युपचारेण साक्षाद्धेतुत्वमुच्यते यदि छागादि खादका नरा न स्युः सुस्तर्हि घातका इति खादका एव घातका इति न्यायार्थः। कुमारीशन्यायोदाहरणमस्यापि बोध्यम् ।२० ।२०१। एतदज्ञानानेकत्ववादिनां कल्पनागौरव शंकावलाग्रशतभागोऽपि न कल्पेलिः प्रमाणकः प्रमाणावंत्यदृष्टानि कल्पानि सुबहून्यपि इति न्यायेन न वार्यते ।२१ ।२०२। सदसतोरुत्पत्तिनिवृत्यसंभवेन परस्परविरोधे प्रकारान्तरस्थितिरिति न्यायसिद्धस्य सत्वस्यासत्वस्य चानुपपत्तेर्गले पादुका न्यायेनाज्ञानकार्यस्य बाधानुपपत्त्या चाज्ञानस्यानिर्वचनीयत्वं वलात्स्वीकार्यते। यथा कस्यचिद् गृहस्थस्य गृहे नाद्यर्थित्व छलेनागतोनिषण्णश्च कश्चिद्विटस्तेन तत्त्वतो ज्ञात्वा 'गच्छ गच्छेति' पुनः पुनरुच्यमानोऽपि यथा धौर्त्येन स्वेच्छया गमनं न स्वीकरोति तदा पादुकासहितं पदं गले निधाय नोदयित्वा च बलान्निःसार्यते तथा प्रकृतेऽपि बोध्यम्। अत्र न्यायद्वयमुदाहृतम् ।२०२, ।२०३, ।२०४। यस्याज्ञानं भ्रमस्तस्य भ्रान्तः सम्यक् वेदस इति न्यायेन यस्यानात्मनि देहादावात्मत्वभ्रमोऽस्ति तस्याज्ञानमस्तीति कल्पन्ते ।२४ ।२०५। विचारपाटवेन यावद्यावद्विवेक दार्ढ्यं भवति तावत्तावद् भ्रमशैथिल्यं जायते तरतमभावा यत्र साधनायतं फलं तरतमभावापन्नमिति न्यायात् ।२५ ।२०६। विचारविषयत्वं च नाज्ञातस्य नापि निश्चितस्य किन्तु सन्दिग्धस्य। संदिग्धं सप्रयोजनं च विचारमर्हतीति न्यायात् ।२६ ।२०७। ये तु ब्रह्मावबोधहेतुविचारं विहायान्यत्र रतिं कुर्वन्ति ते चिन्तामणिं परित्यज्य काचमणिग्रहणन्यायं नातीवर्तन्ते ।२७ ।२०८। एतस्माद्विचारादुद्वेगेन निवर्त्तते चेदवश्यमनर्थनिवृत्तिहेतुं ब्रह्मावबोधं

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh Funding by IKS-MoE-2025-Grant

प्राप्नोत्येवेति विवक्षाया टिट्टिभन्यायप्रवृत्तिः। अत्र सम्प्रदायविद [illegible]

Gandhi Memorial College Of Education Bantalab Jammu

कस्यचिट्टिट्टिभाख्यस्य पक्षिणोण्डानि तीरस्थान्यदधिरुत्सेकेनापजहार, स च पक्षी एनं शोषयामीति प्रवृतो भार्यादिभिर्बहुधा वार्यमाणोऽपि नोपराम, प्रत्युत तानपि सहकारिणो वव्रे तांश्च पतनोत्पतनाभ्यां बहुधा क्लिश्यतः सर्वानवलोक्य कृपालुर्नारदस्तत्समीपे गरुडं प्रेषयामास। ततस्तत्पक्षवातेन शुष्यन् समुद्रो भीतोंऽडान्यानीय पक्षिणो ददाविति। तथा च यथा दृढाध्यवसायस्य पक्षिणो गरुडसाहाय्यादंडलाभस्तथा दृढबुद्धेर्जिज्ञासोरतिदुर्लभस्यापि तत्त्वज्ञानस्येशानुग्रहात्सुखेन लाभो भवति।२८।२०९। यः सारासारविवेकधिया समूलं द्वैतमसारं मत्वा त्यक्त्वा च सारं वस्तु गृह्णाति तस्य न ततोऽथांतरे अभीष्टत्वमतिर्भवतीति वेत्तुक्षायां पतिं वरा न्यायावतारः। यथा स्वयंवरा कन्याऽन्यांस्त्यक्त्वा सर्वोत्तमत्त्वेनाभिमतं यमभीष्टतमत्वेनादत्ते न ततोऽन्यत्राभीष्टत्वमकुरुते तथा प्रकृतेऽपीत्यलम्।२९।२१०। स्वप्ने मन्त्रलाभ न्यायः। उपासकस्य स्वप्ने दृष्टात्स्वेष्टदेवात्संत्र लाभस्तज्जयादिष्टसिद्धिर्भवतीति तान्त्रिकेषु प्रसिद्धं तथा पुण्यपुञ्जसहकृतस्वाविद्याकल्पितेन गुरुणा ब्रह्मविद्यालाभो भविष्यतीत्यर्थः।।३०।२११। वस्तूनीति न्यायः।३१।२१२। बहुनामनुग्रहो न्याय्य इति न्यायः। अत्र न्यायषड्के इदं न्यायद्वयं प्राधान्येन विवक्षितं अनुग्रहः सौहाय्यं न्याय्यः न्यायादनपेतोऽर्था तदुपेतः कार्यसाधक इति यावत्। यथाहुः बहूनामप्यासाराणां मेलनं कार्यसाधकां तृणैः संपाद्यते रज्जुस्तयानागो वध्यत इति।३२।२१३। केचित्त्वेतंन्यायान्तरत्वेनोदाहरन्ति। असाराणामपि बहूनामित्यन्वयः।४०।२१४। पूर्वोक्तस्य तत्वज्ञानस्य जीवन्मुक्ति सुखातिशयाविर्भावकत्वे वैराग्यादि सहकारि भवति ज्ञानं च विषय मिथ्यात्वबोधने न वैराग्यादि पोषकं भवतीति तयोरन्योन्यस्थाप्यं वनव्याघ्रन्यायात् ह्रदनक्रयोः परस्परवियुक्तयोः शवरधीवराभ्यां प्रधर्षणीयता भवति, संयुक्तयोस्तु परस्परसाहाय्यमाचरतोर्दुर्धर्षता भवति तथा प्रकृतेऽपि बोध्यम् ।। किं च "यतो वे"त्याद्यागमस्य क्षित्यंकुरादिकं सकर्तृकं कार्यत्वादित्याद्यनुमानस्य चेतरेतरसाहाय्यमप्यनयोर्न्यायियोरुदाहरणम्।।

तथा हि सत्यप्यागमश्रवणे जगतः कर्ता कश्चिदस्ति न वेति सन्दिहानं प्रति यत्र यत्र घटादिषु कार्यत्वमस्ति तत्र सर्वत्र सकर्तृकत्वं दृष्टमिति कर्मत्वं भूयो गृहीतसहचारत्वेन कर्त्तुरस्तित्वकोटिमुत्कटामापादयति तावन्मात्रेण संभावितमतिर्बोध्यः। श्रुत्या सुखेन बोधयितुं शक्यः। एवं न केवलानुमानेनापि परमात्मा यथावदवगन्तुं शक्यः। अनेन हि जगदुपयोगिकृत्यादिमानेकस्तद्गतं कृत्यादिकं नित्यं सर्वं विषयं च यदि सिध्येत्तदा खलु संसारिवैलक्षण्यं तत्र सिध्येन्न तु तदस्ति कार्यत्वहेतो तत्र सामर्थ्याभावात् स हि कर्तारमपेक्षते, तदेकत्वे कृत्यादि नित्यत्वादौ चोदासीन एव।

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

किञ्च यथा किञ्चित्कार्यं ससंप्रदानकं किञ्चिन्नेति। किञ्चित्कार्यं सोपादानकं किञ्चिन्नेति तथा किञ्चित्सकर्तृकं किञ्चिन्नेत्यस्तु। एवं च लोके कृतत्वेन घटादिव्यवहारोऽकृतत्वेतांकुरादि व्यवहारश्चोपपद्यते। तस्मान्न केवलानुमानेनेशसिद्धिः। अनुमानापेक्षा च श्रुतेरसंभावनादिपुरुषापराधनिवृत्तये न तु प्रमित्युत्पत्तौ तत्फले वा वेदान्तानां सापेक्षताप्रसंगात्।

तदुक्तं सर्वज्ञमुनिभिः स्वाध्यायवन्न घटते करणं विचारो नाप्यंगमस्य परमात्मधियः, प्रसूतौ सापेक्षता पतति वेदगिरस्तथात्वे ब्रह्मात्मनः प्रमिति जन्मनि तन्न युक्तमिति ।११४ ।२१६, ।११५ ।२१७। रथबडवा न्यायोऽपीह प्रवर्तते। रथे नियुक्ते बडवे रथबडवे तद्विषयो न्यायः। ते यथा मिलित्वैव रथं वाहयतः वियुक्ते तु न शक्तुं तो वोढुं परस्परस्नेहातिशयात् कुरुतश्च-हेषणं तथा श्रुतियुक्ती अप्रतिबद्धसाक्षात्कारं बोधशमादयश्च जीवन्मुक्तिसुखं मिलित्वैव निर्वाहयन्ति; वियुक्ताश्च तदर्थमितरेतरमाकांक्षन्तीति पूर्वोक्तं सर्वमनुसन्धेयम् ।।११५ ।२१८। ननु निर्दोषमानजस्य तत्त्वसाक्षात्कारस्य पुरुषापराधमात्रात्कथमवोध निवर्तनाक्षमत्वं येन तन्निरासायानुमानाद्यपेक्षा भवेदिति चेद् भर्छुन्यायेन भैरवन्यायेन चेत्यवेहि। इत्थं हि लौकिकी गाथा भर्च्छुर्तामकस्य चिद्राज्ञः सचिवस्तदाज्ञाया दूरदेशं तत्रत्यदस्यु वधार्थं गतः तान् हत्वापि तद्देशमर्यादा स्थापनार्थं तत्र चिरं विलंबिते तस्मिंस्तच्छत्रु भूताः संविवादस्युकर्तृकं तस्य वधं निखिलनगरे घोषयित्वा राज्ञोऽपि साभिज्ञानं निवेदितवन्तः। आगतांस्तत्समाचारपत्रांश्च मध्ये विलोपयामासुः। स च कियत्कालानंतरस्त्वस्यानुयामिनः कांश्चित्तत्र स्थापयित्वा नृपदर्शनायागतो मार्गे स्वारिभिः समस्तपुरेस्थापित्वा राज्ञे निवेदितं स्ववधवृत्तान्तं श्रुत्वा दैवविपर्यया द्विपरीतबुद्धिः सेनां बहिः स्थापयित्वा एकाकी राजसद्मनि प्रविश्य नृपं दिक्षुःक्वचिद् गृहारामकुञ्जे तस्थौ। राजा च प्रातर्बहिर्निःसृतस्तं साक्षाद् दृष्ट्वापि पूर्वोक्तमन्त्रिवाक्यस्मरणज विपरीतभावनावशात् पिशाचतां गतोऽयमिति मेन इति ।२४४ ।२१९। एवं भैरवनामा कश्चिद्विप्रश्चक्रंसेव्यनृपः सेव्यो न सेव्यः केवलो नृप इति न्यायमुल्लंघ्य क्षितिपतिकृत सत्कारातिशयजनितोत्संकोद्रेकात्कामप्यगणयन्सैर्वनृपानुगैर्विरुरोध। अतस्तैस्तावत्तस्य राजसभाप्रवेशं निरुध्य तन्मरणे च राज्ञे निवेद्य कतिपय दिनानंतरं तत्पिशाच भावोऽपि निवेदितः। स च कदाचिद्राज्ञि मृगयाविहारेणि सति तत्समागच्छेयानिरोधकभिया मार्गाश्वत्थमारुह्य तस्थौ, राजा चाश्वत्थारूढमूर्ध्वबाहुं भैरवोऽहं नृपशार्दूल मां द्रष्टुमर्हसीत्याद्याक्रोशंतं पिशाचवधाय ततो विमुखो बभूवेत्यपि लौकीगाथा। तथा च यथाऽत्रोभयत्रापि करणापाटवमंदान्धकारादिदोषाभावेऽपि पुरुषापराधादेव नृपतेष्टसाक्षात्कारस्याबोधनिवर्तनाक्षमत्वं तथा प्रकृतेऽपि बोध्यम् ।१४५ ।२२०।

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

राजेऽतिप्रासंगिकः अस्योदाहरणं तु तत्त्वबुभुत्सुना केवलं श्रवमेव न सेव्यं किन्तु तदंगभूताः शमादयो मननादयश्च सेव्या। एवं स्वर्गादिकामेन न केवलं प्रधानकर्मैव सेव्यं किन्तु तदंगजातमपीत्यादि बोध्यम्। २४६ ।२२१। शमादौ तत्वज्ञानस्य चान्योन्यसापेक्षत्वे किमपि न सिध्येदित्याशंकायां वह्निधूमन्यायः। यथोत्पत्तिप्रतीतिरूपद्वारभेदाद्वह्निधूमयोरितरेतरापेक्षत्वं न विरुध्यते तथा स्वरूपलाभदार्ढ्यरूपद्वारभेदान्नात्रापि विरोधः ।२ ।२२२। नन्वेतावता ग्रन्थेन मननादिना पुरुषास्वपराधापगमे प्रतिबंधरहितेन तत्त्वसाक्षात्कारेण ज्ञानं बाध्यत इत्युक्तम् भवति। बाध्य बाधकभावश्च विरोध पूर्वक एव। अतो ज्ञानाज्ञानयोर्विरोधः क इति निरूपणीयम्। येन बाध्यबाधकता स्यात् स किं गोमहिषादि न्याये नैमित्तिकः यथा गवादेर्महिषादेश्च केनचिन्निमित्तेनान्योन्यं मैत्रि भवति केनचिच्च विरोधः किं वाहिनकुलन्यायेन शाश्वतिक इति चेत् शृणु। चैतन्यमेव ज्ञानमिति पक्षे रश्मितृणादि न्यायेनागन्तुकः यथादित्यरश्मयः स्वभावतस्तृणादेर्भासका अपि सूर्यकात्रमल्पारूढास्तद्दाहका भवन्ति तथा ज्ञानप्रकाशमपि चैतन्यमखण्डाकारवृत्त्यारूढं तद्‌बाधकं भवतीति बोध्यम्। अखण्डाकारान्तःकरणवृत्तिर्ज्ञानमिति पक्षे तु तमः प्रकाशन्यायेन उपमर्द्दोपमर्दकभावलक्षण इति ।४६ ।२२३। तमः प्रकाशन्यायोऽपि मुख्यो बोध्यः ।४७ ।२२४। गोमहिषादि न्यायोऽत्र प्रसंगाद्‌व्याख्यातः ।२२५। अहिनकुलन्यायस्तु स्पष्टः ।२ ।२२६। सिंहमृगन्यायोऽपीदृशः ।३ ।२२७। प्रसवादि विरोधेनानुमानस्य बाधितत्वे गोमयपायसन्यायप्रवृत्तिः। यथा गोमयं पायसं गोविकारत्त्वात् संमत् संमतवदित्यस्य प्रत्यक्षबाधितत्वेन पय आदावनैकांतिकत्वेन चाप्रमात्वं तथान्येष्वप्येतादृशेषु बोध्यम् ।१४८ ।२२८। प्रत्यक्षविरोधेन तदितरसर्वबाध्यत्वेन विवक्षिते उपजीव्योपजीवकयोर्व्योपजीवकभावे प्रवर्तते ।१४९ ।२२९। उपदेशानुपदेशत्वे विपरीतं बलावलमिति न्यायोऽस्य बाधकः। दृश्यते हि चंद्रादावतिविपुलप्रणोमापदेशेन प्रादेश प्रमाग्राहिणः प्रत्यक्षस्य बाधः दृश्यते च व्योम्नि शब्दैकविशेषगुणत्वोपदेशसहकृतेन नीलाघभावानुमानादिनोपजीव्यस्यापि नीलादिरूपप्रतियोगि प्रत्यक्षस्य बाधः ।१५० ।२३०। दामव्यालकटन्यायो न तवस्थात्कदाचन भीमभासदरन्यायः सर्वदातेस्तुयद्यवेत्यादिना वासिष्ठ इदं न्यायद्वयं सप्रपञ्चमुपन्यस्तं, तत्राद्यस्योच्चतरां दशामापन्नस्याप्यज्ञस्यातिनीचदशाप्राप्तिरवश्यकालेन भवतीति तत्त्वबोधोऽवश्यं संपाद्य इति विवक्षायां प्रवृत्तिः दामव्यालकटाक्षास्त्रयोसुराः शंबरेण स्वमायया निर्मितास्ते च तल प्रहारादिनामैर्वादि चूर्णाकरणे शक्ताच्छ्रव्यज्ञानप्रभावात्कालेन मशकादियोनिं प्रापुरिति प्रसिद्धं तत्र ।१५१ ।२३१। तत्त्वविन्न कदापि स्वपदात्पततीति विवक्षायां द्वितीयस्यावरः तेप्यसुरास्तेनैव तथा निर्मिताश्चिरंजीवन्मुक्तिसुखमनुभूय निर्वाणपदौ प्राप्ता इति संक्षेपः। प्रपञ्चस्तु तत्रैव द्रष्टव्यः। सुन्दोपसुन्ददा मायाख्यानवदन्यान्यप्याख्यानानि प्रायोन्यायतयोदाहर्तुं शक्यन्ते। एवं

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

सर्वे लौकिका दृष्टांता लौकिक्यो गाथाश्च सर्वान्न्यायत्वेनोदाहर्त्तुं शक्यन्त इत्यलमतिप्रपञ्चेन ।१५२ ।२३२ । व्याख्यातं न्यायवृन्दं निजमतिमनतिक्रम्य यावन्मयाप्तं पारं प्राप्तं तु शक्तो न हि भवति गुरुः कः पुनर्मादृशोनासर्वः सर्वं न वेति प्रथितमिदमतो नास्ति मेऽत्रापराधः शिष्टाक्षेपं स्वयं वैरवविमलमतिभिः सम्यगाराधितार्यैः । अत्र प्रथमपादेयावत्तैलं तावद्व्याख्यानमिति न्यायविष यत्वं बोध्यम् ।१५३ ।२३३ । यावत्सानातातावत्पुण्यमिति न्यायोऽपीह बोध्यः ।१५४ ।२३४ । द्वितीयेनवबुद्धार्थे प्रवृत्तिर्बिल्ववर्ति गोधा विभजनन्यायेनाशक्येति ध्वनितम् ।१५५ ।२३५ । यत्राधिकार्थालाभेऽल्पार्थे प्रवृत्तिनिर्दोषायेति विवक्षा तत्रासाभेमतकाशिन्या दृष्टातिर्यक्षुर्कमितेमि न्यायः मतकाशिनी स्त्रीविशेषः ।१५६ ।२३६ । तृतीयेन हि सर्वे सर्वं जानातीति न्यायोऽर्थतः पठितः ।१५७ ।२३७ । नहि सर्वत्रानीशशक्तिरिति न्यायः ।१५८ ।२३८ । सर्वासाध्यान्निवृर्त्तिनायवापयेति न्यायश्चात्र ध्वनितः ।१५९ ।२३९ । पूर्वार्द्धन्याया ।१६० ।२४० । मिसिताः वेदान्ताम्नाय संख्याक लौकिकान्यायसंग्रहः शिवयोः प्रीतयेऽयं स्यात्पित्रोर्बालगीरिव ।..... गंगांभोमिलितस्यावीथी पयससत्सेव्यतां वीक्षय मे चेतोयातमुदं ध्रुवं मम वचोमिश्रं वचोभि सतां श्रुत्यादिर्वचनैश्च लब्धमिलनं याता सतां सेव्यदां साफल्यं भविता ततो मम कृतेः स्वाभीष्टसंप्रापणात् ।३ । यो ब्रह्मा यश्च विष्णुर्वसुतनुरपि यो यश्चा गौर्यादि मूर्तिर्यश्चात्मा सर्वजन्तो श्रुतिशिखरगिरां यश्च तात्पर्यभूमिः यस्याबोधात् समुत्थो व्रजति च विलयं यस्य बाधात् प्रपञ्चस्तं शुद्धं संप्रपद्ये शिवमजरमजं शंभुमीशानमीड्यम् ।४ । इति श्रीसाधुवृन्दवन्दित पादारविन्द वैराग्यादिरत्नाकरविद्वद्वर श्रीमद्रामदयालुशिष्येण सोमवंशीय विंदराय कुलोत्तंसराजसभामान्यभगवत्परायणसद्गुणरत्नाकरसज्जनप्रिय श्रीसेवीदव्याश्रितपादारविन्द श्रीगुलाबरायवर्मात्मजेनोदासीनावस्थेन श्रितचन्द्रमौलिनाविमुक्तदृक्षोऽत्रस्थेन रघुनाथवर्मणा विरचितो लौकिकन्यायसंग्रहः समाप्तः ।१९९० कालीषतंचुनापुजारी श्रीलक्ष्मी नी (ना?) थजीकाफतेपुरमघः वारसनी वारतीथ १० स हरे नारायेण..........

फत्तेपूर, शनिवार, १० तिथि

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

Trivandrum Sanskrit Series 270

Laukikanyayasamgraha
Edited by R. Girija

Laukikanyayasamgraha is a samgraha of Laukikanyayaratnakara of Udasina Raghunatha Varma. It deals with the Advaita Philosophy with many Laukikanyayas to make the people aware of Advaita.

General Editor
Dr. K.G. Sreelekha

Editor
R. Girija

ORIENTAL RESEARCH INSTITUTE
& MANUSCRIPTS LIBRARY
UNIVERSITY OF KERALA
KARIAVATTOM - 695581

Price : Rs. 70/-

SB PRESS PVT. LTD.

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant